# Jivanmuktivivekah

# જીવન્મુક્તિવિવેકઃ

## Document Information

Text title : JivanmuktivivekaH by Swami Vidyaranya (Madhvacharya)

File name : jIvanmuktivivekaH.itx

Category : major_works, , advaita

Location : doc_z_misc_major_works

Author : Swami Vidyaranya or Madhvacharya

Proofread by : Manish Gavkar

Latest update : July 28, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 19, 2025

*sanskritdocuments.org*

# જીવન્મુક્તિવિવેકઃ

## સાઙ્કેતિકશબ્દાનાં વર્ણાનુક્રમણિકા

અમૃતનાદોપ૦ અમૃતનાદોપનિષત્

ઉપ૦ ઉપનિષત્

ઋ૦ સ૦ ઋગ્વેદસંહિતા

કઠ ઉપ૦; કઠોપ૦ કઠોપનિષત્

છાં૦ ઉપ૦ છાન્દોગ્યોપનિષત્

તૈ૦ આ૦ તૈત્તિરીયારણ્યકં

તૈ૦ બ્રા૦ તૈત્તિરીયબ્રાહ્મણં

તૈ૦ સ૦ તૈત્તિરીયસંહિતા

નારદ-પરિ૦ ઉપ૦ નારદપરિવ્રાજકોપનિષત્

નૃ૦ પૂર્વતાપની ઉપ૦ નૃસિંહપૂર્વતાપનીયોપનિષત્

પરમ૦ ઉપ૦ પરમહંસોપનિષત્

ભાગ૦ શ્રીમદ્ભાગવતં

મનુ૦ મનુસંહિતા

મુ૦ ઉપ૦ મુણ્ડકોપનિષત્

યો૦ સૂ૦ પાતઞ્જલયોગસૂત્રં

રામાયણં વાલ્મીકિરામાયણં

લ૦ વા૦ લઘુયોગવાસિષ્ઠરામાયણં

વિ૦ પુરાણં વિષ્ણુપુરાણં

શ્વે૦ ઉપ૦ શ્વેતાશ્વતરોપનિષત્

## જીવન્મુક્તિવિવેકઃ

પરબ્રહ્મણે નમઃ ।

## ૧. જીવન્મુક્તિપ્રમાણપ્રકરણં પ્રથમમ્

યસ્ય નિઃશ્વસિતં વેદા યો વેદેભ્યોઽખિલં જગત્ ।
નિર્મમે તમહં વન્દે વિદ્યાતીર્થમહેશ્વરમ્ ॥ ૧॥

વક્ષ્યે વિવિદિષાન્યાસં વિદ્વન્ન્યાસં ચ ભેદતઃ ।
હેતૂ વિદેહમુક્તેશ્ચ જીવન્મુક્તેશ્ચ તૌ ક્રમાત્ ॥ ૨॥

સન્ન્યાસહેતુર્વૈરાગ્યં યદહર્વિરજેત્ તદા ।
પ્રવ્રજેદિતિ વેદોક્તેસ્તદ્ભેદસ્તુ પુરાણગઃ ॥ ૩॥

વિરક્તિર્દ્વિવિધા પ્રોક્તા તીવ્રા તીવ્રતરેતિ ચ ।
સત્યમેવ તુ તીવ્રાયાં ન્યસ્યેદ્ યોગી કુટીચકે ॥ ૪॥

શક્તો બહૂદકે તીવ્રતરાયાં હંસસંજ્ઞિતે ।
મુમુક્ષુઃ પરમે હંસે સાક્ષાદ્ વિજ્ઞાનસાધને ॥ ૫॥

પુત્રદારધનાદીનાં નાશે તાત્કાલિકી મતિઃ ।
ધિક્ સંસારમિતીદૃક્ સ્યાદ્ વિરક્તેર્મન્દતા હિ સા ॥ ૬॥

અસ્મિન્ જન્મનિ મા ભૂવન્ પુત્રદારાદયો મમ ।
ઇતિ યા સુસ્થિરા બુદ્ધિઃ સા વૈરાગ્યસ્ય તીવ્રતા ॥ ૭॥

પુનરાવૃત્તિસહિતો લોકો મે માસ્તુ કશ્ચન ।
ઇતિ તીવ્રતરત્વં સ્યાન્મન્દે ન્યાસો ન કોઽપિ હિ ॥ ૮॥

યાત્રાદ્યશક્તિશક્તિભ્યાં તીવ્રે ન્યાસદ્વયં ભવેત્ ।
કુટીચકો બહૂદશ્ચેત્યુભાવેતૌ ત્રિદણ્ડિનૌ ॥ ૯॥

દ્વયં તીવ્રતરે બ્રહ્મલોકમોક્ષવિભેદતઃ ।
તલ્લોકે તત્ત્વવિદ્ધંસો લોકેઽસ્મિન્ પરહંસકઃ ॥ ૧૦॥

એતેષાં તુ સમાચારાઃ પ્રોક્તાઃ પારાશરસ્મૃતૌ ।
વ્યાખ્યાનેઽસ્માભિરત્રાયં પરહંસો વિવિચ્યતે ॥ ૧૧॥

જિજ્ઞાસુર્જ્ઞાનવાંશ્ચેતિ પરહંસો દ્વિધા મતઃ ।
પ્રાહુર્જ્ઞાનાય જિજ્ઞાસોર્ન્યાસં વાજસનેયિનઃ ॥ ૧૨॥

“પ્રવ્રાજિનો લોકમેતમિચ્છન્તઃ પ્રવ્રજન્તિ હિ” ।
એતસ્યાર્થસ્તુ ગદ્યેન વક્ષ્યતે મન્દબુદ્ધયે ॥ ૧૩॥

લોકો હિ દ્વિવિધઃ, આત્મલોકોઽનાત્મલોકશ્ચેતિ ।

તત્રાનાત્મલોકસ્ય ત્રૈવિધ્યં બૃહદારણ્યકે તૃતીયાધ્યાયે શ્રૂયતે - "અથ ત્રયો વાવ લોકા મનુષ્યલોકઃ પિતૃલોકો દેવલોક ઇતિ । સોઽયં મનુષ્યલોકઃ પુત્રેણૈવ જય્યો નાન્યેન કર્મણા, કર્મણા પિતૃલોકો વિદ્યયા દેવલોકઃ" (૫.૧૬) ઇતિ ।

આત્મલોકશ્ચ તત્રૈવ શ્રૂયતે - "યો હ વા અસ્માલ્લોકાત્ સ્વં લોકમદૃષ્ટ્વા પ્રૈતિ સ એનમવિદિતો ન ભુનક્તિ" (૪.૧૫) ઇતિ ; "આત્માનમેવ લોકમુપાસીત સ ય આત્માનમેવ લોકમુપાસ્તે ન હાસ્ય કર્મ ક્ષીયતે" (૪.૧૫) ઇતિ ચ ।

યો માંસાદિકપિણ્ડલક્ષણાત્ સ્વં લોકં પરમાત્માખ્યં "અહં બ્રહ્માસ્મિ" ઇત્યવિદિત્વા મ્રિયતે સ સ્વો લોકઃ પરમાત્માવિદિતોઽવિદ્યયા વ્યવહિતઃ સન્નેનમવેદિતારં પ્રેતં મૃતં ન ભુનક્તિ શોકમોહાદિદોષાપનયનેન ન પાલયતિ । ઉપાસકસ્ય હ નિશ્ચિતં કર્મ ન ક્ષીયતે એકફલદાનેનોપક્ષીણં ન ભવતિ, કામિતસર્વફલં
મોક્ષં ચ દદાતીત્યર્થઃ ।

ષષ્ઠાધ્યાયેઽપિ - "કિમર્થા વયમધ્યેષ્યામહે કિમર્થા વયં યક્ષ્યામહે" (ઐ૦ આ૦ ૩.૨.૬) "કિં પ્રજયા કરિષ્યામો યેષાં નોઽયમાત્માયં લોકઃ" (૪.૪.૨૨) ઇતિ । "યે પ્રજામિષરે(ઽધીરા) તે શ્મશાનાનિ ભેજિરે । યે પ્રજાં નેષિરે (ધીરા) તેઽમૃતત્વં હિ ભેજિરે । " એવં ચ "એતમેવ પ્રવ્રાજિનો લોકમિચ્છન્તઃ પ્રવ્રજન્તિ" (૪.૪.૨૨) ઇત્યત્રાત્મલોકો વિવક્ષિત ઇતિ ગમ્યતે, "સ વા એષ મહાનજ આત્મા" (૪.૪.૨૨) ઇતિ પ્રક્રાન્તસ્યાત્મન એતચ્છબ્દેન પરામૃષ્ટત્વાત્ । લોક્યતેઽનુભૂયત ઇતિ લોકઃ । તથા ચાત્માનુભવમિચ્છન્તઃ પ્રવ્રજન્તીતિ શ્રુતેસ્તાત્પર્યાર્થઃ સમ્પદ્યતે । સ્મૃતિશ્ચ- "બ્રહ્મવિજ્ઞાનલાભાય પરહંસસમાહ્વયઃ । શાન્તિદાન્ત્યાદિભિઃ સર્વૈઃ સાધનૈઃ સહિતો ભવેત્" ॥ ઇતિ ॥ - (નારદ-પરિ૦ ઉપ૦ .૬.૨૬) ઇતિ ॥

ઇહ જન્મનિ જન્માન્તરે વા સમ્યગનુષ્ઠિતૈર્વેદાનુવચનાદિભિરુત્પન્નયા વિવિદિષયા સમ્પાદિતત્વાદયં વિવિદિષાસન્યાસ ઇત્યભિધીયતે । અયં ચ વેદનહેતુઃ સન્યાસો દ્વિવિધઃ, જન્માપાદકકામ્યકર્માદિત્યાગમાત્રાત્મકઃ, પ્રૈષોચ્ચારણપૂર્વક - દણ્ડધારણાદ્યાશ્રમરૂપશ્ચેતિ ।

"પુઞ્જન્મ લભતે માતા પત્ની ચ પ્રૈષમાત્રતઃ । બ્રહ્મનિષ્ઠઃ સુશીલશ્ચ જ્ઞાની ચૈતત્પ્રભાવતઃ ॥ " ત્યાગશ્ચ તૈત્તિરીયાદૌ શ્રૂયતે -"ન કર્મણા ન પ્રજયા ધનેન ત્યાગેનૈકે અમૃતત્વમાનશુઃ" (તૈ। આ .૧૦.૧૦.૨૧) ઇતિ । અસ્મિંશ્ચ ત્યાગે સ્ત્રિયોઽપ્યધિક્રિયન્તે । ("ભિક્ષુકી" ઇત્યનેન સ્ત્રીણામપિ પ્રાગ્વિવાહાદ્વા વૈધવ્યાદૂર્ધ્વં વા સંન્યાસેઽધિકારોઽસ્તીતિ દર્શિતમ્; તેન ભિક્ષાચર્યં મોક્ષશાસ્ત્રશ્રવણમેકાન્ત આત્મધ્યાનં ચ તાભિઃ કર્તવ્યમ્, ત્રિદણ્ડાદિકં ચ ધાર્યમ્; ઇતિ મોક્ષધર્મે ચતુર્ધરીટીકાયાં સુલભાજનકસંવાદે ।) શારીરકભાષ્યે "વાચક્નવી" ઇત્યાદિ શ્રૂયતે દેવતાધિકરણન્યાયેન વિધુરસ્યાધિકારપ્રસઙ્ગેન તૃતીયાધ્યાયે ચતુર્થપાદે । અત એવ મૈત્રેયીવાક્યમામ્નાયતે -"યેનાહં નામૃતા સ્યાં કિમહં તેન કુર્યાં યદેવ ભગવાન્ વેદ તદેવ મે બ્રૂહિ" (૪.૫.૪) ઇતિ । બ્રહ્મચારિગૃહસ્થવાનપ્રસ્થાનાં કેનચિન્નિમિત્તેન સન્યાસાશ્રમસ્વીકારે પ્રતિબદ્ધે સતિ, સ્વાશ્રમધર્મેષ્વનુષ્ઠીયમાનેષ્વપિ વેદનાર્થો માનસઃ કર્માદિત્યાગો ન વિરુધ્યતે, શ્રુતિસ્મૃતીતિહાસપુરાણેષુ લોકે ચ તાદૃશાં તત્ત્વવિદાં બહૂનામુપલમ્ભાત્ । યસ્તુ દણ્ડધારણાદિરૂપો વેદનહેતુઃ પરમહંસાશ્રમઃ, સ પૂર્વૈરાચાર્યૈર્બહુધા પ્રપઞ્ચિત ઇત્યસ્માભિરુપરમ્યતે । ઇતિ વિવિદિષાસન્યાસઃ ॥ ૧॥

(અથ પુરાણે શ્લોકાવુદાહરન્તિ -
અષ્ટાશીતિસહસ્રાણિ યે પ્રજામિષિર ઋષયઃ ।

દક્ષિણેનાર્યમ્ણઃ પન્થાનં તે શ્મશાનાનિ ભેજિરે ॥ ૩॥

અષ્ટાશીતિસહસ્રાણિ યે પ્રજાં નેષિર ઋષયઃ ।
ઉત્તરેણાર્યમ્ણઃ પન્થાનં તેઽમૃતત્વં હિ કલ્પતે ॥ ૪॥) - આપસ્તમ્બ ધર્મસૂત્ર (૨.૯.૨૩ઃ૩,૪)
અથ વિદ્વત્સંન્યાસં નિરૂપયામઃ ।
સમ્યગનુષ્ઠિતૈઃ શ્રવણમનનનિદિધ્યાસનૈઃ પરં તત્ત્વં વિદિતવદ્ભિઃ સમ્પાદ્યમાનો વિદ્વત્સંન્યાસઃ । તં ચ યાજ્ઞવલ્ક્યઃ સમ્પાદયામાસ ।
તથા હિ–વિદ્વચ્છિરોમણિર્ભગવાન્ યાજ્ઞવલ્ક્યો વિજિગીષુકથાયાં બહુવિધેન તત્ત્વનિરૂપણેનાશ્વલપ્રભૃતીન્ વિપ્રાન્ વિજિત્ય, વીતરાગકથાયાં સઙ્ક્ષેપવિસ્તરાભ્યામનેકધા જનકં બોધયિત્વા, મૈત્રેયીં બુબોધયિષુસ્તસ્યાસ્ત્વરયા તત્વાભિમુખ્યાય સ્વકર્તવ્યં સંન્યાસં પ્રતિજજ્ઞે । તતસ્તાં બોધયિત્વા સન્ન્યાસં ચકાર । તદુભયં મૈત્રેયીબ્રાહ્મણસ્યાદ્યન્તયોરામ્નાયતે -“અથ હ યાજ્ઞવલ્ક્યોઽન્યદ્વૃત્તમુપાકરિષ્યન્મૈત્રેયીતિ હોવાચ યાજ્ઞવલ્ક્યઃ પ્રવ્રજિષ્યન્વા અરેઽહમસ્માત્ સ્થાનાદસ્મિ” (૪.૫.૧, ૨) ઇતિ, “એતાવદરે ખલ્વમૃતત્વમિતિ હોક્ત્વા યાજ્ઞવલ્ક્યો વિજહાર” (૪.૫.૧૫) ઇતિ ચ ।
કહોલબ્રાહ્મણેઽપિ વિદ્વત્સંન્યાસ આમ્નાયતે - “એતં વૈ તમાત્માનં વિદિત્વા બ્રાહ્મણાઃ પુત્રૈષણાયાશ્ચ વિત્તૈષણાયાશ્ચ લોકૈષણાયાશ્ચ વ્યુત્થાયાથ ભિક્ષાચર્યં ચરન્તિ” (૩.૫.૧) ઇતિ । ન ચૈતદ્વાક્યં વિવિદિષાસન્ન્યાસપરમિતિ શઙ્કનીયમ્, પૂર્વકાલવાચિનઃ “વિદિત્વા” ઇતિ ક્ત્વાપ્રત્યયસ્ય બ્રહ્મવિદ્વાચિનો બ્રાહ્મણશબ્દસ્ય બાધપ્રસઙ્ગાત્ । ન ચાત્ર બ્રાહ્મણશબ્દો જાતિવાચકઃ, વાક્યશેષે પાણ્ડિત્યબાલ્યમૌનશબ્દાભિધેયૈઃ શ્રવણમનનનિદિધ્યાસનૈઃ સાધ્યં બ્રહ્મસાક્ષાત્કારમભિપ્રેત્ય “અથ બ્રાહ્મણઃ” (૩.૫.૧) ઇત્યભિહિતત્વાત્ ।
નનુ તત્ર વિવિદિષાસંન્યાસોપેતઃ પાણ્ડિત્યાદૌ પ્રવર્તમાનોઽપિ બ્રાહ્મણશબ્દેન પરામૃષ્ટઃ “તસ્માદ્ બ્રાહ્મણઃ પાણ્ડિત્યં નિર્વિદ્ય બાલ્યેન તિષ્ઠાસેત્” (૩.૫.૧) ઇતીતિ ચેત્; મૈવમ્, ભાવિનીં વૃત્તિમાશ્રિત્ય તત્ર બ્રાહ્મણશબ્દસ્ય પ્રયુક્તત્વાત્, અન્યથા કથં “અથ બ્રાહ્મણઃ” (૩.૫.૧) ઇતિ સાધનાનુષ્ઠાનોત્તર-કાલવાચિનમથશબ્દં પ્રયુઞ્જીત ?
શારીરબ્રાહ્મણેઽપિ વિદ્વત્સંન્યાસવિવિદિષાસન્ન્યાસૌ સ્પષ્ટં નિર્દિષ્ટૌ - “એતમેવ વિદિત્વા મુનિર્ભવતિ એતમેવ પ્રવ્રાજિનો લોકમિચ્છન્તઃ પ્રવ્રજન્તિ” (૪.૪.૨૨) ઇતિ ।
મુનિત્વં મનનશીલત્વં ; તચ્ચાસતિ કર્તવ્યાન્તરે સમ્ભવતીત્યર્થાત્ સંન્યાસ એવાભિધીયતે । એતચ્ચ વાક્યશેષે સ્પષ્ટીકૃતં - “એતદ્ધ સ્મ વૈતત્પૂર્વે વિદ્વાંસઃ પ્રજાં ન કામયતે કિં પ્રજયા કરિષ્યામો યેષાં નોઽયમાત્માયં લોક ઇતિ, તે હ સ્મ પુત્રૈષણાયાશ્ચ વિત્તૈષણાયાશ્ચ લોકૈષણાયાશ્ચ વ્યુત્થાયાથ ભિક્ષાચર્યં ચરન્તિ” (૪.૪.૨૨) ઇતિ । “અયં લોકઃ” ઇત્યપરોક્ષેણાનુભૂયમાન ઇત્યર્થઃ ।
નન્વત્ર મુનિત્વેન ફલેન પ્રલોભ્ય વિવિદિષાસંન્યાસં વિધાય વાક્યશેષે સ એવ પ્રપઞ્ચિતઃ ; અતો ન સન્ન્યાસાન્તરં કલ્પનીયમ્ ।
મૈવમ્, વેદનસ્યૈવ વિવિદિષાસંન્યાસફલત્વાત્ । ન ચ વેદનમુનિત્વયોરેકત્વં શઙ્કનીયમ્, “વિદિત્વા મુનિર્ભવતિ” ઇતિ પૂર્વોત્તરકાલીનયોસ્તયોઃ સાધ્યસાધનભાવપ્રતીતેઃ ।

નનુ વેદનસ્યૈવ પરિપાકાતિશયરૂપમવસ્થાન્તરં મુનિત્વમ્, અતો વેદનદ્વારા પૂર્વસંન્યાસસ્યૈવૈતત્ફલમિતિ ચેત્, બાઢં ; અત એવ સાધનરૂપાત્ સન્ન્યાસાદન્યં ફલરૂપમેતં સન્ન્યાસં બ્રૂમઃ ।

યથા વિવિદિષાસંન્યાસિના તત્ત્વજ્ઞાનાય શ્રવણાદીનિ સમ્પાદનીયાનિ, તથા વિદ્વત્સન્ન્યાસિનાપિ જીવન્મુક્તયે મનોનાશવાસનાક્ષયૌ સમ્પાદનીયૌ । એતચ્ચોપરિષ્ટાત્ પ્રપઞ્ચયિષ્યામઃ ।

સત્યપ્યનયોઃ સંન્યાસયોરવાન્તરભેદે પરમહંસત્વાકારેણૈકીકૃત્ય “ચતુર્વિધા ભિક્ષવઃ” ઇતિ સ્મૃતિષુ ચતુઃ સઙ્ખ્યોક્તા । પૂર્વોત્તરયોરુભયોઃ સન્ન્યાસયોઃ પરમહંસત્વં જાબાલશ્રુતાવવગમ્યતે । તત્ર હિ જનકેન સન્ન્યાસે પૃષ્ટે સતિ, યાજ્ઞવલ્ક્યોઽધિકારવિશેષવિધાનેનોત્તરકાલાનુષ્ઠેયેન ચ સહિતં વિવિદિષાસન્ન્યાસમભિધાય, પશ્ચાદત્રિણા યજ્ઞોપવીતરહિતસ્યાક્ષિપ્તે બ્રાહ્મણ્યે સતિ, પશ્ચાદાત્મજ્ઞાનમેવ યજ્ઞોપવીતમિતિ સમાદધૌ । અતો બાહ્યયજ્ઞોપવીતાભાવાત્ પરમહંસત્વં નિશ્ચીયતે ।

તથાન્યસ્યાં કણ્ડિકાયાં “તત્ર પરમહંસા નામ” (૬) ઇત્યુપક્રમ્ય સંવર્તકાદીન્બહૂન્બ્રહ્મવિદો જીવન્મુક્તાનુદાહૃત્ય “અવ્યક્તલિઙ્ગા અવ્યક્તાચારા અનુન્મત્તા ઉન્મત્તવદાચરન્તઃ” (૬) ઇતિ વિદ્વત્સંન્યાસિનો દર્શિતાઃ ।

તથા “ત્રિકાણ્ડં કમણ્ડલું શિક્યં પાત્રં જલપવિત્રં શિખાં યજ્ઞોપવીતં ચેત્યેતત્સર્વં ભૂઃ સ્વાહેત્યપ્સુ પરિત્યજ્યાત્માનમન્વિચ્છેત્” (૬) ઇતિ ત્રિદણ્ડિનઃ સત એકદણ્ડલક્ષણં વિવિદિષાસંન્યાસં વિધાય તત્ફલરૂપં વિદ્વત્સન્ન્યાસમેવમુદાજહાર - “યથાજાતરૂપધરો નિર્દ્વન્દ્વો નિષ્પરિગ્રહસ્તત્ર બ્રહ્મમાર્ગે સમ્યક્સમ્પન્નઃ શુદ્ધમાનસઃ પ્રાણસન્ધારણાર્થં યથોક્તકાલે વિમુક્તો ભૈક્ષમાચરન્નુદરપાત્રેણ લાભાલભયોઃ સમો ભૂત્વા શૂન્યાગારદેવગૃહતૃણકૂટવલ્મીકવૃક્ષમૂલકુલાલશાલાગ્નિહોત્રગૃહનદીપુલિનગિરિકુહરકન્દર-કોટરનિર્ઝરસ્થણ્ડિલેષ્વનિકેતવાસ્યપ્રયત્નો નિર્મમઃ શુક્લધ્યાનપરાયણોઽધ્યાત્મનિષ્ઠઃ શુભાશુભકર્મ-નિર્મૂલનપરઃ સન્ન્યાસેન દેહત્યાગં કરોતિ, સ પરમહંસો નામ” (૬) ઇતિ ।

તસ્માદનયોરુભયોઃ પરમહંસત્વં સિદ્ધમ । સમાનેઽપિ પરમહંસત્વે સિદ્ધે વિરુદ્ધધર્માક્રાન્તત્વાદવાન્તર-ભેદોઽપ્યભ્યુપગન્તવ્યઃ । વિરુદ્ધધર્મત્વં ચારુણિકોપનિષત્પરમહંસોપનિષદોઃ પર્યાલોચનાયામવગમ્યતે । “કેન ભગવન્ કર્માણિ અશેષતો વિસૃજામિ” (૧) ઇતિ શિખાયજ્ઞોપવીતસ્વાધ્યાયગાયત્રીજપાદ્યશેષકર્મત્યાગરૂપે વિવિદિષાસંન્યાસે શિષ્યેણારુણિના પૃષ્ટે સતિ, ગુરુઃ પ્રજાપતિઃ “શિખાં યજ્ઞોપવીતમ્” (૧) ઇત્યાદિના સર્વત્યાગમભિધાય, “દણ્ડમાચ્છાદનં કૌપીનં ચ પરિગ્રહેત્” (૧) ઇતિ દણ્ડાદિસ્વીકારં વિધાય, “ત્રિસન્ધ્યાદૌ સ્નાનમાચરેત્, સન્ધિં સમાધાવાત્મન્યાચરેત્, સર્વેષુ વેદેષ્વારણ્યકમાવર્તયેત્ ઉપનિષદમાવર્તયેત્ (૨) ઇતિ વેદન હેતૂનાશ્રમધર્માનનુષ્ઠેયતયા વિધત્તે ।

અથ યોગિનાં પરમહંસાનાં કોઽયં માર્ગઃ ? ઇતિ વિદ્વત્સંન્યાસે નારદેન પૃષ્ટે સતિ, ગુરુર્ભગવાન્ પ્રજાપતિઃ “સ્વપુત્રમિત્ર -” ઇત્યાદિના પૂર્વવત્ સર્વત્યાગમભિધાય, “કૌપીનં દણ્ડમાચ્છાદનં ચ સ્વશરીરોપભોગાર્થાય લોકસ્યોપકારાર્થાય ચ પરિગ્રહેત્” ઇતિ દણ્ડાદિસ્વીકારસ્ય લૌકિકત્વમભિધાય “તચ્ચ ન મુખ્યોઽસ્તિ” ઇતિ શાસ્ત્રીયત્વં પ્રતિષિધ્ય, “કોઽયં મુખ્ય ઇતિ ચેદયં મુખ્યો ન દણ્ડં ન શિખાં ન યજ્ઞોપવીતં ન ચાચ્છાદનં ચરતિ પરમહંસઃ” , ઇતિ દણ્ડાદિલિઙ્ગરાહિત્યસ્ય શાસ્ત્રીયતામુક્ત્વા “ન શીતં ન ચોષ્ણમ્” ઇત્યાદિવાક્યેન “આશામ્બરો નિર્નમસ્કારઃ” ઇત્યાદિવાક્યેન ચ લોકવ્યવહારાતીતત્વમભિધાય, અન્તે, “યત્પૂર્ણાનન્દૈકબોધસ્તદ્બ્રહ્માહમસ્મીતિ કૃતકૃત્યો ભવતિ” ઇત્યન્તેન ગ્રન્થેન બ્રહ્માનુભવમાત્રપર્યવસાનમાચષ્ટે । અતો વિરુદ્ધધર્મોપેતત્વાદસ્ત્યેવાનયોર્મહાન્ભેદઃ ।

સ્મૃતિષ્વપ્યયં ભેદ ઉક્તદિશા દ્રષ્ટવ્યઃ ।
“સંસારમેવ નિઃસારં દૃષ્ટ્વા સારદિદૃક્ષયા ।
પ્રવ્રજન્ત્યકૃતોદ્વાહાઃ પરં વૈરાગ્યમાશ્રિતાઃ” ॥ - (બૃહસ્પતિસ્મૃતૌ ૩.૩૬) ॥

“પ્રવૃત્તિલક્ષણો યોગો જ્ઞાનં સંન્યાસલક્ષણમ્ ।
તસ્માજ્જ્ઞાનં પુરસ્કૃત્ય સંન્યસ્યેદિહ બુદ્ધિમાન્” ॥ - (મહાભારતે ૧૪.૪૩.૩૯) ॥

ઇત્યાદિ વિવિદિષાસંન્યાસઃ ।
“યદા તુ વિદિતં તત્સ્યાત્ પરં બ્રહ્મ સનાતનમ્ ।
તદૈકદણ્ડં સઙ્ગૃહ્ય સોપવીતાં શિખાં ત્યજેત્ ।
જ્ઞાત્વા સમ્યક્ પરં બ્રહ્મ સર્વં ત્યક્ત્વા પરિવ્રજેત્” ॥

ઇત્યાદિ વિદ્વત્સંન્યાસઃ ।
નનુ કલાવિદ્યાસ્વિવ કદાચિદૌત્સુક્યમાત્રેણાપિ વેદિતુમિચ્છા સમ્ભવતિ, એવં વિદ્વત્તાપ્યાપાતદર્શિનઃ પણ્ડિતમ્મન્યસ્યાત્રાવલોક્યતે, ન ચ તૌ પ્રવ્રજિતૌ દૃષ્ટૌ, અતો વિવિદિષાવિદ્વત્તે કીદૃશે વિવક્ષિતે ઇતિ ચેત્ ।
ઉચ્યતે- યથા તીવ્રાયાં બુભુક્ષાયામુત્પન્નાયાં ભોજનાદન્યો ન રોચતે વ્યાપારઃ, ભોજને ચ વિલમ્બોઽપિ સોઢું ન શક્યતે, તથા જન્મહેતુષુ કર્મસ્વત્યન્તમરુચિર્વેદનસાધનેષુ ચ શ્રવણાદિષુ ત્વરા મહતી સમ્પદ્યતે, તાદૃશી વિવિદિષા સંન્યાસહેતુઃ ।
વિદ્વત્તાયા અવધિરુપદેશસાહસ્ર્યામભિહિતઃ
“દેહાત્મજ્ઞાનવજ્જ્ઞાનં દેહાત્મજ્ઞાનબાધકમ્ ।
આત્મન્યેવ ભવેદ્યસ્ય સ નેચ્છન્નપિ મુચ્યતે” ॥ - (ઉપદેશસાહસ્ર્યાં ૪.૫) ઇતિ ॥ ।

શ્રુતાવપિ -
“ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે” ॥ - (મુણ્ડકોપનિષદિ ૨.૨.૮) ઇતિ ॥

પરમપિ હૈરણ્યગર્ભાદિકં પદમવરં યસ્માદસૌ પરાવરઃ, હૃદયે બુદ્ધૌ સાક્ષિણસ્તાદાત્મ્યાધ્યાસોઽનાદ્યવિદ્યા-નિર્મિતત્વેન ગ્રન્થિવદ્ દૃઢસંશ્લેષરૂપત્વાદ્ ગ્રન્થિરિત્યુચ્યતે । આત્મા સાક્ષી વા કર્તા વા, સાક્ષિત્વેઽપ્યસ્ય બ્રહ્મત્વમસ્તિ વા નવા, બ્રહ્મત્વેઽપિ તદ્બુદ્ધ્યા વેદિતું શક્યં વા ન વા, શક્યત્વેઽપિ તદ્વેદનમાત્રેણ મુક્તિરસ્તિ વા ન વા ઇત્યાદયઃ સંશયાઃ । કર્માણ્યનારબ્ધાન્યાગામિજન્મકારણાનિ । તદેતદ્ ગ્રન્થ્યાદિત્રયમવિદ્યાનિર્મિત-ત્વાદાત્મદર્શનેન નિવર્તતે ।
સ્મૃતાવપ્યયમર્થ ઉપલભ્યતે -
“યસ્ય નાહઙ્કૃતો ભાવો બુદ્ધિર્યસ્ય ન લિપ્યતે ।
હત્વાપિ સ ઇમાલ્લ્લોઁકાન્ન હન્તિ ન નિબધ્યતે” ॥ - (ભગવદ્ગીતાયાં ૧૮.૧૭) ઇતિ ॥

યસ્ય બ્રહ્મવિદો, ભાવઃ સત્તા, સ્વભાવ, આત્મા, નાહઙ્કૃતોઽહઙ્કારેણ તાદાત્મ્યાધ્યાસાદન્તર્નાચ્છાદિતઃ । બુદ્ધિલેપઃ સંશયઃ । તદભાવે ત્રૈલોક્યવધેનાપિ ન બધ્યતે, કિમુતાન્યેન કર્મણેત્યર્થઃ । નન્વેવં સતિ વિવિદિષાસંન્યાસફલેન તત્ત્વજ્ઞાનેનૈવાગામિજન્મનો વારિતત્વાદ્વર્તમાનજન્મશેષસ્ય ભોગમન્તરેણ વિનાશયિતુમશક્યત્વાત્ કિમનેન વિદ્વત્સન્યાસપ્રયાસેનેતિ ચેત્ । મૈવમ્, વિદ્વત્સન્યાસસ્ય જીવન્મુક્તિ-હેતુત્વાત્ । તસ્માદ્વેદનાય યથા વિવિદિષાસન્યાસ એવં જીવન્મુક્તયે વિદ્વત્સન્યાસઃ સમ્પાદનીયઃ । ઇતિ વિદ્વત્સન્યાસઃ ॥ ૨॥

અથ કેયં જીવન્મુક્તિઃ કિં વા તત્ર પ્રમાણં કથં વા તત્સિદ્ધિઃ સિદ્ધૌ વા કિં પ્રયોજનમિતિ ચેત્ ।

ઉચ્યતે - જીવતઃ પુરુષસ્ય કર્તૃત્વભોક્તૃત્વસુખદુઃખાદિલક્ષણશ્ચિત્તધર્મઃ ક્લેશરૂપત્વાદ્બન્ધોભવતિ, તસ્ય નિવારણં જીવન્મુક્તિઃ ।

નન્વયં બન્ધઃ કિં સાક્ષિણો નિવાર્યતે, કિં વા ચિત્તાત્ ? નાદ્યઃ, તત્ત્વજ્ઞાનેનૈવ નિવારિતત્વાત્ । ન દ્વિતીયઃ, અસમ્ભવાત્ । યદા તુ જલાદ્ દ્રવત્વં નિવાર્યેત વહ્નેર્વોષ્ણત્વં તદા ચિત્તાત્ કર્તૃત્વાદિનિવારણસમ્ભવઃ, સ્વાભાવિકત્વં તુ સર્વત્ર સમાનમ્ ।

મૈવમ્, આત્યન્તિકનિવારણાસમ્ભવેઽપ્યભિભવસ્ય સમ્ભવાત્ । યથા જલગતં દ્રવત્વં મૃત્તિકામેલનેનાભિભૂયતે વહ્નેરૌષ્ણ્યં મણિમન્ત્રાદિના, તથા સર્વાશ્ચિત્તવૃત્તયો યોગાભ્યાસેનાભિભવિતું શક્યન્તે ।

નનુ પ્રારબ્ધં કર્મ કૃત્સ્નાવિદ્યાતત્કાર્યનાશને પ્રવૃત્તસ્ય તત્ત્વજ્ઞાનસ્ય પ્રતિબન્ધં કૃત્વા સફલદાનાય દેહેન્દ્રિયાદિકમવસ્થાપયતિ, ન ચ સુખદુઃખાદિભોગશ્ચિત્તવૃત્તિં વિના સમ્પાદયિતું શક્યતે, તતઃ કથમભિભવઃ ?

મૈવમ્, અભિભવસાધ્યાયા જીવન્મુક્તેરપિ સુખાતિશયરૂપત્વેન પ્રારબ્ધફલ એવાન્તર્ભાવાત્ । તર્હિ કર્મૈવ જીવન્મુક્તિં સમ્પાદયિષ્યતિ, મા ભૂત્પુરુષપ્રયત્ન ઇતિ ચેત્; કૃષિવાણિજ્યાદાવપિ સમાનઃ પર્યનુયોગઃ ।

કર્મણઃ સ્વયમદૃષ્ટરૂપસ્ય દૃષ્ટસાધનસમ્પત્તિમન્તરેણ ફલજનનાસમર્થત્વાદપેક્ષિતઃ કૃષ્યાદૌ પુરુષપ્રયત્ન ઇતિ ચેત્, જીવન્મુક્તાવપિ સમં સમાધાનમ્ । સત્યપિ પુરુષપ્રયત્ને કૃષ્યાદેઃ ફલપર્યવસાનં યત્ર ન દૃશ્યતે તત્ર પ્રબલેન કર્માન્તરેણ પ્રતિબન્ધઃ કલ્પનીયઃ । તચ્ચ પ્રબલં કર્મ સ્વાનુકુલવૃષ્ટ્યભાવાદિરૂપાં દૃષ્ટસામગ્રીં સમ્પાદ્યૈવ પ્રતિબધ્નાતિ ।

સ ચ પ્રતિબન્ધો વિરોધિના પ્રબલતરેણોત્તમ્ભકેન કારીરીષ્ટ્યાદિરૂપેણ કર્મણાપનીયતે । તચ્ચ કર્મ સ્વાનુકૂલાં વૃષ્ટિલક્ષણાં દૃષ્ટસામગ્રીં સમ્પાદ્યૈવ પ્રતિબન્ધમપનયતિ । કિં બહુના ? પ્રારબ્ધકર્મણ્યેવાત્યન્તભક્તેન ભવતા યોગાભ્યાસરૂપસ્ય પુરુષપ્રયત્નસ્ય વૈયર્થ્યં મનસાપિ ચિન્તયિતુમશક્યમ્ । અથવા પ્રારબ્ધં કર્મ યથા તત્ત્વજ્ઞાનાત્પ્રબલં તથા તસ્માદપિ કર્મણો યોગાભ્યાસઃ પ્રબલોઽસ્તુ । તથા ચ યોગિનામુદ્દાલકવીતહવ્યાદીનાં સ્વેચ્છયા દેહત્યાગ ઉપપદ્યતે ।

યદ્યપ્યલ્પાયુષામસ્માકં તાદૃશો યોગો ન સમ્ભવતિ, તથાઽપિ કામાદિરૂપચિત્તવૃત્તિનિરોધમાત્રે યોગે કો નામ પ્રયાસઃ ? યદિ શાસ્ત્રીયસ્ય પ્રયત્નસ્ય પ્રાબલ્યં નાઙ્ગીક્રિયતે તદા ચિકિત્સામારભ્ય મોક્ષશાસ્ત્રપર્યન્તાનાં સર્વેષામાનર્થક્યં પ્રસજ્યેત ।

ન હિ કદાચિત્ કર્મફલવિસંવાદમાત્રેણ દૌર્બલ્યમાપાદયિતું શક્યમ્; અન્યથા કાદાચિત્કં પરાજયં દૃષ્ટ્વા સર્વૈર્ભૂપૈર્ગજાશ્વાદિસેનોપેક્ષ્યેત । અત એવાનન્દબોધાચાર્યા આહુઃ - “ન હ્યજીર્ણભયાદાહારપરિત્યાગઃ,

ભિક્ષુકભયાદ્વા સ્થાલ્યનધિશ્રયણમ્, યૂકાભયાદ્વા પ્રાવરણપરિત્યાગઃ”** ઇતિ ।
(** યૂકાભયાદ્વા પરિધાનવિમોકઃ શીતાર્તસ્ય ઇતિ । - પ્રમાણમાલા પ૨૧)
શાસ્ત્રીયપ્રયત્નસ્યપ્રાબલ્યં વસિષ્ઠરામસંવાદે વિસ્પષ્ટમવગમ્યતે “સર્વમેવેહ હિ સદા” ઇત્યારભ્ય “તદનુ તદપ્યવમુચ્ય સાધુ તિષ્ઠ” ઇત્યન્તેન ગ્રન્થેન ।
વસિષ્ઠઃ - “સર્વમેવેહ હિ સદા સંસારે રઘુનન્દન ।
સમ્યક્પ્રયુક્તાત્ સર્વેણ પૌરુષાત્ સમવાપ્યતે” ॥ - (યોગવાસિષ્ઠે મુમુક્ષુવ્યવહારપ્રકરણે ૪.૮) ॥

સર્વં પુત્રવિત્તસ્વર્ગલોકબ્રહ્મલોકાદિફલમ્ । પૌરુષં પુત્રકામેષ્ટિકૃષિવાણિજ્યજ્યોતિષ્ટોમબ્રહ્મોપાસનાલક્ષણઃ પુરુષપ્રયત્નઃ ।
“ઉચ્છાસ્ત્રં શાસ્ત્રિતં ચેતિ પૌરુષં દ્વિવિધં સ્મૃતમ્ ।
તત્રોચ્છાસ્ત્રમનર્થાય પરમાર્થાય શાસ્ત્રિતમ્” ॥ (તત્રૈવ ૫.૫) ॥

“ઉચ્છાસ્ત્રં પરદ્રવ્યાપહારપરસ્ત્રીગમનાદિ । શાસ્ત્રિતં નિત્યનૈમિત્તિકાનુષ્ઠાનાદિ । અનર્થો નરકઃ અર્થેષુ સ્વર્ગાદિષુ પરમો મોક્ષઃ પરમાર્થઃ ।
“આબાલ્યાદલમભ્યસ્તૈઃ શાસ્ત્રસત્સઙ્ગમાદિભિઃ ।
ગુણૈઃ પુરુષયત્નેન સોઽર્થઃ સમ્પાદ્યતે હિતઃ” ॥ (તત્રૈવ ૫.૨૮) ॥

અલં સમ્પૂર્ણં સમ્યગિત્યર્થઃ । ગુણૈર્યુક્તેનેત્યધ્યાહારઃ । હિતઃ શ્રેયોરૂપઃ ।
શ્રીરામઃ - “પ્રાક્તનં વાસનાજાલં નિયોજયતિ માં યથા ।
મુને તથૈવ તિષ્ઠામિ કૃપણઃ કિં કરોમ્યહમ્” ॥ – (તત્રૈવ ૯.૨૩) ॥ ઇતિ ॥

વાસના ધર્માધર્મરૂપા જીવગતાઃ સંસ્કારાઃ ।
વસિષ્ઠઃ - “અત એવ હિ હે રામ” શ્રેયઃ પ્રાપ્નોષિ શાશ્વતમ્ ।
સ્વપ્રયત્નોપનીતેન પૌરુષેણૈવ નાન્યથા” ॥ - (તત્રૈવ ૯.૨૪) ॥

યતો વાસનાપરતન્ત્રો ભવાનત એવ હિ પારતન્ત્ર્યનિવારણાય સ્વોત્સાહસમ્પાદિતો મનોવાક્કાયજન્યઃ પુરુષવ્યાપારોઽપેક્ષિતઃ ।
“દ્વિવિધો વાસનાવ્યૂહઃ શુભશ્ચૈવાશુભશ્ચ તે ।
પ્રાક્તનો વિદ્યતે રામ દ્વયોરેકતરોઽથવા” ॥ (તત્રૈવ ૯.૨૫) ॥

કિં ધર્માધર્માવુભાવપિ ત્વાં નિયોજયત ઉતૈકતર ઇતિ વિકલ્પઃ । એકતરપક્ષેઽપિ શુભોઽશુભવેત્યર્થાત્સિદ્ધો વિકલ્પઃ ।
“વાસનૌઘેન શુદ્ધેન તત્ર ચેદપનીયસે ।
તત્ક્રમેણાશુ તેનૈવ પદં પ્રાપ્સ્યસિ શાશ્વતમ્” ॥ - (તત્રૈવ ૯.૨૬) ॥

તત્ર તેષુ પક્ષેષુ । તત્તર્હિ । તેનૈવ ક્રમેણ શુભવાસનાપ્રાપિતેનૈવાચરણેન પ્રયત્નાન્તરનિરપેક્ષેણ । શાશ્વતં પદં મોક્ષમ્ ।

“અથ ચેદશુભો ભાવસ્ત્વાં યોજયતિ સઙ્કટે ।
પ્રાક્તનસ્તદસૌ યત્નાજ્જેતવ્યો ભવતા સ્વયમ્” ॥ - (તત્રૈવ ૯.૨૭) ॥

ભાવો વાસના । તર્ત્તહિં । યત્નોઽશુભવિરોધિશાસ્ત્રીયધર્માનુષ્ઠાનમ્ । તેન સ્વયં જેતવ્યઃ, ન તુ યુદ્ધે મૃત્યુમુખેનેવ પુરુષાન્તરમુખેન જેતું શક્યઃ ।
“શુમાશુભાભ્યાં માર્ગાભ્યાં વહન્તી વાસનાસરિત્ ।
પૌરુષેણ પ્રયત્નેન યોજનીયા શુભે પથિ” ॥ (તત્રૈવ ૯.૩૦) ॥

ઉભયપક્ષે તુ શુભભાગસ્ય પ્રયત્નનૈરપેક્ષ્યેઽપ્યશુભભાગં શાસ્ત્રીયપ્રયત્નેન નિવાર્ય શુભમેવ તસ્ય સ્થાને સમાચરેત્ ।
“અશુભેષુ સમાવિષ્ટં શુભેષ્વેવાવતારય ।
સ્વમનઃ પુરુષાર્થેન બલેન બલિનાં વર” । - (તત્રૈવ ૯.૩૧) ॥

અશુભેષુ પરસ્ત્રીદ્રવ્યાદિષુ । શુભેષુ શાસ્ત્રાર્થદેવતાધ્યાનાદિષુ । પુરુષાર્થેન પુરુષપ્રયત્નેન । બલેન પ્રબલેન ।
“અશુભાચ્ચાલિતં યાતિ શુભં તસ્માદપીતરત્ ।
જન્તોશ્ચિત્તં તુ શિશુવત્ તસ્માત્ તચ્ચાલયેદ્બલાત્” ॥ ૧૧॥ - (તત્રૈવ ૯.૩૨) ॥

યથા શિશુર્મૃદ્ભક્ષણાન્નિવાર્ય ફલભક્ષણે યોજ્યતે, મણિમુક્તાદ્યાકર્ષણાન્નિવાર્ય કન્દુકાદ્યાકર્ષણે યોજ્યતે તથા ચિત્તમપિ સત્સઙ્ગેન દુઃસઙ્ગાત્તદ્વિપરીતવિષયાન્નિવારયિતું શક્યમ્ ।
“સમતાસાન્ત્વનેનાશુ ન દ્રાગિતિ શનૈઃ શનૈઃ ।
પૌરુષેણ પ્રયત્નેન લાલયેચ્ચિત્તબાલકમ્” ॥ - (તત્રૈવ ૯.૩૩) ॥

ચપલસ્ય પશોર્બન્ધસ્થાને પ્રવેશનાય દ્વાવુપાયૌ ભવતઃ । હરિતતૃણપ્રદર્શનં કણ્ડૂયનાદિકમ્, વાક્યપારુષ્યં દણ્ડાદિભર્ત્સનં ચેતિ । તત્રાદ્યેન સહસા પ્રવેશ્યતે, દ્વિતીયેનેતસ્તતો ધાવઞ્શનૈઃ શનૈઃ પ્રવેશ્યતે । તથા શત્રુમિત્રાદિસમત્વબોધનં પ્રાણાયામપ્રત્યાહારાદિપુરુષપ્રયત્નશ્ચેત્યેતૌ દ્વૌ ચિત્તશાન્ત્યુપાયૌ । તત્રાદ્યેન મૃદુયોગેન શીઘ્રં લાલયેત્ । દ્વિતીયેન હઠયોગેન દ્રાગિતિ ન લાલયેત્, કિન્તુ શનૈઃ શનૈઃ ।
“દ્રાભ્યાસવશાદ્યાતિ યદા તે વાસનોદયમ્ ।
તદાભ્યાસસ્ય સાફલ્યં વિદ્ધિ ત્વમરિમર્દન । - (તત્રૈવ ૯.૩૫) ॥

મૃદુયોગાભ્યાસાચ્છીઘ્રમેવ સદ્વાસનોદયે સતિ સાફલ્યમભ્યાસસ્ય મન્તવ્યમ્, ન ત્વલ્પકાલત્વેનાસમ્ભાવના શઙ્કનીયા ।
“સન્દિગ્ધાયામપિ ભૃશં શુભામેવ સમાહર ।
શુભ વાસનાવૃદ્ધૌ તાત દોષો ન કશ્ચન” ॥ - (તત્રૈવ ૯.૩૮) ॥

શુભવાસનાભ્યસ્યમાના સમ્પૂર્ણા વા ન વેતિ યદા સન્દેહસ્તદાપિ શુભામભ્યસ્યેદેવ । તદ્યથા સહસ્રજપે પ્રવૃત્તસ્ય દશમી શતસઙ્ખ્યા યદા સન્દિગ્ધા, નદા પુનરપિ શતં જપેત્; અસમ્પૂર્તૌ સમ્પૂર્તિઃ ફલિષ્યતિ, સમ્પૂર્તૌ તુ તદ્વૃદ્ધ્યા ન સહસ્રજપો દુષ્યતિ, તદ્વત્ ।
“અવ્યુત્પન્નમના યાવદ્ભવાનજ્ઞાતતત્પદઃ ।

ગુરુશાસ્ત્રપ્રમાણૈસ્તુ નિર્ણીતં તાવદાચર" ॥ - (તત્રૈવ ૯.૪૧૯) ॥

"તતઃ પક્વકષાયેણ નૂનં વિજ્ઞાતવસ્તુના ।
ભોઽપ્યસૌ ત્વયા ત્યાજ્યો વાસનૌઘો નિરોધિના" ॥ - (તત્રૈવ ૯.૪૨) ॥

"યદતિસુભગમાર્યસેવિતં ત-
ચ્છુભમનુસૃત્ય મનોજ્ઞભાવશુદ્ધ્યા ॥

અધિગમય પદં સદા વિશોકં
તદનુ તદપ્યવમુચ્ય સાધુ તિષ્ઠ" ॥ - (તત્રૈવ ૯.૪૩) ઇતિ ॥

સ્પષ્ટોર્થઃ । તસ્માદ્યોગાભ્યાસેન કામાદ્યભિભવસમ્ભવાજ્જીવન્મુક્તૌ ન વિવદિતવ્યમ્। ઇતિ જીવન્મુક્તિસ્વરૂપમ્ ॥ ૩॥

શ્રુતિસ્મૃતિવાક્યાનિ જીવન્મુક્તિસદ્ભાવે પ્રમાણાનિ । તાનિ ચ કઠવલ્લ્યાદિષુ પઠ્યન્તે - તત્ર "વિમુક્તશ્ચ વિમુચ્યતે" (૫.૧) ઇતિ કઠવલ્લ્યામ્। જીવન્નેવ દૃષ્ટબન્ધનાત્ કામાદેર્વિશેષેણ મુક્તઃ સન્ દેહપાતે ભાવિબન્ધાદ્વિશેષેણ મુચ્યતે । વેદનાત્ પ્રાગપિ શમદમાદિસમ્પાદનેન કામાદિભ્યો મુચ્યત એવ, તથાપ્યુત્પન્નાનાં કામાદીનાં તત્ર પ્રયત્નેન નિરોધઃ; અત્ર તુ ધીવૃત્ત્યભાવાદનુત્પત્તિરેવ; તતો વિશેષેણેત્યુચ્યતે । તથા પ્રલયે દેહપાતે ચ સતિ કઞ્ચિત્કાલં ભાવિદેહબન્ધાન્મુચ્યતે; અત્ર ત્વાત્યન્તિકો મોક્ષ ઇત્યભિપ્રેત્ય વિશેષેણેત્યુક્તમ્ ।
બૃહદારણ્યકે પઠ્યતે -
"યદા સર્વે પ્રમુચ્યન્તે કામા યેઽસ્ય હૃદિ શ્રિતાઃ ।
અથ મર્ત્યોઽમૃતો ભવત્યત્ર બ્રહ્મ સમશ્નુતે" ॥ - (૪.૪.૭) ઇતિ ॥

શ્રુત્યન્તરેઽપિ - "સચક્ષુરચક્ષુરિવ સકર્ણોઽકર્ણ ઇવ સમના અમના ઇવ સપ્રાણોઽપ્રાણ ઇવ" ** ઇતિ । એવમન્યત્રાપ્યુદાહાર્યમ્ । સ્મૃતિષુ જીવન્મુક્તઃ સ્થિતપ્રજ્ઞભગવદ્ભક્તગુણાતીતબ્રાહ્મણાતિવર્ણાશ્રમ્યાદિનામભિ-સ્તત્ર તત્ર વ્યવહ્રિયતે । વસિષ્ઠરામસંવાદે - "નૃણાં જ્ઞાનૈકનિષ્ઠાનામ્" ઇત્યારભ્ય "સત્કિઞ્ચિદવશિષ્યતે"
ઇત્યન્તેન ગ્રન્થેન જીવન્મુક્તઃ પઠ્યતે ।
વસિષ્ઠ - "નૃણાં જ્ઞાનૈકનિષ્ઠાનામાત્મજ્ઞાનવિચારિણામ્ ।
સા જીવન્મુક્તોદેતિ વિદેહોન્મુક્તતેવ યા" ॥ ૮૮॥ - (લઘુયોગવાસિષ્ઠે ૫.૮૮) ॥

જ્ઞાનૈકનિષ્ઠત્વં લૌકિકવૈદિકકર્મત્યાગઃ । દેહેન્દ્રિયસદસદ્ભાવમાત્રેણ મુક્તિદ્વયસ્ય વિશેષો ન ત્વનુભવતઃ દ્વૈતપ્રતીતેરુભયત્રાભાવાત્ ।
શ્રીરામઃ - "બ્રહ્મન્વિદેહમુક્તસ્ય જીવન્મુક્તસ્ય લક્ષણમ્ ।
બ્રૂહિ યેન તથૈવાહં યતે શાસ્ત્રજયા દૃશા ॥ ૮૯॥ ** - (તત્રૈવ ૫.૮૯) ॥

વસિષ્ઠઃ - "યથાસ્થિતમિદં યસ્ય વ્યવહારવતોઽપિ ચ ।
અસ્તં ગતં સ્થિતં વ્યોમ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૦॥ - (તત્રૈવ ૫.૯૦) ॥

ઇદં પ્રતીયમાનં ગિરિનદીસમુદ્રાદિકં જગત્પ્રતિપત્તુર્દેહેન્દ્રિયવ્યવહારેણ સહ મહાપ્રલયે પરમેશ્વરેણોપસંહૃતં સત્સ્વરૂપોપમર્દેનાસ્તં ગતં ભવતિ । અત્ર તુ ન તથા ; કિં તુ વિદ્યત એવ દેહેન્દ્રિયાદિવ્યવહારઃ । ગિરિનદ્યાદિકં ચ પરમેશ્વરેણાનુપસંહૃતત્વાદ્ યથાપૂર્વમવતિષ્ઠમાનં સત્સર્વૈરન્યૈઃ પ્રાણિભિર્વિસ્પષ્ટમવલોક્યતે । જીવન્મુક્તસ્ય તત્પ્રત્યાયકધીવૃત્ત્યભાવાત્ સુષુપ્તાવિવ સર્વમસ્તં ગતં ભવતિ । સ્વયં પ્રકાશમાનં ચિદ્વ્યોમ કેવલમવશિષ્યતે । બદ્ધસ્ય સુષુપ્તૌ તાત્કાલિકધીવૃત્ત્યભાવસામ્યેઽપિ ભાવિધીવૃત્તિબીજસદ્ભાવાન્ન જીવન્મુક્તત્વમ્ ।
વસિષ્ઠઃ- “નોદેતિ નાસ્તમાયાતિ સુખે દુઃખે મુખપ્રભા ।
યથાપ્રાપ્તે સ્થિતિર્યસ્ય સ જીવન્મુક્ત ઉચ્યતે” ॥ ૯૧॥ - (તત્રૈવ ૫.૯૧) ॥

મુખપ્રભા હર્ષઃ । સ્રક્ચન્દનસત્કારાદિસુખે પ્રાપ્તેઽપિ સંસારિણ ઇવ હર્ષો નોદેતિ । મુખપ્રભાસ્તમયો દૈન્યમ્ । ધનહાનિધિક્કારાદિદુઃખે પ્રાપ્તેઽપિ ન દીનો ભવતિ । ઇદાનીન્તનસ્વપ્રયત્નવિશેષમન્તરેણ પ્રારબ્ધકર્મા-પાદિતપૂર્વપ્રવાહાગતભિક્ષાન્નાદિકં યથાપ્રાપ્તમ્, તસ્મિન્ સ્થિતિર્દેહરક્ષા । સમાધિદાર્ઢ્યેન સ્રક્ચન્દનાદિ-પ્રતીત્યભાવાત્, કદાચિદ્ વ્યુત્થાનદશાયામાપાતતઃ પ્રતીતાવપિ વિવેકદાર્ઢ્યેનૈવ હેયોપાદેયત્વબુદ્ધ્ય-ભાવાદ્ધર્ષાદિરાહિત્યમુપપદ્યતે ।
વસિષ્ઠઃ- “યો જાગર્તિ સુષુપ્તિસ્થો યસ્ય જાગ્રન્ન વિદ્યતે ।
યસ્ય નિર્વાસનો બોધઃ સ જીવન્મુક્ત ઉચ્યતે” ॥ ૯૨॥ - (તત્રૈવ ૫.૯૨) ॥

ચક્ષુરાદીન્દ્રિયાણાં સ્વસ્વગોલકેષ્વવસ્થાનેનોપરત્યભાવાજ્જાગર્તિ । મનોવૃત્તિરહિતત્વાત્ સુષુપ્તિસ્થઃ । અત એવ “ઇન્દ્રિયૈરર્થોપલબ્ધિઃ” ઇત્યેતસ્ય જાગરણલક્ષણસ્યાભાવાજ્જાગ્રન્ન વિદ્યતે । સત્યપિ બોધે જાયમાનો બ્રહ્મવિત્ત્વાભિમાનાદિભિર્ભોગાર્થાપાદિતકામાદિભિશ્ચ ધીદોષો વાસના ; વૃત્તિરાહિત્યેન તદ્દોષાભાવાન્નિર્વા-સનત્વમ્ ।
વસિષ્ઠઃ - “રાગદ્વેષભયાદીનામનુરૂપં ચરન્નપિ ।
યોઽન્તર્વ્યોમવદત્યચ્છઃ સ જીવન્મુક્ત ઉચ્યતે” ॥ ૯૩॥ - (તત્રૈવ ૫.૯૩) ॥

રાગાનુરૂપં ભોજનાદિપ્રવૃત્તિઃ । દ્વેષાનુરૂપં બૌદ્ધકાપાલિકાદિભ્યો વિમુખત્વમ્ । ભયાનુરૂપં સર્પવ્યાઘ્રાદિભ્યોઽપસર્પણમ્ । આદિશબ્દેન માત્સર્યાનુરૂપમિતરયોગિભ્ય આધિક્યેન સમાધ્યનુષ્ઠાનમ્ । સત્યપિ વ્યુત્થાનદશાયામીદૃશ આચરણે પૂર્વાભ્યાસેન પ્રાપિતે વિશ્રાન્તચિત્તસ્ય કાલુષ્યરહિતત્વા-દત્યચ્છત્વમ્ । યથા વ્યોમ્નિ ધૂમધૂલિમેઘાદિયુક્તેઽપિ નિર્લેપસ્વભાવત્વાદતિશયેન સ્વચ્છત્વં તદ્વત્ ।
વસિષ્ઠઃ-
“યસ્ય નાહઙ્કૃતો ભાવો બુદ્ધિર્યસ્ય ન લિપ્યતે ।
કુર્વતોઽકુર્વતો વાપિ સ જીવન્મુક્ત ઉચ્યતે” ॥ ૯૪॥ - (તત્રૈવ ૫.૯૪) ॥

પૂર્વાર્ધં વિદ્વત્સંન્યાસપ્રસ્તાવે વ્યાખ્યાતમ્ । લોકે બદ્ધસ્ય પુરુષસ્ય શાસ્ત્રીયં કર્મ કુર્વતઃ “અહં કર્તા” ઇતિ ચિદાત્માહઙ્કૃતો ભવતિ, “ભાવિ સ્વર્ગં પ્રાપ્સ્યામિ” ઇતિ હર્ષેણ બુદ્ધિર્લિપ્યતે । અકુર્વતસ્તુ “ત્યક્તવાનસ્મિ”

ઇત્યહઙ્કૃતત્વમ્, સ્વર્ગાલાભવિષાદો લેપઃ । એવં પ્રતિષિદ્ધકર્મણિ લૌકિકકર્મણિ ચ યથાસમ્ભવં યોજનીયમ્ । જીવન્મુક્તસ્ય તુ તાદાત્મ્યાધ્યાસાભાવાદ્ધર્ષાદ્યભાવાચ્ચ ન દોષદ્વયમ્ ।
વસિષ્ઠઃ - "યસ્માન્નોદ્વિજતે લોકો લોકાન્નોદ્વિજતે ચ યઃ ।
હર્ષામર્ષભયાન્મુક્તઃ સ જીવન્મુક્ત ઉચ્યતે" ॥ ૯૫॥ - (તત્રૈવ ૫.૯૫) ॥

અધિક્ષેપતાડનાદાવપ્રવૃત્તત્વાદેતસ્માલ્લોકો નોદ્વિજતે । અત એવૈતસ્મિલ્લૌઁકસ્યાપ્યધિક્ષેપાદ્યપ્રવૃત્તેઃ, કસ્યચિદ્ દુષ્ટસ્ય તત્પ્રવૃત્તાવપ્યેતચ્ચિત્તે તાદૃશવિકલ્પાનુદયાચ્ચાયમપિ નોદ્વિજતે ।
વસિષ્ઠઃ - "શાન્તસંસારકલનઃ કલાવાનપિ નિષ્કલઃ ।
યઃ સચિત્તોઽપિ નિશ્ચિત્તઃ સ જીવન્મુક્ત ઉચ્યતે" ॥ ૯૬॥ - (તત્રૈવ ૫.૯૬) ॥

શત્રુમિત્રમાનાવમાનાદિવિકલ્પાઃ સંસારકલનાઃ શાન્તા યસ્ય સઃ । ચતુઃષષ્ટિર્વિદ્યા કલાઃ, તત્સદ્ભાવેઽપિ તદભિમાનવ્યવહારયોરભાવાન્નિષ્કલત્વમ્ । ચિત્તસ્ય સ્વરૂપેણ સદ્ભાવેઽપિ વૃત્ત્યનુદયાન્નિશ્ચિત્તત્વમ્ । "સચિન્તોઽપિ નિશ્ચિન્તઃ" ઇતિ પાઠે વાસનાવશાદાત્મધ્યાનવૃત્તિસદ્ભાવેઽપિ લૌકિકવૃત્ત્યભાવા-ન્નિશ્ચિન્તત્વમ્ ।
વસિષ્ઠઃ -
"યઃ સમસ્તાર્થજાતેષુ વ્યવહાર્યપિ શીતલઃ ।
પરાર્થેષ્વિવ પૂર્ણાત્મા સ જીવન્મુક્ત ઉચ્યતે" ॥ ૯૭॥ - (તત્રૈવ ૫.૯૭) ॥

પરગૃહે વિવાહોત્સવાદૌ સ્વયં ગત્વા તત્પ્રીત્યૈ તદીયકાર્યેષુ વ્યવહરન્નપિ લાભાલાભયોર્હર્ષવિષાદરૂપં બુદ્ધિસન્તાપં ન પ્રાપ્નોતિ યથા, એવમયં મુક્તઃ સ્વકાર્યેઽપિ શીતલઃ । ન કેવલં સન્તાપાભાવાચ્છીતલત્વં કિં તુ પૂર્ણસ્વરૂપાનુસન્ધાનાદપિ । ઇતિ જીવન્મુક્તલક્ષણમ્ ॥ ૪॥

અથ વિદેહમુક્તલક્ષણમ્-
"જીવન્મુક્તપદં ત્યક્ત્વા સ્વદેહે કાલસાત્કૃતે ।
વિશત્યદેહમુક્તત્વં પવનોઽસ્પન્દતામિવ ॥ ૯૮॥ - (તત્રૈવ ૫.૯૮) ॥

યથા વાયુઃ કદાચિચ્ચલનં ત્યક્ત્વા નિશ્ચલરૂપેણાવતિષ્ઠતે, તથા મુક્તાત્માપ્યુપાધિકૃતં સંસારં ત્યક્ત્વા સ્વરૂપેણાવતિષ્ઠતે ।
"વિદેહમુક્તો નોદેતિ નાસ્તમેતિ ન શામ્યતિ ।
ન સન્નાસન્ન દૂરસ્થો ન ચાહં ન ચ નેતરઃ" ॥ ૯૯॥ - (તત્રૈવ ૫.૯૯) ॥

ઉદયાસ્તમયૌ હર્ષવિષાદૌ । ન શામ્યતિ ન ચ તત્પરિત્યાગી, લિઙ્ગદેહસ્યાત્રૈવ લીનત્વાત્ । સદ્વાચ્યો જગદ્ધેતુરવિદ્યામાયોપાધિર્ન પ્રાજ્ઞેશ્વરઃ, અસદ્વાચ્યો નાપિ ભૂતભૌતિકઃ । ન દૂરસ્થ ઇત્યુક્ત્યા ન માયાતીતઃ । ન ચેત્યુક્ત્યા સ્થૂલભુક્સમીપસ્થોઽપિ નિષિધ્યતે । અહં ન ચેતિ ન સમષ્ટિશ્ચ । નેતર ઇતિ ન વ્યષ્ટિશ્ચ । વ્યવહારયોગ્યો વિકલ્પઃ કોઽપિ નાસ્તીત્યર્થઃ ।
"તતઃ સ્તિમિતગમ્ભીરં ન તેજો ન તમસ્તતમ્ ।

અનાખ્યમનભિવ્યક્તં સત્કિઞ્ચિદવશિષ્યતે" ॥ ૧૦૦॥ - (તત્રૈવ ૫.૧૦૦) ॥

એવંવિધયા વિદેહમુક્ત્યા સાદૃશ્યોક્તેર્જીવન્મુક્તાવપિ યાવદ્યાવન્નિર્વિકલ્પાતિશયસ્તાવત્તાવદુત્તમત્વં દ્રષ્ટવ્યમ્ ॥

ભગવદ્ગીતાસુ દ્વિતીયાધ્યાયે સ્થિતપ્રજ્ઞઃ પઠ્યતે-
અર્જુન ઉવાચ-
"સ્થિતપ્રજ્ઞસ્ય કા ભાષા સમાધિસ્થસ્ય કેશવ ।
સ્થિતધીઃ કિં પ્રભાષેત કિમાસીત વ્રજેત કિમ્" ॥ ૫૪॥

પ્રજ્ઞા તત્ત્વજ્ઞાનમ્ । તદ્ દ્વિવિધં સ્થિતમસ્થિતં ચેતિ । યથા જારેઽનુરક્તાયા નાર્યાઃ સર્વેષ્વપિ વ્યવહારેષુ બુદ્ધિર્જારમેવ ધ્યાયતિ, પ્રમાણપ્રમિતાનિ ક્રિયમાણાન્યપિ ગૃહકર્માણ સદ્ય એવ વિસ્મર્યન્તે, તથા પરવૈરાગ્યોપેતસ્ય યોગાભ્યાસપાટવેનાત્યન્તવશીકૃતચિત્તસ્યોત્પન્ને તત્ત્વજ્ઞાને બુદ્ધિર્જારમિવ નૈરન્તર્યેણ તત્ત્વં ધ્યાયતિ ; તદિદં સ્થિતં પ્રજ્ઞાનમ્ । ઉક્તગુણરહિતસ્ય કેનાપિ પુણ્યવિશેષેણ કદાચિદુત્પન્નેઽપિ તત્ત્વજ્ઞાને ગૃહકર્મવત્તત્રૈવ તત્ત્વં વિસ્મર્યતે; તદિદમસ્થિતં પ્રજ્ઞાનમ્ ।
એતદેવાભિપ્રેત્ય વસિષ્ઠ આહ-
"પરવ્યસનિની નારી વ્યગ્રાપિ ગૃહકર્મણિ ।
તદેવાસ્વાદયત્યન્તઃ પરસઙ્ગરસાયનમ્ ॥ ૫૮॥

એવં તત્ત્વે પરે શુદ્ધે ધીરો વિશ્રાન્તિમાગતઃ ।
તદેવાસ્વાદયત્યન્તર્બહિર્વ્યવહરન્નપિ" ॥ ૫૯॥ - (લઘુયોગવાસિષ્ઠે ૨૭.૫૮, ૫૯) ઇતિ ॥

તત્ર સ્થિતપ્રજ્ઞઃ કાલભેદાદ્ દ્વિવિધઃ, સમાહિતો વ્યુત્થિતશ્ચ । તયોરુભયોર્લક્ષણં પૂર્વોત્તરાભ્યામર્ધાભ્યાં પૃચ્છતિ - સમાધિસ્થસ્ય સ્થિતપ્રજ્ઞસ્ય કા ભાષા ? કીદૃશૈર્લક્ષણવાચકૈઃ શબ્દૈઃ સર્વૈરયં ભાષ્યતે ? વ્યુત્થિતઃ સ્થિતપ્રજ્ઞઃ કીદૃશં વાગ્વ્યવહારં કરોતિ ? તસ્યોપવેશનગમને મન્દેભ્યો વિલક્ષણે કીદૃશે ?
શ્રીભગવાનુવાચ-
પ્રજહાતિ યા કામાન્ સર્વાન્ પાર્થ મનોગતાન્ ।
આત્મન્યેવાત્મના તુષ્ટઃ સ્થિતપ્રજ્ઞસ્તદોચ્યતે" ॥ ૫૫॥ - (શ્રીમદ્ભગવદ્ગીતાયાં ૨.૫૫) ॥

કામાસ્ત્રિવિધાઃ, બાહ્યા આન્તરા વાસનામાત્રરૂપાશ્ચેતિ । ઉપાર્જિતમોદકાદયો બાહ્યાઃ, આશામોદકાદય આન્તરાઃ, પથિપતિતતૃણાદિવદાપાતતઃ પ્રતીતા વાસનારૂપાશ્ચ । સમાહિતોઽશેષધીવૃત્તિસઙ્ક્ષયાત્ સર્વાન્ પરિત્યજતિ । અસ્તિ ચાસ્ય મુખપ્રસાદલિઙ્ગગમ્ય સન્તોષઃ । સ ચ ન કામેષુ કિં ત્વાત્મન્યેવ, કામાનાં ત્યક્તત્વાત્, બુદ્ધેઃ પરમાનન્દરૂપેણાત્મતત્ત્વાભિમુખત્વાચ્ચ । ન ચાત્ર સમ્પ્રજ્ઞાતસમાધાવિવાત્માનન્દો
મનોવૃત્ત્યોલ્લિખ્યતે, કિં તુ સ્વપ્રકાશચિદ્રૂપેણાત્મના । સન્તોષશ્ચ ન વૃત્તિરૂપઃ, કિં તુ તત્સંસ્કારરૂપઃ । એવંવિધૈર્લક્ષણવાચકૈઃ શબ્દૈઃ સમાહિતો ભાષ્યતે ।
"દુઃખેષ્વનુદ્વિગ્નમનાઃ સુખેષુ વિગતસ્પૃહઃ ।
વીતરાગભયક્રોધઃ સ્થિતધીર્મુનિરુચ્યતે" ॥ - (તત્રૈવ ૨.૫૬) ॥

દુઃખં રાગાદિનિમિત્તજન્યા રજોગુણવિકારરૂપા સન્તાપાત્મિકા પ્રતિકૂલા ચિત્તવૃત્તિઃ । તાદૃશે દુઃખે પ્રાપ્તે સતિ "અહં પાપઃ, ધિઙ્માં દુરાત્માનમ્" ઇત્યનુતાપાત્મિકા તમોગુણવિકારત્વેન ભ્રાન્તિરૂપા ચિત્તવૃત્તિરુદ્વેગઃ । યદ્યપ્યયં વિવેક ઇવાભાતિ તથાઽપિ પૂર્વસ્મિઞ્જન્મનિ ચેત્તત્પાપપ્રવૃત્તિપ્રતિબન્ધકત્વાત્ "સપ્રયોજનો ભવતિ, ઇદાનીં તુ નિષ્પ્રયોજન ઇતિ ભ્રાન્તિત્વં દ્રષ્ટવ્યમ્ । સુખં રાજ્યપુત્રલાભાદિનિમિત્તજન્યા સાત્ત્વિકી પ્રીતિરૂપાનુકૂલા ચિત્તવૃત્તિઃ । તસ્મિન્સુખે સત્યાગામિનસ્તાદૃશસ્ય સુખસ્ય કારણં પુણ્યમનનુષ્ઠાય વૃથૈવ તદપેક્ષા તામસી ચિત્તવૃત્તિઃ સ્પૃહા । તત્ર ચ સુખદુઃખયોઃ પ્રારબ્ધકર્મપ્રાપિતત્વાદ્વ્યુત્થિતચિત્તસ્ય
વૃત્તિસમ્ભવાચ્ચ તદુભયમુપપદ્યતે । ઉદ્વેગસ્પૃહે તુ ન વિવેકિનઃ સમ્ભવતઃ । તથા રાગભયક્રોધાશ્ચ તામસત્વેન કર્મણા પ્રાપિતત્વાભાવાન્નાસ્ય વિદ્યન્તે । એવંલક્ષણલક્ષિતઃ સ્વાનુભવપ્રકટેન શિષ્યશિક્ષાર્થમનુદ્વેગનિઃસ્પૃ-હત્વાદિગમકં વચો ભાષત ઇત્યર્થઃ ।

"યઃ સર્વત્રાનભિસ્નેહસ્તત્તત્પ્રાપ્ય શુભાશુભમ્ ।
નાભિનન્દતિ ન દ્વેષ્ટિ તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા "। - (તત્રૈવ ૨.૫૭) ॥

યસ્મિન્સત્યન્યદીયે હાનિવૃદ્ધી સ્વસ્મિન્નારોપ્યેતે તાદૃશોઽન્યવિષયસ્તામસવૃત્તિવિશેષઃ સ્નેહઃ । સુખહેતુઃ સ્વકલત્રાદિઃ શુભો વિષયઃ । તદ્ગુણકથનાદિપ્રવર્તિકા ધીવૃત્તિરભિનન્દઃ । અત્ર ગુણકથનસ્ય પરપ્રરોચનાર્થત્વાભાવેનવ્યર્થત્વાત્તદ્ધે । અસૂયોત્પાદનેન દુઃખહેતુઃ પરકીયવિદ્યાદિરેનં પ્રત્યશુભો વિષયઃ । તન્નિન્દાપ્રવર્તિકા ધીવૃત્તિદ્વેષઃ । સોઽપિ તામસઃ, તન્નિન્દાયા નિવારણાર્થત્વાભાવેન વ્યર્થત્વાત્ । ત એતે તામસા ધર્માઃ કથં વિવેકિનિ સમ્ભવેયુઃ ?

"યદા સંહરતે ચાયં કૂર્મોઽઙ્ગાનીવ સર્વશઃ ।
ઇન્દ્રિયાણીન્દ્રિયાર્થેભ્યસ્તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા" ॥ ૨.૫૮॥ - (તત્રૈવ ૨.૫૮) ॥

વ્યુત્થિતસ્ય સમસ્તતામસવૃત્ત્યભાવઃ પૂર્વશ્લોકાભ્યામભિહિતઃ । સમાહિતસ્ય તુ વૃત્તય એવ ન સન્તિ કુતસ્તામસત્વશઙ્કેત્યભિપ્રાયઃ ।

"વિષયા વિનિવર્તન્તે નિરાહારસ્ય દેહિનઃ ।
રસવર્જં રસોઽપ્યસ્ય પરં દૃષ્ટ્વા નિવર્તતે" ॥ ૫૯॥ - (તત્રૈવ ૨.૫૯) ॥

પ્રારબ્ધં કર્મ સુખદુઃખહેતૂન્કાંશ્ચિદ્વિષયાંશ્ચન્દ્રોદયાન્ધકારાદિરૂપાન્ સ્વયમેવ સમ્પાદયતિ, અન્યાંસ્તુ ગૃહક્ષેત્રાદીન્ પુરુષોદ્યોગદ્વારેણ । તત્ર ચન્દ્રોદયાદયઃ પૂર્ણેનેન્દ્રિયાદિસંહારલક્ષણેન સમાધિનૈવ નિવર્તન્તે, નાન્યથા । ગૃહાદયસ્તુ સમાધિમન્તરેણાપિ નિવર્તન્તે । આહરણમાહાર ઉદ્યોગઃ । નિરુદ્યોગસ્ય ગૃહાદિવિષયા નિવર્તન્તે, રસસ્તુ ન નિવર્તતે । રસો માનસી તૃષ્ણા । સાપિ પરમાનન્દરૂપસ્ય પરસ્ય બ્રહ્મણો દર્શને સતિ સ્વલ્પાનન્દહેતુભ્યો નિવર્તતે, "કિં પ્રજયા કરિષ્યામો યેષાં નોઽયમાત્માઽયં લોકઃ" (બૃહદારણ્યકે ઉપનિષદિ ૪.૪.૨૨) ઇતિ શ્રુતેઃ ।

"યતતો હ્યપિ કૌન્તેય પુરુષસ્ય વિપશ્ચિતઃ ।
ઇન્દ્રિયાણિ પ્રમાથીનિ હરન્તિ પ્રસભં મનઃ ॥ ૬૦॥

તાનિ સર્વાણિ સંયમ્ય યુક્ત આસીત મત્પરઃ ।
વશે હિ યસ્યેન્દ્રિયાણિ તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા" ॥ ૬૧॥ - (તત્રૈવ ૨.૬૦, ૬૧) ॥

ઉદ્યોગત્યાગબ્રહ્મદર્શનપ્રયત્નં કુર્વતોઽપિ કદાચિત્કપ્રમાદપરિહારાય સમાધ્યભ્યાસઃ ।
તદેતત્કિમાસીતેતિપ્રશ્નોત્તરમ્ ।
“ધ્યાયતો વિષયાન્પુંસઃ સઙ્ગસ્તેષૂપજાયતે ।
સઙ્ગાત્સઞ્જાયતે કામઃ કામાત્ક્રોધોઽભિજાયતે” ॥ ૬૨॥

“ક્રોધાદ્ભવતિ સમ્મોહઃ સમ્મોહાત્સ્મૃતિવિભ્રમઃ ।
સ્મૃતિભ્રંશાદ્બુદ્ધિનાશો બુદ્ધિનાશાત્પ્રણશ્યતિ” ॥ ૬૩॥ - (તત્રૈવ ૨.૬૨, ૬૩) ॥

અસતિ સમાધ્યભ્યાસે પ્રમાદપ્રકાર ઉપન્યસ્તઃ । સઙ્ગો ધ્યેયવિષયસન્નિધિઃ, સમ્મોહો વિવેકપરાઙ્મુખત્વમ્, સ્મૃતિવિભ્રમસ્તત્ત્વાનસન્ધાનાભાવઃ, બુદ્ધિનાશો વિપરીતભાવનોપચયદોષેણ પ્રતિબદ્ધસ્ય જ્ઞાનસ્ય મોક્ષપ્રદત્વસામર્થ્યાભાવઃ ।
“રાગદ્વેષવિયુક્તૈસ્તુ વિષયાનિન્દ્રિયૈશ્ચરન્ ।
આત્મવશ્યૈર્વિધેયાત્મા પ્રસાદમધિગચ્છતિ” ॥ ૬૪॥ - (તત્રૈવ ૨.૬૪) ॥

વિધેયાત્મત્વં વશીકૃતમનસ્ત્વમ્ । પ્રસાદો નૈર્મલ્યં બન્ધરાહિત્યમ્ । સમાધ્યભ્યાસયુક્તસ્તદ્વાસનાબલાદ્ વ્યુત્થાનદશાયામિન્દ્રિયૈર્વ્યવહરન્નપિ પ્રસાદં સમ્યક્પ્રાપ્નોતિ । તદેતત્કિં વ્રજેતેતિપ્રશ્નોત્તરમ્ । ઉપરિતનેનાપિ બહુના ગ્રન્થેન સ્થિતપ્રજ્ઞઃ પ્રપઞ્ચિતઃ ।
નનુ પ્રજ્ઞાયાઃ સ્થિત્યુત્પત્તિભ્યાં પ્રાગપિ સાધનત્વેન રાગદ્વેષાદિરાહિત્યમપેક્ષિતમ્ ।
બાઢમ્; તથાપ્યસ્તિ વિશેષઃ, સ ચ શ્રેયોમાર્ગકારૈર્દર્શિતઃ-
“વિદ્યાસ્થિતયે પ્રાગ્યે સાધનભૂતાઃ પ્રયત્નનિષ્પાદ્યાઃ ।
લક્ષણભૂતાસ્તુ પુનઃ સ્વભાવતસ્તે સ્થિતાઃ સ્થિતપ્રજ્ઞે ॥

જીવન્મુક્તિરિતીમાં વદન્ત્યવસ્થાં સ્થિતાત્મસમ્બોધામ્ ।
બાધિતભેદપ્રતિભામબાધિતાત્માવબોધસામર્થ્યાત્” ॥ ઇતિ ।
ભગવદ્ભક્તો દ્વાદશાધ્યાયે ભગવતા વર્ણિતઃ -
“અદ્વેષ્ટા સર્વભૂતાનાં મૈત્રઃ કરુણ એવ ચ ।
નિર્મમો નિરહઙ્કારઃ સમદુઃખસુખઃ ક્ષમી ॥ ૧૩॥

સન્તુષ્ટઃ સતતં યોગી યતાત્મા દૃઢનિશ્ચયઃ ।
મય્યર્પિતમનોબુદ્ધિર્યો મદ્ભક્તઃ સ મે પ્રિયઃ” ॥ ૧૪॥ - (શ્રીમદ્ભગવદ્ગીતાયાં ૧૨.૧૩, ૧૪) ॥

ઈશ્વરાર્પિતમનસ્ત્વેન સમાહિતસ્યાન્યાનુસન્ધાનાભાવાત્, વ્યુત્થિતસ્યાપ્યુદાસીનાનુસન્ધાનેન હર્ષવિષાદા-ભાવાચ્ચ સુખદુઃખસામ્યમ્ । એવં વક્ષ્યમાણેષ્વપિ દ્વન્દ્વેષુ દ્રષ્ટવ્યમ્ ।
“યસ્માન્નોદ્વિજતે લોકો લોકાન્નોદ્વિજતે ચ યઃ ।
હર્ષામર્ષભયોદ્વેગૈર્મુક્તો યઃ સ ચ મે પ્રિયઃ ॥ ૧૫॥

“અનપેક્ષઃ શુચિર્દક્ષ ઉદાસીનો ગતવ્યથઃ ।

સર્વારમ્ભપરિત્યાગી યો મદ્ભક્તઃ સ મે પ્રિયઃ ॥ ૧૬॥

“યો ન હૃષ્યતિ ન દ્વેષ્ટિ ન શોચતિ ન કાઙ્ક્ષતિ ।
શુભાશુભપરિત્યાગી ભક્તિમાન્યઃ સ મે પ્રિયઃ ॥ ૧૭॥

સમઃ શત્રૌ ચ મિત્રે ચ તથા માનાપમાનયોઃ ।
શીતોષ્ણસુખદુઃખેષુ સમઃ સઙ્ગવિવર્જિતઃ ॥ ૧૮॥

તુલ્યનિન્દાસ્તુતિર્મૌની સન્તુષ્ટો યેન કેનચિત્ ।
અનિકેતઃસ્થિરમતિર્ભક્તિમાન્ મે પ્રિયો નરઃ” ॥ ૧૯॥ ઇતિ ।
અત્રાપિ પૂર્વવદ્વિશેષો વાર્ત્તિકકારૈર્દર્શિતઃ-
“ઉત્પન્નાત્મપ્રબોધસ્ય હ્યદ્વેષ્ટૃત્વાદયો ગુણાઃ ।
અયત્નતો ભવન્ત્યસ્ય ન તુ સાધનરૂપિણઃ” ॥ - (નૈષ્કર્મ્યસિદ્ધૌ ૪.૬૯) ઇતિ ॥

ગુણાતીતશ્ચતુર્દશાધ્યાયે વર્ણિતઃ-
અર્જુન ઉવાચ ।
“કૈર્લિઙ્ગૈસ્ત્રીન્ગુણાનેતાનતીતો ભવતિ પ્રભો ।
કિમાચારઃ કથં ચૈતાંસ્ત્રીન્ગુણાનતિવર્તતે “॥ ૨૧॥ - (શ્રીમદ્ભગવદ્ગીતાયાં ૧૪.૨૧) ॥

ત્રયો ગુણાઃ સત્ત્વરજસ્તમાંસિ ; તેષાં પરિણામવિશેષાત્સર્વઃ સંસારઃ પ્રવર્તતે; અતો ગુણાતીતત્વમસંસારિત્વમ્; જીવન્મુક્ત્વમિતિ યાવત્ । લિઙ્ગાનિ પરેષામેતદીયગુણાતીતત્વબોધકાનિ । આચાર આચરણમ્, તદીયમનઃ સઞ્ચારપ્રકારઃ । કથમિતિ સાધનપ્રકારપ્રશ્નઃ ।
શ્રીભગવાનુવાચ ।
“પ્રકાશં ચ પ્રવૃત્તિં ચ મોહમેવ ચ પાણ્ડવ ।
ન દ્વેષ્ટિ સમ્પ્રવૃત્તાનિ ન નિવૃત્તાનિ કાઙ્ક્ષતિ ॥ ૨૨॥

ઉદાસીનવદાસીનો ગુણૈર્યો ન વિચાલ્યતે ।
ગુણા વર્તન્ત ઇત્યેવ યોઽવતિષ્ઠતિ નેઙ્ગતે ॥ ૨૩॥

સમદુઃખસુખઃ સ્વસ્થઃ સમલોષ્ટાશ્મકાઞ્ચનઃ ।
તુલ્યપ્રિયાપ્રિયો ધીરસ્તુલ્યનિન્દાત્મસંસ્તુતિઃ ॥ ૨૪॥

માનાપમાનયોસ્તુલ્યસ્તુલ્યો મિત્રારિપક્ષયોઃ ।
સર્વારમ્ભપરિત્યાગી ગુણાતીતઃ સ ઉચ્યતે ॥ ૨૫॥

માં ચ યોઽવ્યભિચારેણ ભક્તિયોગેન સેવતે ।
સગુણાન્સમતીત્યૈતાન્બ્રહ્મભૂયાય કલ્પતે” ॥ ૨૬॥ - (તત્રૈવ ૧૪.૨૬) ॥

પ્રકાશપ્રવૃત્તિમોહાઃ સત્ત્વરજસ્તમોગુણાઃ । તે ચ જાગ્રત્સ્વપ્નયોઃ પ્રવર્તન્તે ; સુષુપ્તિસમાધિશૂન્યચિત્તવૃત્તિ-ત્વાવસ્થાસુ નિવર્તન્તે । પ્રવૃત્તિશ્ચ દ્વિવિધા, અનુકૂલા પ્રતિકૂલા ચેતિ । તત્ર મૂઢો જાગરણે પ્રતિકૂલપ્રવૃત્તિં દ્વેષ્ટિ, અનુકૂલપ્રવૃત્તિમાકાઙ્ક્ષતિ । ગુણાતીતસ્ય ત્વનુકૂલપ્રતિકૂલાધ્યાસાભાવાદ્ દ્વેષાકાઙ્ક્ષે ન સ્તઃ । યથા દ્વયોઃ કલહં કુર્વતોરવલોકયિતા કશ્ચિત્તટસ્થઃ સ્વયં કેવલમુદાસ્તે, ન તુ જયપરાજયાભ્યામિ-તસ્તતશ્ચાલ્યતે, તથા ગુણાતીતો વિવેકી સ્વયમુદાસ્તે । ગુણા ગુણેષુ વર્તન્તે, ન ત્વહમિતિવિવેકાદૌદા-સીન્યમ્ । અહમેવ કરોમીત્યધ્યાસો વિચલનમ્, ન ચાસ્ય તદસ્તિ । તદિદં કિમાચાર ઇત્યસ્ય પ્રશ્નસ્યોત્તરમ્ । સમદુઃખસુખાદીનિ લિઙ્ગાન્યવ્યભિચારિભક્તિસહિતજ્ઞાનધ્યાનાભ્યાસેન પરમાત્મસેવા ચેતિ ગુણાત્યય-સાધનપ્રશ્નસ્યોત્તરમ્ ॥

બ્રાહ્મણો વ્યાસાદિભિર્વર્ણિતઃ
"અનુત્તરીયવસનમનુપસ્તીર્ણશાયિનમ્ ।
બાહૂપધાયિનં શાન્તં તં દેવા બ્રાહ્મણં વિદુઃ" ॥ - (મહાભારતે શાન્તિપર્વણિમોક્ષધર્મે ૨૬૧.૨૯) ॥

બ્રાહ્મણશબ્દો બ્રહ્મવિદ્વાચીતિ "અથ બ્રાહ્મણઃ" ઇતિ શ્રુત્યા વર્ણિતમ્, બ્રહ્મવિદશ્ચ વિદ્વત્સંન્યાસાધિકારાત્। "યથાજાતરૂપધરો" (જાબાલોપનિષદિ ૬) , "નાચ્છાદનં ચરતિ પરમહંસઃ" (પરમહંસોપનિષદિ ૧ -૨) ઇત્યાદિ શ્રુત્યા પરિગ્રહરાહિત્યસ્ય મુખ્યત્વાભિધાનાદનુત્તરીયત્વાદિકં તસ્ય યુક્તમ્ ।
"યેન કેનચિદાચ્છન્નો યેન કેનચિદાશિતઃ ।
યત્રક્વચનશાયી સ્યાત્તં દેવા બ્રાહ્મણં વિદુઃ" ॥ - (મહાભારતે ૫.૯૭.૧૪) ॥

દેહનિર્વાહાયાશનાચ્છાદનશયનસ્થાનાપેક્ષાયામપ્યશનાદિગતૌ ગુણદોષૌ નાન્વિષ્યેતે, ઉદરપૂરણપુષ્ટ્યાદિ-રૂપસ્ય નિર્વાહસ્ય સમત્વાન્નિષ્પ્રયોજનસ્ય ગુણદોષવિચારસ્ય ચિત્તદોષત્વાત્ ।
અત એવ ભાગવતે પઠ્યતે -
"કિં વર્ણિતેન બહુના લક્ષણં ગુણદોષયોઃ ।
ગુણદોષદૃશિર્દોષો ગુણસ્તૂભયવર્જિતઃ" ॥ ઇતિ । - (શ્રીમદ્ભાગવતે ૧૧.૧૯.૪૫) ॥

"કન્થાકૌપીનવાસાસ્તુ દણ્ડધૃગ્ધ્યાનતત્પરઃ ।
એકાકી રમતે નિત્યં તં દેવા બ્રાહ્મણં વિદુઃ" ॥ - (વિશ્વેશ્વરકૃતે યતિધર્મસઙ્ગ્રહે પૃ૦ ૩૭) ॥

બ્રહ્મોપદેશાદિના પ્રાણ્યનુજિઘૃક્ષાયામુત્તમત્ત્વજ્ઞાપનેન શ્રદ્ધામુત્પાદયિતું દણ્ડકૌપીનાદિલિઙ્ગં ધારયેત્, "કૌપીનં દણ્ડમાચ્છાદનં ચ સ્વશરીરોપભોગાર્થાય લોકોપકારાર્થાય ચ પરિગ્રહેત્" (પરમ૦ ઉપ૦ .૧) ઇતિ શ્રુતેઃ । અનુજિઘૃક્ષયાપિ સ્વયં તદીયાં ગૃહકૃત્યાદિવાર્તાં ન કુર્યાત્, કિં તુ ધ્યાનપરો ભવેત્ । "તમેવૈકં
જાનથ આત્માનમન્યા વાચો વિમુઞ્ચથ (મુણ્ડકોપનિષદિ ૨.૨.૫) "ઇતિ શ્રુતેઃ,
"તમેવ ધીરો વિજ્ઞાય પ્રજ્ઞાં કુર્વીત બ્રાહ્મણઃ ।
નાનુધ્યાયાદ્ બહૂઞ્શબ્દાન્વાચો વિગ્લાપનં હિ તત્" ॥ - (બૃહદારણ્યકે ઉપ૦ .૪.૪.૨૧) ॥

ઇતિ શ્રુતેશ્ચ ।

બ્રહ્મોપદેશસ્ત્વન્યા વાઙ્ ન ભવતીતિ ન ધ્યાનવિરોધી । તચ્ચ ધ્યાનમેકાકિત્વે નિર્વિઘ્નં ભવતિ અત એવ સ્મૃત્યન્તરેઽભિહિતં -
“એકો ભિક્ષુર્યથોક્તઃ સ્યાદ્વાવેવ મિથુનં સ્મૃતમ્ ।
ત્રયો ગ્રામઃ સમાખ્યાત ઊર્ધ્વં તુ નગરાયતે ॥

નગરં હિ કર્તવ્યં ગ્રામો વા મિથુનં તથા ।
રાજાદિવાર્તા તેષાં સ્યાદ્ભિક્ષાવાર્તા પરસ્પરમ્” ॥ ઇતિ । - (દક્ષસ્મૃતૌ ૭.૩૫-૩૭) ॥

“નિરાશિષમનારમ્ભં નિર્નમસ્કારમસ્તુતિમ્ ।
અક્ષીણં ક્ષીણકર્માણં તં દેવા બ્રાહ્મણં વિદુઃ” ॥ - (મહાભારતે મોક્ષધર્મપર્વણિ ૨૩૭.૨૪) ॥

વિશિષ્ટૈઃ સંસારિભિઃ પ્રણમતાં પુરુષાણામાશીર્વાદઃ પ્રયુજ્યતે । યસ્ય યદપેક્ષિતં તં તં પ્રતિ તદભિવૃદ્ધિ-પ્રાર્થનમાશીઃ । તથા ચ પુરુષાણાં ભિન્નરુચિત્વાત્ તદભિમતાન્વેષણે વ્યગ્રચિત્તસ્ય લોકવાસના વર્ધતે । સા ચ જ્ઞાનવિરોધિની । તથા ચ સ્મૃત્યન્તરં -
“લોકવાસનયા જન્તોઃ શાસ્ત્રવાસનયાપિ ચ ।
દેહવાસનયા જ્ઞાનં યથાવન્નૈવ જાયતે” ॥

(મુક્તિકોપનિષદિ ૨.૨; સૂતસંહિતાયાં યજ્ઞવૈભવખણ્ડે પૂર્વાર્ધે ૧૪.૧૫; વિવેકચૂડ઼ામણૌ ૨૦૨) ॥

એતચ્ચારમ્ભનમસ્કારાદિષ્વપિ દ્રષ્ટવ્યમ્ । આરમ્ભઃ સ્વાર્થં પરોપકારાર્થં વા ગૃહક્ષેત્રાદિસમ્પાદનપ્રયત્નઃ । તાવેતાવાશીર્વાદારમ્ભૌ મુક્તેન ત્યાજ્યૌ । ન ચાશીર્વાદાભાવે પ્રણમતાં નૃણાં ખેદઃ શઙ્કનીયઃ, લોકવાસનાખેદયોરુભયોઃ પરિહારાય નિખિલાશીર્વાદપ્રતિનિધિત્વેન નારાયણશબ્દપ્રયોગાત્ । આરમ્ભસ્તુ સર્વોઽપિ દુષ્ટ એવ । તથા ચ સ્મૃતિઃ-
“સર્વારમ્ભા હિ દોષેણ ધૂમેનાગ્નિરિવાવૃતાઃ” । - (શ્રીમદ્ભગવદ્ગીતાયાં ૧૮.૪૮) ઇતિ ॥

નમસ્કારોઽપિ વિવિદિષાસંન્યાસિનોઽભિહિતઃ -
“યો ભવેત્પૂર્વસંન્યાસી તુલ્યો વૈ ધર્મતો યદિ ।
તસ્મૈ પ્રણામઃ કર્તવ્યો નેતરાય કદાચન” ॥ - (યાજ્ઞવલ્ક્ય ઉપ૦ .૧) ઇતિ ॥

તત્ર પૂર્વત્વધર્મતુલ્યત્વવિચારે ચિત્તં વિક્ષિપ્યતે । અત એવ નમસ્કારમાત્ર એવ બહવઃ કલહાયમાના ઉપલભ્યન્તે । તત્ર નિમિત્તં વાર્ત્તિકકારૈર્દર્શિતં -
“પ્રમાદિનો બહિશ્ચિત્તાઃ પિશુનાઃ કલહોત્સુકાઃ ।
સંન્યાસિનોઽપિ દૃશ્યન્તે દૈવસન્દૂષિતાશયાઃ” ॥ - (બૃહદારણ્યકોપનિષદ્વાર્ત્તિકે ૧.૪.૧૫૮૪) ઇતિ ॥

મુક્તસ્ય નમસ્કારાભાવો ભગવત્પાદૈર્દર્શિતઃ -
“નામાદિભ્યઃ પરે ભૂમ્નિ સ્વારાજ્યે ચેત્ સ્થિતોઽદ્વયે ।
પ્રણમેત્ કં તદાત્મજ્ઞો ન કાર્યં કર્મણા તદા” ॥ - (ઉપદેશસાહસ્યાં ૧૭.૬૪) ઇતિ ॥

ચિત્તકાલુષ્યહેતોર્નમસ્કારસ્ય પ્રતિષેધેઽપિ સર્વસામ્યબુદ્ધ્યા પ્રસાદહેતુર્નમસ્કારોઽભ્યુપેયતે । તથા ચ સ્મૃતિઃ -
“ઈશ્વરો જીવકલયા પ્રવિષ્ટો ભગવાનિતિ ।
પ્રણમેદ્દણ્ડવદ્ભૂમાવશ્વચણ્ડાલગોખરમ્” ॥ - (શ્રીમદ્ભાગવતે ૩.૨૯.૩૪-૨, ૧૧.૨૯.૧૬-૨) ઇતિ ॥

સ્તુતિર્મનુષ્યવિષયા પ્રતિષિધ્યતે, ન ત્વીશ્વરવિષયા । તથા ચ બૃહસ્પતિસ્મૃતિઃ -
“આદરેણ યથા સ્તૌતિ ધનવન્તં ધનેચ્છયા ।
તથા ચેદ્ વિશ્વકર્તારં કો ન મુચ્યેત બન્ધનાત્” ॥ ઇતિ । - (વરાહોપનિષદિ ૩.૧૩ ; ગરુડપુરાણે ૨૨૫.૫૦ ચ ।) ॥

અક્ષીણત્વમદીનત્વમ્। અત એવ સ્મૃતિઃ-
“અલબ્ધ્વા ન વિષાદી સ્યાત્કાલે યદ્યશનં ક્વચિત્ ।
લબ્ધ્વા ન હૃષ્યેદ્ધૃતિમાનુભયં દૈવતન્ત્રિતમ્” ॥ ઇતિ ।
ક્ષીણકર્મત્વં વિધિનિષેધાનધીનત્વં “નિસ્ત્રૈગુણ્યે પથિ વિચરતાં કો વિધિઃ કો નિષેધઃ” (શુકાષ્ટકઃ) ઇતિ સ્મરણાત્ ।
એતદેવાભિપ્રેત્ય ભગવતાપ્યુક્તમ્-
“ત્રૈગુણ્યવિષયા વેદા નિસ્ત્રૈગુણ્યો ભવાર્જુન ।
નિર્દ્વન્દ્વો નિત્યસત્ત્વસ્થો નિર્યોગક્ષેમ આત્મવાન્” ॥ - (શ્રીમદ્ભગવદ્ગીતાયાં ૨.૪૫) ઇતિ ॥

નારદઃ-
“સ્મર્તવ્યઃ સતતં વિષ્ણુર્વિસ્મર્તવ્યો ન જાતુચિત્ ।
સર્વે વિધિનિષેધાઃ સ્યુરેતયોરેવ કિઙ્કરાઃ” ॥ - (નારદપાઞ્ચરાત્રે ૪.૨.૨૩) ઇતિ ॥

“અહેરિવ ગણાદ્ભીતઃ સમ્માનાન્મરણાદિવ ।
કુણપાદિવ યઃ સ્ત્રીભ્યસ્તં દેવા બ્રાહ્મણં વિદુઃ” ॥ - (મહાભારતે શાન્તિપર્વણિ મોક્ષ૦ ૨૩૭.૧૩) ॥

“રાજાદિવાર્ત્તા તેષાં સ્યાત્” ઇત્યુક્તત્વાત્ સર્પવદ્ગણાદ્ભીતિરુપપદ્યતે, સમ્માનસ્યાસક્તિકારણતયા પુરુષાર્થવિરોધિત્વાન્મરણવદ્ધેયત્વમ્ । “નરકાદિવ” ઇતિ વા પાઠઃ । અત એવ સ્મૃતિઃ -
“અસમ્માનાત્તપોવૃદ્ધિઃ સમ્માનાત્તુ તપઃ ક્ષયઃ ।
અર્ચિતઃ પૂજિતો વિપ્રો દુગ્ધા ગૌરિવ સીદતિ” ॥ - (પદ્મપુરાણે સૃષ્ટિખણ્ડે ૧૯.૩૪૦) ॥

એતદેવાભિપ્રેત્યાવમાન ઉપાદેયતયા સ્મર્યતે-
“તથા ચરેત વૈ યોગી સતાં ધર્મમનુસ્મરન્ ।
જના યથાવમન્યેરન્ગચ્છેયુર્નૈવ સઙ્ગતિમ્” ॥ - (નારદપરિવ્રાજકોપનિષદિ ૫.૩૦) ઇતિ ॥

સ્ત્રીષુ દ્વિવિધો દોષઃ, પ્રતિષિદ્ધત્વં જુગુપ્સિતત્વં ચેતિ । તત્ર પ્રતિષિદ્ધત્વાત્રં કદાચિદ્રાગાત્ પ્રારબ્ધબલાદુલ્લઙ્ઘ્યતે ।
તદેતદભિપ્રેત્યાહ સ્મૃતિઃ
“માત્રા સ્વસ્રા દુહિત્રા વા નૈકશય્યાસનો ભવેત્ ।

બલવાનિન્દ્રિયગ્રામો વિદ્વાંસમપિ કર્ષતિ" । - (મનુ ૨.૨૧૫) ॥

તથા ચ સ્મૃતિભિર્જુગુપ્સા વર્ણિતા-
"સ્ત્રીણામવાચ્યદેશસ્ય ક્લિન્નનાડીવ્રણસ્ય ચ ।
અભેદેઽપિ મનોભેદાજ્જનઃ પ્રાયેણ વઞ્ચ્યતે" ॥ - (ના। ૫। ઉ૫૦ .૩.૨૯) ॥

"ચર્મખણ્ડં દ્વિધા ભિન્નમપાનોદ્ગારધૂપિતમ્ ।
યદ્રમન્તે નરાસ્તત્ર સાહસં કિમતઃ પરમ્" ॥ - (વિશ્વેશ્વરકૃતે યતિધર્મસઙ્ગ્રહે, પૃ૦ ૯૩) ॥

"યે રમન્તે નરાસ્તત્ર ક્રિમિતુલ્યાઃ કથં ન તે" ઇતિ વા પાઠઃ । અતઃ પ્રતિષેધજુગુપ્સયોરુભયોર્વિવક્ષયા કુણપદૃષ્ટાન્તોઽત્રાભિહિતઃ ।
"યેન પૂર્ણમિવાકાશં ભવત્યેકેન સર્વદા ।
શૂન્યં યસ્ય જનાકીર્ણં તં દેવા બ્રાહ્મણં વિદુઃ" ॥ - (મહાભારતે શાન્તિપર્વણિ મોક્ષધર્મે ૨૩૭.૧૧) ॥

સંસારિણામેકાકિત્વેનાવસ્થાનં ભયાલસ્યાદિહેતુત્વાદ્વર્જ્યમ્ । જનસમૂહશ્ચાતથાવિધત્વાદભ્યુપેયઃ । યોગિનસ્તુ તદ્વિપરીતત્વમ્ । એકાકિત્વે સત્યવિઘ્નેન ધ્યાનાનુવૃત્તૌ પરિપૂર્ણેન પરમાનન્દાત્મના સર્વમાકાશં પૂર્ણમિવાવભાસતે । અતો ભયાલસ્યશોકમોહાદયો ન ભવન્તિ,
"યસ્મિન્સર્વાણિ ભૂતાનિ આત્મૈવાભૂદ્ વિજાનતઃ ।
તત્ર કો મોહઃ કઃ શોક એકત્વમનુપશ્યતઃ" । - (ઈશ। ઉ૫૦ .૭) ઇતિ શ્રુતેઃ ॥

જનાકીર્ણં સ્થાનં રાજવાર્ત્તાદિના ધ્યાનવિરોધિત્વાદાનન્દાત્મપ્રતીતિરહિતં તચ્છૂન્યમિવ ચિત્તં ક્લેશયતિ, જગતો મિથ્યાત્વાદાત્મનઃ પૂર્ણત્વાચ્ચેત્યર્થઃ ।
અતિવર્ણાશ્રમી સૂતસંહિતાયાં મુક્તિખણ્ડે પઞ્ચમાધ્યાયે વિષ્ણુ પ્રતિ પરમેશ્વરેણ વર્ણિતઃ -
"બ્રહ્મચારી ગૃહસ્થશ્ચ વાનપ્રસ્થોઽથ ભિક્ષુકઃ ।
અતિવર્ણાશ્રમી તેઽપિ ક્રમાચ્છ્રેષ્ઠા વિચક્ષણાઃ ॥ ૯ ॥

"અતિવર્ણાશ્રમી પ્રોક્તો ગુરુઃ સર્વાધિકારિણામ્ ।
ન કસ્યાપિ ભવેચ્છિષ્યો યથાહં પુરુષોત્તમ ॥ ૧૪ ॥

"અતિવર્ણાશ્રમી સાક્ષાદ્ ગુરૂણાં ગુરુરુચ્યતે ।
તત્સમો નાધિકશ્ચાસ્મિલ્લોઁકેઽસ્ત્યેવ ન સંશયઃ ॥ ૧૫ ॥

"યઃ શરીરેન્દ્રિયાદિભ્યો વિભિન્નં સર્વસાક્ષિણમ્ ।
પારમાર્થિકવિજ્ઞાનં સુખાત્માનં સ્વયમ્પ્રભમ્ ॥ ૧૬ ॥

પરં તત્ત્વં વિજાનાતિ સોઽતિવર્ણાશ્રમી ભવેત્ ।
"યો વેદાન્તમહાવાક્યશ્રવણેનૈવ કેશવ ॥ ૧૭ ॥

આત્માનમીશ્વરં વેદ સોઽતિવર્ણાશ્રમી ભવેત્ ।

“યો વર્ણાશ્રમનિર્મુક્તમવસ્થાત્રયસાક્ષિણમ્ ॥ ૧૮॥

મહાદેવં વિજાનાતિ સોઽતિવર્ણાશ્રમી ભવેત્ ॥

“વર્ણાશ્રમાદયો દેહે માયયા પરિકલ્પિતાઃ ॥ ૧૯॥

નાત્મનો બોધરૂપસ્ય મમ તે સન્તિ સર્વદા ।
ઇતિ યો વેદ વેદાન્તૈઃ સોઽતિવર્ણાશ્રમી ભવેત્ ॥ ૨૦॥

“આદિત્યસન્નિધૌ લોકશ્ચેષ્ટતે સ્વયમેવ તુ ।
તથા મત્સન્નિધાનેન સમસ્તં ચેષ્ટતે જગત્ ॥ ૨૧॥

ઇતિ યો વેદ વેદાન્તૈઃ સોઽતિવર્ણાશ્રમી ભવેત્ ।
“સુવર્ણે હારકેયૂરકટકસ્વસ્તિકાદયઃ ॥ ૨૨॥

કલ્પિતા માયયા તદ્વજ્જગન્મય્યેવ સર્વદા ।
ઇતિ યો વેદ વેદાન્તૈઃ સોઽતિવર્ણાશ્રમી ભવેત્ ॥ ૨૩॥

શુક્તિકાયાં યથા તારં કલ્પિતં માયયા તથા ।
મહદાદિ જગન્માયામયં મય્યેવ કલ્પિતમ્ ॥ ૨૪॥

ઇતિ યો વેદ વેદાન્તૈઃ સોઽતિવર્ણાશ્રમી ભવેત્ ।
“ચણ્ડાલદેહે પશ્વાદિશરીરે બ્રહ્મવિગ્રહે ॥ ૨૫॥

અન્યેષુ તારતમ્યેન સ્થિતેષુ પુરુષોત્તમ ।
વ્યોમવત્સર્વદા વ્યાપ્તઃ સર્વસમ્બન્ધવર્જિતઃ ॥ ૨૬॥

એકરૂપો મહાદેવઃ સ્થિતઃ સોઽહં પરામૃતઃ ।
ઇતિ યો વેદ વેદાન્તૈઃ સોઽતિવર્ણાશ્રમી ભવેત્ ॥ ૨૭॥

“વિનષ્ટદિગ્ભ્રમસ્યાપિ યથાપૂર્વં વિભાતિ દિક્ ।
તથા વિજ્ઞાનવિધ્વસ્તં જગન્મે ભાતિ તન્ન હિ ॥ ૨૮॥

ઇતિ યો વેદ વેદાન્તૈઃ સોઽતિવર્ણાશ્રમી ભવેત્ ।
“યથા સ્વપ્નપ્રપઞ્ચોઽયં મયિ માયાવિજૃમ્ભિતઃ ॥ ૨૯॥

તથા જાગ્રત્પ્રપઞ્ચોઽપિ મયિ માયાવિજૃમ્ભિતઃ ।
ઇતિ યો વેદ વેદાન્તૈઃ સોઽતિવર્ણાશ્રમી ભવેત્ ॥ ૩૦॥

“યસ્ય વર્ણાશ્રમાચારો ગલિતઃ સ્વાત્મદર્શનાત્ ।
સ વર્ણાનાશ્રમાન્સર્વાનતીત્ય સ્વાત્મનિ સ્થિતઃ ॥ ૩૧॥

“યસ્ત્યક્ત્વા સ્વાશ્રમાન્વર્ણાનાત્મન્યેવ સ્થિતઃ પુમાન્ ।
સોઽતિવર્ણાશ્રમી પ્રોક્તઃ સર્વવેદાર્થવેદિભિઃ ॥ ૩૨॥

“ન દેહો નેન્દ્રિયં પ્રાણો ન મનો બુદ્ધ્યહઙ્કૃતી ।
ન ચિત્તં નૈવ માયા ચ ન ચ વ્યોમાદિકં જગત્ ॥ ૩૩॥

ન કર્તા નૈવ ભોક્તા ચ ન ચ ભોજયિતા તથા ।
કેવલં ચિત્સદાનન્દો બ્રહ્મૈવાત્મા યથાર્થતઃ ॥ ૩૪॥

“જલસ્ય ચલનાદેવ ચઞ્ચલત્વં યથા રવેઃ ।
તથાહઙ્કારસંસર્ગાદેવ સંસાર આત્મનઃ ॥ ૩૫॥

“તસ્માદન્યગતા વર્ણા આશ્રમા અપિ કેશવ ।
આત્મન્યારોપિતા એવ ભ્રાન્ત્યા તે નાત્મવેદિનઃ ॥ ૩૬॥

“ન વિધિર્ન નિષેધશ્ચ ન વર્જ્યાવર્જ્યકલ્પના ।
આત્મવિજ્ઞાનિનામસ્તિ તથા નાન્યજ્જનાર્દન ॥ ૩૭॥

“સ્વાત્મવિજ્ઞાનિનાં નિષ્ઠામીદૃશીમમ્બુજેક્ષણ ।
માયયા મોહિતા મર્ત્યા નૈવ જાનન્તિ સર્વદા ॥ ૩૮॥

“ન માંસચક્ષુષા નિષ્ઠા બ્રહ્મવિજ્ઞાનિનામિયમ્ ।
દ્રષ્ટું શક્યા સ્વતઃ સિદ્ધા વિદુષાં સૈવ કેશવ ॥ ૩૯॥

“યત્ર સુપ્તા જના નિત્યં પ્રબુદ્ધસ્તત્ર સંયમી ।
પ્રબુદ્ધા યત્ર તે વિદ્વાન્સુષુપ્તસ્તત્ર કેશવ ॥ ૪૦॥

“એવમાત્માનમદ્વન્દ્વં નિરાકારં નિરઞ્જનમ્ ।
નિત્યશુદ્ધં નિરાભાસં સચ્ચિન્માત્રં પરામૃતમ્ ॥ ૪૧॥

યો વિજાનાતિ વેદાન્તૈઃ સ્વાનુભૂત્યા ચ નિશ્ચિતમ્ ।
સોઽતિવર્ણાશ્રમી પ્રોક્તઃ સ એવ ગુરુરુત્તમઃ ॥ ૪૨॥ ” ઇતિ ।
તદેવં “વિમુક્તશ્ચ વિમુચ્યત” ઇત્યાદિશ્રુતયો જીવન્મુક્તસ્થિતપ્રજ્ઞભગવદ્ભક્તગુણાતીતબ્રાહ્મણાતિવર્ણાશ્રમિ-પ્રતિપાદકસ્મૃતિવાક્યાનિ ચ જીવન્મુક્તિસદ્ભાવે પ્રમાણાનીતિ સ્થિતમ્ । ઇતિ જીવન્મુક્તિપ્રમાણાનિ ॥ ૫॥

ઇતિ શ્રીમદ્વિદ્યારણ્યપ્રણીતે જીવન્મુક્તિવિવેકે પ્રથમં જીવન્મુક્તિપ્રમાણ પ્રકરણમ્ ॥

# ૨. વાસનાક્ષય નામ દ્વિતીયં પ્રકરણમ્

અથ જીવન્મુક્તિસાધનં નિરૂપયામઃ । તત્ત્વજ્ઞાનમનોનાશવાસનાક્ષયાસ્તત્સાધનમ્ । અત એવ વાસિષ્ઠરામાયણ ઉપશમપ્રકરણસ્યાવસાને "જીવન્મુક્તશરીરાણામ્" (લઘુયોગવાસિષ્ઠે ૨૮.૧) ઇત્યેતસ્મિન્પ્રસ્તાવે વસિષ્ઠ આહ-
"વાસનાક્ષયવિજ્ઞાનમનોનાશા મહામતે ।
સમકાલં ચિરાભ્યસ્તા ભવન્તિ ફલદાયિનઃ ॥ ૧૧૬॥

અન્વયમુક્ત્વા વ્યતિરેકમાહ-
"ત્રય એતે સમં યાવન્ન સ્વભ્યસ્તા મુહુર્મુહુઃ ।
તાવન્ન પદસમ્પ્રાપ્તિર્ભવત્યપિ સમાશતૈઃ ॥ ૧૧૫॥ ઇતિ ॥

સમકાલાભ્યાસાભાવે બાધકમાહ-
"એકૈકશો નિષેવ્યન્તે યદ્યેતે ચિરયત્નતઃ ।
તન્ન સિદ્ધિં પ્રયચ્છન્તિ મન્ત્રાઃ સઙ્કુલિતા ઇવ" ॥ ૧૧૭॥ ઇતિ ।
યથા સન્ધ્યાવન્દનમાર્જને સહવિનિયુક્તાનાં "આપો હિ ષ્ઠા" (ઋ। સં .૧૦.૯.૧) ઇત્યાદીનાં તિસૃણામૃચાં મધ્યે પ્રતિદિનમેકૈકસ્યા ઋચઃ પાઠે શાસ્ત્રીયાનુષ્ઠાનં ન સિધ્યતિ, યથા વા ષડઙ્ગમન્ત્રાણામેકૈકમન્ત્રેણ ન સિદ્ધિઃ, યથા વા લોકે શાકસૂપૌદનાદીનામેકૈકેન ન ભોજનસિદ્ધિઃ, તદ્વત્ । ચિરાભ્યાસસ્ય પ્રયોજનમાહ-
"ત્રિભિરેતૈશ્ચિરાભ્યસ્તૈર્હૃદયગ્રન્થયો દૃઢાઃ ।
નિઃશઙ્કમેવ ત્રુટ્યન્તિ બિચ્છેદાદ્ગુણા ઇવ" ॥ ૧૧૮॥ ઇતિ ।
તસ્યૈવ વ્યતિરેકમાહ–
"જન્માન્તરશતાભ્યસ્તા રામ સંસારસંસ્થિતિઃ ।
સા ચિરાભ્યાસયોગેન વિના ન ક્ષીયતે ક્વચિત્ "॥ ૧૧૯॥ ઇતિ ।
ન કેવલમેકૈકાભ્યાસે ફલાભાવઃ, કિં તુ તત્સ્વરૂપમપિ ન સિધ્યતીત્યાહ-
"તત્ત્વજ્ઞાનં મનોનાશો વાસનાક્ષય એવ ચ ।
મિથઃ કારણતાં ગત્વા દુઃસાધ્યાનિ સ્થિતાનિ હિ" ॥ ૧૧૩॥ ઇતિ ।
ત્રયાણામેતેષાં મધ્યે દ્વયોર્દ્વયોર્મેલનેન ત્રીણિ દ્વન્દ્વાનિ ભવન્તિ । મનોનાશવાસનાક્ષયદ્વન્દ્વસ્યાન્યોન્યકારણત્વં વ્યતિરેકમુખેનાહ-
"યાવદ્વિલીનં ન મનો ન તાવદ્વાસનાક્ષયઃ ।
ન ક્ષીણા વાસના યાવત્તાવચ્ચિત્તં ન શામ્યતિ" ॥ ૧૧૦॥

પ્રદીપજ્વાલાસન્તાનવદ્વૃત્તિસન્તાનરૂપેણ પરિણમમાનમન્તઃકરણદ્રવ્યં મનનાત્મકત્વાન્મન ઇત્યુચ્યતે । તસ્ય નાશો નામ વૃત્તિરૂપપરિણામં પરિત્યજ્ય નિરુદ્ધત્વાકારેણ પરિણામઃ। તથા ચ પતઞ્જલિર્યોગશાસ્ત્રે સૂત્રયામાસ-
"વ્યુત્થાનનિરોધસંસ્કારયોરભિભવપ્રાદુર્ભાવ નિરોધક્ષણચિત્તાન્વયો નિરોધપરિણામઃ" (૩.૯) ઇતિ ।

વ્યુત્થાનસંસ્કારા અભિભૂયન્તે; નિરોધસંસ્કારાઃ પ્રાદુર્ભવન્તિ; નિરોધયુક્તઃ ક્ષણશ્ચિત્તેનાન્વીયતે; સોઽયં મનોનાશ ઇત્યવગન્તવ્યમ્ ।
પૂર્વાપરપરામર્શમન્તરેણ સહસોત્પદ્યમાનસ્ય ક્રોધાદિવૃત્તિવિશેષસ્ય હેતુશ્ચિત્તગતઃ સંસ્કારો વાસના, પૂર્વપૂર્વાભ્યાસેન ચિત્તે વાસ્યમાનત્વાત્ ।
તસ્યાશ્ચ વાસનાયાઃ ક્ષયો નામ વિવેકજન્યાયાં શાન્તિદાન્ત્યાદિશુદ્ધવાસનાયાં દૃઢાયાં સત્યપિ બાહ્યનિમિત્તે ક્રોધાદ્યનુત્પત્તિઃ ।
તત્ર મનોનાશાભાવે વૃત્તિષૂત્પદ્યમાનાસુ કદાચિદ્ બાહ્યનિમિત્તેન ક્રોધાદ્યુત્પત્તેર્નાસ્તિ વાસનાક્ષયઃ । અક્ષીણાયાં તુ વાસનાયાં તથૈવ વૃત્ત્યુત્પાદનાન્નાસ્તિ મનોનાશઃ ।
તત્ત્વજ્ઞાનમનોનાશયોઃ પરસ્પરકારણત્વં વ્યતિરેકમુખેણાહ -
"યાવન્ન તત્ત્વવિજ્ઞાનં તાવચ્ચિત્તશમઃ કુતઃ ।
યાવન્ન ચિત્તોપશમો ન તાવત્ તત્ત્વવેદનમ્" ॥ ૧૧૧॥ ઇતિ ॥

"ઇદં સર્વમાત્મૈવ, પ્રતીયમાનં તુ રૂપરસાદિકં જગન્માયામયં ન ત્વેતદ્વસ્તુતોઽસ્તિ" ઇતિ નિશ્ચયસ્તત્ત્વજ્ઞાનમ્ । તસ્યાનુત્પત્તૌ રૂપરસાદિવિષયાણાં સદ્ભાવે સતિ તદ્ગોચરાશ્ચિત્તવૃત્તયો ન નિવારયિતું શક્યન્તે યથા પ્રક્ષિપ્યમાણેષ્વિન્ધનાદિષુ વહ્નિજ્વાલા ન નિવાર્યતે તદ્વત્ । અસતિ ચિત્તોપશમે વૃત્તિભિર્ગૃહ્યમાણેષુ રૂપાદિષુ "નેહ નાનાસ્તિ કિઞ્ચન" (કઠ। ઉપ૦ .૪.૧૧) ઇતિ શ્રુતેઃ "યજમાનઃ પ્રસ્તરઃ" (તૈ૦ બ્રા૦ ૩.૯.૨.૩) ઇત્યાદેરિવ પ્રત્યક્ષવિરોધશઙ્કયા "બ્રહ્માદ્વિતીયમ્" ઇત્યેતાદૃશસ્તત્ત્વનિશ્ચયો નોદિયાત્ ।
વાસનાક્ષયતત્ત્વજ્ઞાનયોઃ પરસ્પરકારણત્વં વ્યતિરેકમુખેનાહ-
"યાવન્ન વાસનાનાશસ્તાવત્તત્ત્વાગમઃ કુતઃ ।
યાવન્ન તત્ત્વસમ્પ્રાપ્તિર્ન તાવદ્વાસનાક્ષયઃ" ॥ ૧૧૨॥ ઇતિ ।
ક્રોધાદિવાસનાસ્વનષ્ટાસુ શમદમાદિસાધનાભાવાન્ન તત્ત્વજ્ઞાનમુદેતિ । અજ્ઞાતે ચાદ્વિતીયબ્રહ્મતત્ત્વે ક્રોધાદિનિમિત્તસ્ય સત્યત્વભ્રમાનપાયાન્ન વાસના ક્ષીયતે । યથોક્તાનાં ત્રયાણાં દ્વન્દ્વાનામન્યોન્યકારણત્વમન્વયમુખેન વયમુદાહરામઃ ।
મનસિ નષ્ટે સતિ સંસ્કારોદ્બોધકસ્ય બાહ્યનિમિત્તસ્યાપ્રતીતૌ વાસના ક્ષીયતે, ક્ષીણાયાં ચ વાસનાયાં હેત્વભાવેન ક્રોધાદિવૃત્ત્યનુદયાન્મનો નશ્યતિ । તદિદં મનોનાશવાસનાક્ષયદ્વન્દ્વમ્ ।
"દૃશ્યતે ત્વગ્ર્યયા બુદ્ધ્યા" (કઠોપ૦ ૧.૩.૧૨) ઇતિ શ્રુતેરાત્મૈક્યાભિમુખવૃત્તેર્દર્શનહેતુત્વાદિતરકૃત્સ્નવૃત્તિ-નાશસ્ય તત્ત્વજ્ઞાનહેતુત્વમવગમ્યતે । સતિ ચ તત્ત્વજ્ઞાને, મિથ્યાભૂતે જગતિ નરવિષાણાદાવિવ ધીવૃત્ત્યનુદયાદાત્મનશ્ચ દૃષ્ટત્વેન પુનર્વૃત્ત્યનુપયોગાન્નિરિન્ધનાગ્નિવન્મનો નશ્યતિ। તદિદં મનોનાશતત્ત્વજ્ઞાનયોર્દ્વન્દ્વમ્ ।
તત્ત્વજ્ઞાનસ્ય ક્રોધાદિવાસનાક્ષયહેતુતાં વાર્તિકકાર આહ-
"રિપૌ બન્ધૌ સ્વદેહે ચ સમૈકાત્મ્યં પ્રપશ્યતઃ ।
વિવેકિનઃ કુતઃ કોપઃ સ્વદેહાવયવેષ્વિવ" ॥ - (નૈષ્કર્મ્યસિદ્ધૌ ૨.૧૮) ઇતિ ॥

ક્રોધાદિવાસનાક્ષયરૂપસ્ય શમાદેર્જ્ઞાનહેતુત્વં પ્રસિદ્ધમ્ । વસિષ્ઠોઽપિ -

“ગુણાઃ શમાદયો જ્ઞાનાચ્છમાદિભ્યસ્તથા જ્ઞતા ।
પરસ્પરં વિવર્ધેતે દ્વે પદ્મસરસી ઇવ” ॥ - (લઘુયોગવાસિષ્ઠે ૪.૧૦૭) ઇતિ ॥

તદિદં વાસનાક્ષયતત્ત્વજ્ઞાનયોર્દ્વન્દ્વમ્ ।
તત્ત્વજ્ઞાનાદીનાં ત્રયાણાં સમ્પાદને સાધનમાહ-
“તસ્માદ્રાઘવ યત્નેન પૌરુષેણ વિવેકિના ।
ભોગેચ્છાં દૂરતસ્ત્યક્ત્વા ત્રયમેતત્સમાશ્રયેત્” ॥ ઇતિ । - (લઘુયોગવાસિષ્ઠે ૪.૧૧૪) ઇતિ ॥

પૌરુષો યત્નઃ કેનાપ્યુપાયેનાવશ્યં સમ્પાદયિષ્યામીત્યેવંવિધોત્સાહરૂપો નિર્બન્ધઃ । વિવેકો નામ વિભજ્યનિશ્ચયઃ - તત્ત્વજ્ઞાનસ્ય શ્રવણાદિકં સાધનમ્, મનોનાશસ્ય યોગઃ, વાસનાક્ષયસ્ય પ્રતિકૂલવાસનોત્પાદનમિતિ । ભોગેચ્છાયાઃ સ્વલ્પાયા અપ્યભ્યુપગમે “હવિષા કૃષ્ણવર્ત્મેવ ભૂય એવાભિવર્ધતે” (મનુ૦ ૨.૯૪) ઇતિ ન્યાયેનાતિપ્રસઙ્ગસ્યદુર્વારત્વાદ્દૂરત ઇત્યુક્તમ્ ।
નનુ પૂર્વત્ર વિવિદિષાસંન્યાસસ્ય તત્ત્વજ્ઞાનં ફલં વિદ્વત્સન્ન્યાસસ્ય જીવન્મુક્તિરિતિ વ્યવસ્થા વર્ણિતા ; તથા ચ સતિ પ્રથમતસ્તત્ત્વજ્ઞાનં સમ્પાદ્ય પશ્ચાદ્વિદ્વત્સન્ન્યાસં કૃત્વા જીવતઃ સ્વસ્ય બન્ધરૂપયોર્વાસનામનોવૃત્ત્યોર્વિનાશઃ સમ્પાદનીય ઇતિ પ્રતિભાતિ ; અત્ર તુ તત્ત્વજ્ઞાનાદીનાં સહૈવાભ્યાસો નિયમ્યતે ; અતઃ પૂર્વોત્તરવિરોધ ઇતિ ચેત્,
નાયં દોષઃ, પ્રધાનોપસર્જનભાવેન વ્યવસ્થોપપત્તેઃ । વિવિદિષાસંન્યાસિનસ્તત્ત્વજ્ઞાનં પ્રધાનમ્, મનોનાશવાસનાક્ષયાવુપસર્જનીભૂ
વિદ્વત્સન્ન્યાસિનસ્તુ તદ્વૈપરીત્યમ્; અતઃ સહાભ્યાસ ઉભયત્રાપ્યવિરુદ્ધઃ । ન ચ તત્ત્વજ્ઞાનોત્પત્તિમાત્રેણ કૃતાર્થસ્ય કિમુત્તરકાલીનેનાભ્યાસપ્રયાસેનેતિ શઙ્કનીયમ્, જીવન્મુક્તિ-પ્રયોજનનિરૂપણેન પરિહરિષ્યમાણત્વાત્ ।
નનુ વિદ્વત્સંન્યાસિનો વેદનસાધનશ્રવણાદ્યનુષ્ઠાનવૈફલ્યાદ્વેદનસ્ય ચ સ્વરૂપેણ કર્તુમકર્તુમન્યથા વા કર્તુમશક્યસ્યાનનુષ્ઠેયત્વાદુપસર્જનત્વેઽપ્યુત્તરકાલીનોઽભ્યાસઃ કીદૃશ ઇતિ ચેત્,
કેનાપિ દ્વારેણ પુનઃ પુનસ્તત્ત્વાનુસ્મરણમિતિ બ્રૂમઃ । તાદૃશશ્ચાભ્યાસો લીલોપાખ્યાને (લઘુયોગવાસિષ્ઠે ૬) દર્શિતઃ-
“તચ્ચિન્તનં તત્કથનમન્યોન્યં તત્પ્રબોધનમ્ ।
એતદેકપરત્વં ચ જ્ઞાનાભ્યાસં વિદુર્બુધાઃ ॥ ૧૦૮॥

“સર્ગાદાવેવ નોત્પન્નં દૃશ્યં નાસ્ત્યેવ તત્સદા ।
ઇદં જગદહં ચેતિ બોધાભ્યાસં વિદુઃ પરે” ॥ ૧૧૧॥

મનોનાશવાસનાક્ષયાભ્યાસાવપિ તત્રૈવ દર્શિતૌ -
“અત્યન્તાભાવસમ્પત્તૌ જ્ઞાતુર્જ્ઞેયસ્ય વસ્તુનઃ ।
યુક્ત્યા શાસ્ત્રૈર્યતન્તે યે તે તત્રાભ્યાસિનઃ સ્થિતાઃ” ॥ ૧૧૦॥ ઇતિ ।
જ્ઞાતૃજ્ઞેયયોર્મિથ્યાત્વધીરભાવસમ્પત્તિઃ । સ્વરૂપેણાપ્યપ્રતીતિરત્યન્તાભાવસમ્પત્તિઃ । યુક્તિર્યોગઃ । સોઽયં મનોનાશાભ્યાસઃ ।
“દૃશ્યાસમ્ભવબોધેન રાગદ્વેષાદિતાનવે ।
રતિર્નવોદિતા યાસૌ બ્રહ્માભ્યાસઃ સ ઉચ્યતે” ॥ ૧૧૨॥ ઇતિ ।

સોઽયં વાસનાક્ષયાભ્યાસઃ ।
તેષ્વેતેષુ ત્રિષ્વભ્યાસેષુ સામાન્યેન પ્રતીયમાનેષુ પ્રધાનોપસર્જનભાવો ન વિવેક્તું શક્યત ઇતિ ચેત્ ।
મૈવમ્, પ્રયોજનાનુસારેણ વિવેક્તું શક્યત્વાત્ । મુમુક્ષોઃ પુરુષસ્ય જીવન્મુક્તિર્વિદેહમુક્તિશ્ચેતિ પ્રયોજનદ્વયમ્ । અત એવ "વિમુક્તશ્ચ વિમુચ્યતે" (કઠ ઉપ૦ .૨.૨.૧) ઇતિ શ્રૂયતે । તત્ર જીવતઃ પુરુષસ્ય દૈવસમ્પદા મોક્ષઃ, આસુરસમ્પદા બન્ધઃ। એતચ્ચ ષોડશાધ્યાયે ભગવતાભિહિતં - "દૈવી સમ્પદ્વિમોક્ષાય નિબન્ધાયાસુરી મતા" ॥ (શ્રીમદ્ભગવદ્ગીતાયાં ૧૬.૫) ઇતિ ।
તેચ સમ્પદૌ તત્રૈવાભિહિતે-
"અભયં સત્ત્વસંશુદ્ધિર્જ્ઞાનયોગવ્યવસ્થિતિઃ ।
દાનં દમશ્ચ યજ્ઞશ્ચ સ્વાધ્યાયસ્તપ આર્જવમ્ ॥ ૧॥

"અહિંસા સત્યમક્રોધસ્ત્યાગઃ શાન્તિરપૈશુનમ્ ।
દયા ભૂતેષ્વલોલુપ્ત્વં માર્દવં હ્રીરચાપલમ્ ॥ ૨॥

"તેજઃ ક્ષમા ધૃતિઃ શૌચમદ્રોહો નાતિમાનિતા ।
ભવન્તિ સમ્પદં દૈવીમભિજાતસ્ય ભારત ॥ ૩॥

"દમ્ભો દર્પોભિમાનશ્ચ ક્રોધઃ પારુષ્યમેવ ચ ।
અજ્ઞાનં ચાભિજાતસ્ય પાર્થ સમ્પદમાસુરીમ્" ॥ ૪॥ ઇતિ ।
પુનરપ્યાધ્યાયપરિસમાપ્તેરાસુરસમ્પત્પ્રપઞ્ચિતા । તત્રાશાસ્ત્રીયાયાઃ સ્વભાવસિદ્ધાયા આસુરસમ્પદો દુર્વાસનાયાઃ શાસ્ત્રીયયા પુરુષપ્રયત્નસાધ્યયા દૈવસમ્પદા સદ્વાસનયા ક્ષયે સતિ જીવન્મુક્તિર્ભવતિ । વાસનાક્ષયવન્મનોનાશસ્યાપિ જીવન્મુક્તિહેતુત્વં શ્રૂયતે ।
"મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ।
બન્ધાય વિષયાસક્તં મુક્ત્યૈ નિર્વિષયં સ્મૃતમ્ ॥ ૨॥

"યતો નિર્વિષયસ્યાસ્ય મનસો મુક્તિરિષ્યતે ।
અતો નિર્વિષયં નિત્યં મનઃ કાર્યં મુમુક્ષુણા ॥ ૩॥

"નિરસ્તવિષયાસઙ્ગં સન્નિરુદ્ધં મનો હૃદિ ।
યા યાત્યુન્મનીભાવં તદા તત્પરમં પદમ્ ॥ ૪॥

"તાવદેવ નિરોદ્ધવ્યં યાવદ્ હૃદિ ગતં ક્ષયમ્ ।
એતજ્જ્ઞાનં ચ મોક્ષશ્ચ શેષો ગ્રન્થસ્ય વિસ્તરઃ" ॥ ૫॥ ઇતિ । - (અમૃતબિન્દૂપનિષદિ ૨ -૫) ॥

બન્ધો દ્વિવિધઃ તીવ્રો મૃદુશ્ચ । તત્રાઽસુરસમ્પત્સાક્ષાદેવ ક્લેશહેતુત્વાત્ તીવ્રો બન્ધઃ । દ્વૈતમાત્રપ્રતીતિસ્તુ સ્વયમક્લેશરૂપત્વાદાસુરસમ્પદુત્પાદકત્વાચ્ચ મૃદુર્બન્ધઃ । તત્ર વાસનાક્ષયેણ તીવ્રબન્ધ એવ નિવર્તતે (નિવર્ત્યતે ઇતિ વા પાઠઃ) । મનોનાશેન તૂભયમ્ । તર્હિ મનોનાશેનૈવાલં વાસનાક્ષયસ્તુ નિરર્થક ઇતિ ચેન્ન; ભોગહેતુના પ્રબલેન પ્રારબ્ધેન વ્યુત્થાપિતે મનસિ વાસનાક્ષયસ્ય તીવ્રબન્ધનિવારણાર્થત્વાત્, ભોગસ્ય મૃદુબન્ધેનાપ્યુપપત્તેઃ।

તામસવૃત્તયસ્તીવ્રબન્ધઃ । સાત્ત્વિકરાજસવૃત્તિદ્વયં મૃદુબન્ધઃ । એતચ્ચ "દુઃખેષ્વનુદ્વિગ્નમનાઃ સુખેષુ વિગતસ્પૃહઃ" (શ્રીમદ્ભગવદ્ગીતાયાં ૨.૫૬) ઇત્યત્ર સ્પષ્ટીકૃતમ્ ।

એવં ચ સતિ મૃદુબન્ધસ્યાભ્યુપેયત્વાત્ તીવ્રબન્ધસ્ય વાસનાક્ષયેણૈવ નિવૃત્તેરનર્થકો મનોનાશ ઇતિ ચેત્,

ન, દુર્બલપ્રારબ્ધાપાદિતાનામવશ્યમ્ભાવિભોગાનાં પ્રતીકારાર્થત્વાત્। તાદૃગ્ભોગસ્ય પ્રતીકારનિવર્ત્યત્વમ-ભિપ્રેત્યેદમાહુઃ -

"અવશ્યમ્ભાવિભોગાનાં પ્રતીકારો ભવેદ્યદિ ।

તદા દુઃખૈર્ન લિપ્યેરન્નલરામયુધિષ્ઠિરાઃ" । - (પઞ્ચદશ્યાં ૭.૧૫૬) ઇતિ ॥

તદેવં જીવન્મુક્તિં પ્રતિ વાસનાક્ષયમનોનાશયોઃ સાક્ષાત્સાધનત્વાદ્ પ્રાધાન્યમ્; તત્ત્વજ્ઞાનં તૂભયોત્પાદનેન વ્યવહિતત્વાદુપસર્જનમ્ । તત્ત્વજ્ઞાનસ્ય વાસનાક્ષયહેતુત્વં બહુશઃ શ્રુતૌ શ્રૂયતે-

"જ્ઞાત્વા દેવં સર્વપાશાપહાનિઃ "(શ્વે૦ ઉપ૦ ૧.૧.૧૧) ;

"અધ્યાત્મયોગાધિગમેન દેવં મત્વા ધીરો હર્ષશોકૌ જહાતિ" । (કઠ। ઉપ૦ ૧.૨.૧૨) ।

"તરતિ શોકમાત્મવિત્" (છાન્દોગ્ય ઉપ૦ .૭.૧.૩) ;

"તત્ર કો મોહઃ કઃ શોક એકત્વમનુપશ્યતઃ" (ઈશ ઉપ૦ .૭) ;

"જ્ઞાત્વા દેવં મુચ્યતે સર્વપાશૈઃ" (શ્વે। ઉપ૦ .૧.૧.૮) ઇતિ ।

મનોનાશહેતુત્વં ચ તત્ત્વજ્ઞાનસ્ય શ્રુતિસિદ્ધમ્ । વિદ્યાદશામભિપ્રેત્યેદં શ્રૂયતે- "યત્ર ત્વસ્ય સર્વમાત્મૈવાભૂત્ તત્કેન કં પશ્યેત્ કેન કં જિઘ્રેત્" (બૃહ। ઉપ૦ .૪.૫.૧૫) ઇત્યાદિ ।

ગૌડપાદાચાર્યાશ્ચાહુઃ

"આત્મતત્ત્વાનુબોધેન ન સઙ્કલ્પયતે યદા ।

અમનસ્તાં તદા યાતિ ગ્રાહ્યાભાવે તદગ્રહઃ" ॥ - (માણ્ડૂક્યકારિકાયાં ૩.૩૨) ઇતિ ॥

(આત્મતત્ત્વાનુબોધેન - આચાર્યપાદેન શઙ્કરભગવતા આત્મસત્યાનુબોધેન ઇતિ પાઠો ગૃહીતઃ)

જીવન્મુક્તેર્વાસનાક્ષયમનોનાશાવિવ વિદેહમુક્તેઃ સાક્ષાત્સાધનત્વાજ્જ્ઞાનં પ્રધાનમ્, "જ્ઞાનાદેવ તુ કૈવલ્યં પ્રાપ્યતે યેન મુચ્યતે" ઇતિ સ્મૃતેઃ ।

કેવલસ્યાત્મનો ભાવઃ કૈવલ્યં દેહાદિરહિતત્વમ્ । તચ્ચ જ્ઞાનાદેવ પ્રાપ્યતે, સદેહત્વસ્યાજ્ઞાનકલ્પિતત્વેન જ્ઞાનૈકનિવર્ત્યત્વાત્ । જ્ઞાનાદેવેત્યેવકારેણ કર્મવ્યાવૃત્તિઃ "ન કર્મણા ન પ્રજયા ધનેન" (કૈવલ્યોપનિષદિ ૨; તૈત્તિરીયારણ્યકે ૧૦.૧૦.૨૧) ઇતિ શ્રુતેઃ ।

યસ્તુ જ્ઞાનશાસ્ત્રમનભ્યસ્ય યથાસમ્ભવં વાસનાક્ષયમનોનાશાવભ્યસ્ય સગુણં બ્રહ્મોપાસ્તે ન તસ્ય કૈવલ્યમસ્તિ, લિઙ્ગદેહસ્યાનપાયાત્ । અત એવકારેણ તાવપિ વ્યાવર્ત્યેતે । યેન મુચ્યત ઇત્યસ્યાયમર્થઃ - યેન જ્ઞાનપ્રાપિતકેવલત્વેન કૃત્સ્નબન્ધાદ્વિમુચ્યત ઇતિ । બન્ધશ્ચાનેકવિધઃ-અવિદ્યાગ્રન્થિઃ, અબ્રહ્મત્વમ્, હૃદયગ્રન્થિઃ, સંશયઃ, કર્માણિ, અસર્વકામત્વમ્, મૃત્યુઃ, પુનર્જન્મેત્યાદિશબ્દૈસ્તત્ર તત્ર વ્યવહારાત્ । ત એતે બન્ધાઃ સર્વેઽપિ જ્ઞાનનિવર્ત્યાઃ। તથા ચ શ્રુતયઃ-

"એતદ્યો વેદ નિહિતં ગુહાયાં સોઽવિદ્યાગ્રન્થિં વિકિરતીહ સોમ્ય" (મુણ્ડક ઉપ૦ .૨.૧.૧૦) ।

“બ્રહ્મ વેદ બ્રહ્મૈવ ભવતિ” (મુણ્ડક ઉપ૦ ૩.૨.૯) ।
“ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે” ॥ - (મુણ્ડક ઉપ૦ ૨.૨.૮) ॥

“યો વેદ નિહિતં ગુહાયાં પરમે વ્યોમન્ સોઽશ્નુતે સર્વાન્કામાન્સહ” (તૈ૦ ઉપ૦૨.૧) ;
“તમેવ વિદિત્વાતિમૃત્યુમેતિ” (શ્વે.ઉપ .૩.૮) ॥

“યસ્તુ વિજ્ઞાનવાન્ ભવતિ સમનસ્કઃ સદા શુચિઃ ।
સ તુ તત્પદમાપ્નોતિ યસ્માદ્ભૂયો ન જાયતે” ॥ - (કઠ ઉપ૦ ૧.૩.૮) ॥

“ય એવં વેદાહં બ્રહ્માસ્મીતિ સ ઇદં સર્વં ભવતિ” (બૃ૦ ઉપ૦ ૧.૪.૧૦) ॥

ઇત્યાદીન્યસર્વજ્ઞત્વાદિબન્ધનિવૃત્તિપરાણિ વાક્યાન્યત્રોદાહરણીયાનિ । સેયં વિદેહમુક્તિર્જ્ઞાનોત્પત્તિસમકાલીના જ્ઞેયા, બ્રહ્મણ્યવિદ્યારોપિતાનામેતેષાં બન્ધાનાં વિદ્યયા વિનાશે સતિ પુનરુત્પત્ત્યસમ્ભવાદનનુભવાચ્ચ । તદેતદ્વિદ્યાસમકાલીનત્વં ભાષ્યકારઃ સમન્વયસૂત્રે (બ્રહ્મસૂત્રે ૧.૧.૪) પ્રપઞ્ચયામાસઃ, “તદધિગમ ઉત્તરપૂર્વાઘયોરશ્લેષવિનાશૌ તદ્વ્યપદેશાત્” (બ્રહ્મસૂત્રે ૪.૧.૧૩) ઇત્યત્ર ચ ।
નનુ વર્તમાનદેહપાતાનન્તરભાવિની વિદેહમુક્તિરિતિ બહવો વર્ણયન્તિ ।
તથા ચ શ્રુતિઃ - “તસ્ય તાવદેવ ચિરં યાવન્ન વિમોક્ષ્યેઽથ સમ્પત્સ્યે” (છા૦ ઉપ૦ ૬.૧૪.૨) ઇતિ ।
વાક્યવૃત્તાવપ્યુક્તમ્-
“પ્રારબ્ધકર્મવેગેન જીવન્મુક્તો યદા ભવેત્ ।
કઞ્ચિત્કાલમનારબ્ધકર્મબન્ધસ્ય સઙ્ક્ષયે ॥ ૫૨॥

નિરસ્તાતિશયાનન્દં વૈષ્ણવં પરમં પદમ્ ।
પુનરાવૃત્તિરહિતં કૈવલ્યં પ્રતિપદ્યતે ॥ ૫૩॥ ઇતિ ।
સૂત્રકારોઽપ્યાહ - “ભોગેન ત્વિતરે ક્ષપયિત્વા સમ્પદ્યતે (બ્રહ્મસૂત્રે ૪.૧.૧૯) ઇતિ । ઇતરે પ્રારબ્ધપુણ્યપાપે ।
વસિષ્ઠોઽપ્યાહ-
“જીવન્મુક્તપદં ત્યક્ત્વા સ્વદેહે કાલસાત્કૃતે ।
વિશત્યદેહમુક્તત્વં પવનોઽસ્પન્દતામિવ” ॥ - (લ૦ વા૦ ૫.૯૮) ઇતિ ॥

નાયં દોષઃ, વિવક્ષાવિશેષેણ મતદ્વયસ્યાવિરોધાત્ । વિદેહમુક્તિરિત્યત્રત્યેન દેહશબ્દેન કૃત્સ્નં દેહજાતં વિવક્ષિત્વા બહુભિર્વર્ણિતમ્ । અસ્માભિસ્તુ ભાવિદેહમાત્રવિવક્ષયોચ્યતે, તદનારમ્ભાયૈવ જ્ઞાનસમ્પાદનાત્ । અયં તુ દેહઃ પૂર્વમેવારબ્ધઃ, અતો જ્ઞાનેનાપિ નાસ્યારમ્ભો વારયિતું શક્યતે । એતદ્દેહનિવૃત્તિરપિ ન જ્ઞાનફલમ્, અજ્ઞાનિનામપ્યારબ્ધકર્મક્ષયે તન્નિવૃત્તેઃ ।
તર્હિ વર્તમાનલિઙ્ગદેહનિવૃત્તિર્જ્ઞાનફલમસ્તુ, જ્ઞાનમન્તરેણ તદનિવૃત્તેરિતિ ચેત્,
ન; સત્યપિ જ્ઞાને જીવન્મુક્તેસ્તન્નિવૃત્ત્યભાવાત્ ।

નનુ જ્ઞાનસ્ય કઞ્ચિત્કાલં પ્રારબ્ધેન કર્મણા પ્રતિબન્ધેનાનિવર્તકત્વેઽપિ પ્રતિબન્ધક્ષયે લિઙ્ગદેહ-નિવર્તકત્વં ભવિષ્યતીતિ ચેત્ ।

ન, પઞ્ચપાદિકાચાર્યેણ "યતો જ્ઞાનમજ્ઞાનસ્યૈવ નિવર્તકમ્" ઇત્યુપપાદિતત્વાત્ । તર્હિ લિઙ્ગદેહનિવૃત્તેઃ કિં સાધનમિતિ ચેત્, સામગ્રીનિવૃત્તિરિતિ બ્રૂમઃ । દ્વિવિધં હિ કાર્યનિવર્તકમ્, વિરોધિસદ્ભાવઃ સામગ્રીનિવૃત્તિશ્ચેતિ । તદ્યથા વિરોધિના વાયુના તૈલવર્ત્તિસામગ્રીનિવૃત્ત્યા વા દીપો નિવર્તતે । લિઙ્ગદેહસ્ય સાક્ષાદ્વિરોધિનં ન પશ્યામઃ । સામગ્રી હિ દ્વિવિધા પ્રારબ્ધમનારબ્ધં ચેતિ । તાભ્યામુભાભ્યામજ્ઞાનિનાં લિઙ્ગદેહ ઇહામુત્ર ચાવતિષ્ઠતે । જ્ઞાનિનાં ત્વનારબ્ધસ્ય જ્ઞાનેન નિવૃત્તેઃ પ્રારબ્ધસ્ય ચ ભોગેન નિવૃત્તેઃ,

તૈલવર્તિરહિતદીપવત્સામગ્રીનિવૃત્ત્યા લિઙ્ગદેહો નિવર્તતે । અતો ન તન્નિવૃત્તિર્જ્ઞાનફલમ્ ।

નન્વનેન ન્યાયેન ભાવિદેહાનારમ્ભોઽપિ ન જ્ઞાનફલમ્ । તથા હિ-કિમનારમ્ભ એવ ફલમ્, કિં વા તત્પરિપાલનં ? નાદ્યઃ, તસ્ય પ્રાગભાવરૂપત્વેનાનાદિસિદ્ધત્વાત્ । ન દ્વિતીયઃ, અનારબ્ધકર્મરૂપસામગ્રીનિવૃત્ત્યૈવ ભાવિદેહારમ્ભપ્રાગભાવપરિપાલનસિદ્ધેઃ। ન ચ તન્નિવૃત્તિઃ ફલમ્, અવિદ્યાનિવૃત્તેરેવ વિદ્યાફલત્વાત્ ।

નૈષ દોષઃ, ભાવિજન્માનારમ્ભાદીનાં વિદ્યાફલત્વસ્ય પ્રામાણિકત્વાત્। "યસ્માદ્ભૂયો ન જાયતે" (કઠ ઉપ૦ .૧.૩.૮) ઇત્યાદ્યુદાહૃતાઃ શ્રુતયસ્તત્ર પ્રમાણમ્। ન ચ જ્ઞાનમજ્ઞાનસ્યૈવ નિવર્તકમિતિ ન્યાયેન વિરોધઃ । અજ્ઞાનસહભાવનિયતાનામબ્રહ્મત્વાદીનામજ્ઞાનશબ્દેન પઞ્ચપાદિકાચાર્યૈર્વિવક્ષિતત્વાત્ । અન્યથાનુભવ-વિરોધઃ । અનુભૂયતે હ્યજ્ઞાનનિવૃત્તિવદબ્રહ્મત્વાદિનિવૃત્તિરપિ । તસ્માદ્ભાવિદેહરાહિત્યલક્ષણા વિદેહ-મુક્તિર્જ્ઞાનસમકાલીના । તથા ચ યાજ્ઞવલ્ક્યવચનં શ્રૂયતે - "અભયં વૈ જનક પ્રાપ્તોઽસિ" (બૃ૦ ઉપ૦ ૪.૨.૪) ઇતિ, "એતાવદરે ખલ્વમૃતત્વમ્" (બૃ૦ ઉપ૦ ૪.૫.૧૫) ઇતિ ચ । શ્રુત્યન્તરેઽપિ "તમેવં વિદ્વાનમૃત ઇહ ભવતિ" (નૃ૦ પૂર્વતાપની ઉપ૦ ૧.૬; પુરુષસૂક્તે ઋ૦ સં૦ ૧૦.૯૦.૧૨) ઇતિ । યદ્યુત્પન્નેઽપિ તત્ત્વજ્ઞાને તત્ફલભૂતા વિદેહમુક્તિસ્તદાનીં ન ભવેત્, કાલાન્તરે ચ ભવેત્, તદા જ્યોતિષ્ટોમાદાવિવ જ્ઞાનજન્યમપૂર્વં કિઞ્ચિત્કલ્પ્યેત; તથા ચ કર્મશાસ્ત્ર એવ જ્ઞાનશાસ્ત્રમન્તર્ભવેત્। અથોચ્યતે મન્ત્રાદિપ્રતિબદ્ધાગ્નિ-વત્પ્રારબ્ધપ્રતિબદ્ધં જ્ઞાનં કાલાન્તરે વિદેહમુક્તિં દાસ્યતીતિ । મૈવમ્, અવિરોધાત્ । ન હ્યસ્મદભિમતા ભાવિદેહાત્યન્તાભાવલક્ષણા વિદેહમુક્તિર્વર્તમાનદેહમાત્રસ્થાપકેન પ્રારબ્ધેન વિરુધ્યતે, યેન પ્રતિબધ્યેત ।

કિઞ્ચ ક્ષણિકત્વેન કાલાન્તરે સ્વયમવિદ્યમાનં જ્ઞાનં કથં મુક્તિં દદ્યાત્ ? જ્ઞાનાન્તરં ચરમસાક્ષાત્કાર-લક્ષણમુત્પત્સ્યત ઇતિ ચેન્ન; સાધનાભાવાત્ । પ્રતિબન્ધકપ્રારબ્ધનિવૃત્ત્યૈવ સહ ગુરુશાસ્ત્રદેહેન્દ્રિયાદ્ય-શેષજગત્પ્રતિભાસનિવૃત્તેઃ કિં તત્સાધનં સ્યાત્ ? તર્હિ "ભૂયશ્ચાન્તે વિશ્વમાયાનિવૃત્તિઃ" (શ્વે૦ ઉપ૦ ૧.૧૦) ઇત્યસ્યાઃ શ્રુતેઃ કોઽર્થ ઇતિ ચેત્; આરબ્ધાન્તે નિમિત્તાભાવાદ્દેહેન્દ્રિયાદ્યશેષનૈમિત્તિકનિવૃત્તિરિત્યેવાર્થઃ । તતો ભવદભિમતા વર્તમાનદેહરાહિત્યલક્ષણા વિદેહમુક્તિઃ પશ્ચાદસ્તુ દેહપાતાનન્તરં અસ્મદભિમતા તુ જ્ઞાનસમકાલીનૈવ । એતદેવાભિપ્રેત્ય ભગવાઞ્શેષ આહ-

"તીર્થે શ્વપચગૃહે વા નષ્ટસ્મૃતિરપિ પરિત્યજન્દેહમ્ ।

જ્ઞાનસમકાલમુક્તઃ કૈવલ્યં યાતિ હતશોકઃ" ॥ - (પરમાર્થસારે ૮૧) ઇતિ ॥

તસ્માદ્વિદેહમુક્તૌ સાક્ષાત્સાધનસ્ય તત્ત્વજ્ઞાનસ્ય પ્રધાનત્વમુપપન્નમ્। વાસનાક્ષયમનોનાશયોર્જ્ઞાનસાધનત્વેન

વ્યવહિતત્વાદુપસર્જનત્વમ્ । આસુરવાસનાક્ષયકારિણ્યા દૈવવાસનાયા જ્ઞાનસાધનત્વં શ્રુતિસ્મૃત્યોરુપલભ્યતે - "શાન્તો દાન્ત ઉપરતસ્તિતિક્ષુઃ સમાહિતો ભૂત્વાત્મન્યેવાત્માનં પશ્યેત્" (બૃ૦ ઉપ૦ ૪.૪.૨૩) ઇતિ શ્રુતિઃ ।
સ્મૃતિરપિ
"અમાનિત્વમદમ્ભિત્વમહિંસા ક્ષાન્તિરાર્જવમ્ ।
આચાર્યોપાસનં શૌચં સ્થૈર્યમાત્મવિનિગ્રહઃ ॥

"ઇન્દ્રિયાર્થેષુ વૈરાગ્યમનહઙ્કાર એવ ચ ।
જન્મમૃત્યુજરાવ્યાધિદુઃખદોષાનુદર્શનમ્ ॥ - (ભગવદ્ગીતાયાં ૧૩.૮, ૯) ॥

"અસક્તિરનભિષ્વઙ્ગઃ પુત્રદારગૃહાદિષુ ।
નિત્યં ચ સમચિત્તત્વમિષ્ટાનિષ્ટોપપત્તિષુ ॥ ૧૦॥

"　　　મયિ ચાનન્યયોગેન ભક્તિરવ્યભિચારિણી ।
વિવિક્તદેશસેવિત્વમરતિર્જનસંસદિ ॥ ૧૧॥

"અધ્યાત્મજ્ઞાનનિત્યત્વં તત્ત્વજ્ઞાનાર્થદર્શનમ્ ।
એતજ્જ્ઞાનમિતિ પ્રોક્તમજ્ઞાનં યદતોઽન્યથા" ॥ ૧૨॥ - (તત્રૈવ ૧૩.૧૨) ॥

અન્યસ્મિન્નહમ્બુદ્ધિરભિષ્વઙ્ગઃ । જ્ઞાયતેઽનેનેતિ વ્યુત્પત્ત્યા જ્ઞાનસાધનમિત્યર્થઃ । મનોનાશસ્યાપિ જ્ઞાનસાધનત્વં શ્રુતિસ્મૃતિપ્રસિદ્ધં - "તતસ્તુ તં પશ્યતિ નિષ્કલં ધ્યાયમાનઃ" (મુ। ઉપ૦ .૩.૧.૮) ઇતિ શ્રુતિઃ । "અધ્યાત્મયોગાધિગમેન દેવં મત્વા ધીરો હર્ષશોકૌ જહાતિ" (કઠ૦ ઉપ૦ ૨.૧૨) ઇતિ ચ । પ્રત્યગાત્મસમાધિપ્રાપ્ત્યા દેવં જ્ઞાત્વેત્યર્થઃ ।
"યં વિનિદ્રા જિતશ્વાસાઃ સન્તુષ્ટાઃ સંયતેન્દ્રિયાઃ ।
જ્યોતિઃ પશ્યન્તિ યુઞ્જાનાસ્તસ્મૈ વિદ્યાત્મને નમઃ" ॥ - (મહાભારતે શાન્તિ૦ રાજધર્મ૦ ૪૭.૩૫) ॥

ઇતિ સ્મૃતિઃ ।
તદેવં તત્ત્વજ્ઞાનાદીનાં ત્રયાણાં વિદેહમુક્તિજીવન્મુક્તિવશાદ્ ગુણપ્રધાનભાવવ્યવસ્થા સિદ્ધા ।
નનુ વિવિદિષાસંન્યાસિના સમ્પાદિતાનામેતેષાં કિં વિદ્વત્સન્ન્યાસાદૂર્ધ્વમનુવૃત્તિમાત્રમ્, કિં વા પુનરપિ સમ્પાદનપ્રયત્નોઽપેક્ષિતઃ । નાદ્યઃ, તત્ત્વજ્ઞાનસ્યેવાન્યયોરપ્યયત્નસિદ્ધત્વે પ્રાધાન્યપ્રયુક્તાદરાભાવપ્રસઙ્ગાત્ । ન દ્વિતીયઃ, ઇતરયોરિવ જ્ઞાનસ્યાપિ પ્રયત્નસાપેક્ષત્વે સત્યુપસર્જનત્વપ્રયુક્તૌદાસીન્યાભાવપ્રસઙ્ગાત્ ।
નાયં દોષઃ, જ્ઞાનસ્યાનુવૃત્તિમાત્રમિતરયોર્યત્નસાધ્યત્વમિત્યઙ્ગીકારાત્, તથા હિ-વિદ્યાધિકારી દ્વિવિધઃ, કૃતોપાસ્તિરકૃતોપાસ્તિશ્ચેતિ । તત્રોપાસ્યસાક્ષાત્કારપર્યન્તામુપાસ્તિં કૃત્વા યદિ જ્ઞા પ્રવર્તેત તદા વાસનાક્ષયમનોનાશયોર્દૃઢતરત્વેન જ્ઞાનાદૂર્ધ્વં વિદ્વત્સંન્યાસજીવન્મુક્તી સ્વત એવ સિધ્યતઃ । તાદૃશ એવ શાસ્ત્રાભિમતો મુખ્યો વિદ્યાધિકારી । તતસ્તં પ્રતિ શાસ્ત્રેષુ સહોપન્યાસાત્, સ્વરૂપેણ વિવિક્તાવપિ વિદ્વત્સન્ન્યાસવિવિદિષાસન્ન્યાસૌ સઙ્કીર્ણાવિવ પ્રતિભાસેતે । ઇદાનીન્તનાસ્તુ પ્રાયેણાકૃતોપાસ્તય એવૌત્સુક્યમાત્રાત્સહસા વિદ્યાયાં પ્રવર્તન્તે । વાસનાક્ષયમનોનાશૌ ચ તાત્કાલિકૌ સમ્પાદયન્તિ । તાવતા

શ્રવણમનનનિદિધ્યાસનાનિ નિષ્પાદ્યન્તે । તૈશ્ચ દૃઢાભ્યસ્તૈરજ્ઞાનસંશયવિપર્યયનિરાસાત્ તત્ત્વજ્ઞાનં સમ્યગુદેતિ । ઉદિતસ્ય જ્ઞાનસ્ય બાધકપ્રમાણાભાવાન્નિવૃત્તાયા અવિદ્યાયાઃ પુનરુત્પત્તિકારણાભાવાચ્ચ નાસ્તિ તસ્ય શૈથિલ્યમ્ । વાસનાક્ષયમનોનાશૌ તુ દૃઢાભ્યાસાભાવાદ્ભોગપ્રદેન પ્રારબ્ધેન તદા તદાબાધ્યમાનત્વાચ્ચ સવાતપ્રદેશદીપવત્સહસા નિવર્તેતે । તથા ચ વસિષ્ઠઃ-
"પૂર્વેભ્યસ્તુ પ્રયત્નેભ્યો વિષમોઽયં હિ સમ્મતઃ ।
દુઃસાધ્યો વાસનાત્યાગઃ સુમેરૂન્મૂલનાદપિ" ॥ - (લઘુયોગવાસિષ્ઠે ૨૮.૧૦૯) ઇતિ ॥

અર્જુનોઽપિ
"ચઞ્ચલં હિ મનઃ કૃષ્ણ પ્રમાથિ બલવદ્દૃઢમ્ ।
તસ્યાહં નિગ્રહં મન્યે વાયોરિવ સુદુષ્કરમ્" ॥ - (ભગવદ્ગીતાયાં ૬.૩૪) ઇતિ ॥

તસ્માદિદાનીન્તનાનાં વિદ્વત્સંન્યાસિનાં જ્ઞાનસ્યાનુવૃત્તિમાત્રમ્ । વાસનાક્ષયમનોનાશૌ તુ પ્રયત્ન સમ્પાદ્યાવિતિ સ્થિતમ્ ।
નનુ કેયં વાસના યસ્યાઃ ક્ષયાય પ્રયતિતવ્યમિતિ ચેત્ તત્સ્વરૂપમાહ વસિષ્ઠઃ -
"દૃઢભાવનયા ત્યક્તપૂર્વાપરવિચારણમ્ ।
યદાદાનં પદાર્થસ્ય વાસના સા પ્રકીર્તિતા ॥ ૪૮॥

ભાવિતં તીવ્રસંવેગાદાત્મના યત્તદેવ સઃ ।
ભવત્યાશુ મહાબાહો વિગતેતરસંસ્મૃતિઃ ॥ ૪૯॥

તાદૃગ્રૂપો હિ પુરુષો વાસનાવિવશીકૃતઃ ।
સમ્પશ્યતિ યદેવૈતત્ સદ્વસ્ત્વિતિ વિમુહ્યતિ ॥ ૫૦॥

વાસનાવેગવૈવશ્યાત્ સ્વરૂપં પ્રજહાતિ તત્ ।
ભ્રાન્તં પશ્યતિ દુર્દૃષ્ટિઃ સર્વં મદવશાદિવ" ॥ ૫૧॥ - (લઘુયોગવાસિષ્ઠે ૨૮.૪૮-૫૧) ઇતિ ॥

અત્ર ચ સ્વસ્વદેશાચારકુલધર્મભાષાભેદતદ્ગતાપશબ્દસુશબ્દાદિષુ પ્રાણિનામભિનિવેશઃ સામાન્યત ઉદાહરણમ્ । વિશેષતસ્તુ ભેદાનુક્ત્વા પશ્ચાદુદાહરામઃ। યથોક્તાં વાસનામભિપ્રેત્ય બૃહદારણ્યકે શ્રૂયતે - "સ યથાકામો ભવતિ તત્ક્રતુર્ભવતિ યત્ક્રતુર્ભવતિ તત્કર્મ કુરુતે યત્કર્મ કુરુતે તદભિસમ્પદ્યતે" (બૃ૦ ઉપ૦ ૪.૪.૫) ઇતિ ।
વાસનાભેદો વાલ્મીકિના દર્શિતઃ
"વાસના દ્વિવિધા પ્રોક્તા શુદ્ધા ચ મલિના તથા ।
મલિના જન્મહેતુઃ સ્યાચ્છુદ્ધા જન્મવિનાશિની ॥

"અજ્ઞાનસુઘનાકારા ઘનાહઙ્કારશાલિની ।
પુનર્જન્મકરી પ્રોક્તા મલિના વાસના બુધૈઃ ॥

પુનર્જન્માઙ્કુરં ત્યક્ત્વા સ્થિતા સમ્ભૃષ્ટબીજવત્ ।

દેહાર્થં મ્રિયતે જ્ઞાતજ્ઞેયા શુદ્ધેતિ ચોચ્યતે" ॥ - (લઘુયોગવાસિષ્ઠે ૧.૧૦ -૧૨) ઇતિ ॥

દેહાદીનાં પઞ્ચકોશાનાં તત્સાક્ષિણશ્ચિદાત્મનશ્ચ ભેદાવરકમજ્ઞાનમ્, તેન સુષ્ઠુ ઘનીભૂત આકારો યસ્યાઃ સેયમજ્ઞાનસુઘનાકારા । યથા ક્ષીરં તક્રમેલનેન ઘનીભવતિ, યથા વા વિલીનં ઘૃતમત્યન્તશીતલપ્રદેશે ચિરમવસ્થાપિતં સુઘનીભવતિ તથા વાસના દ્રષ્ટવ્યા । ઘનીભાવશ્ચાત્ર ભ્રાન્તિપરમ્પરા । તાં ચાસુરસમ્પદ્વિવરણે ભગવાનાહ -

"પ્રવૃત્તિં ચ નિવૃત્તિં ચ જના ન વિદુરાસુરાઃ ।
ન શૌચં નાપિ ચાચારો ન સત્યં તેષુ વિદ્યતે ॥

અસત્યમપ્રતિષ્ઠં તે જગદાહુરનીશ્વરમ્ ।
અપરસ્પરસમ્ભૂતં કિમન્યત્ કામહૈતુકમ્ ॥

એતાં દૃષ્ટિમવષ્ટભ્ય નષ્ટાત્મનોઽલ્પબુદ્ધયઃ ।
પ્રભવન્ત્યુગ્રકર્માણઃ ક્ષયાય જગતોઽહિતાઃ ।
કામમાશ્રિત્ય દુષ્પૂરં દમ્ભમાનમદાન્વિતાઃ ।
મોહાદ્ ગૃહીત્વાસદ્ગ્રાહાન્ પ્રવર્તન્તેઽશુચિવ્રતાઃ ॥

ચિન્તામપરિમેયાં ચ પ્રલયાન્તામુપાશ્રિતાઃ ।
કામોપભોગપરમા એતાવદિતિ નિશ્ચિતાઃ ॥

આશાપાશશતૈર્બદ્ધાઃ કામક્રોધપરાયણાઃ ।
ઈહન્તે કામભોગાર્થમન્યાયેનાર્થ સઞ્ચયાન્" ॥ - (ભગવદ્ગીતાયાં ૧૬ઃ ૭-૧૨) ઇતિ ॥

ત આસુરા જગદસત્યમાહુઃ । નાસ્તિ સત્યં વેદપુરાણાદિપ્રમાણં યસ્મિંસ્તાદૃશં જગદાહુઃ । વેદાનાં પ્રામાણ્યં ન મન્યન્ત ઇત્યર્થઃ । અત એવ નાસ્તીશ્વરઃ કર્તા વ્યવસ્થાપકશ્ચ યસ્મિંસ્તાદૃશં જગદાહુઃ । તર્હિ કુતોઽસ્ય જગત ઉત્પત્તિં વદન્તીત્યત્રાહ - અપરસ્પરેતિ। અપરશ્ચ પરશ્ચેત્યપરસ્પરમ્ । અપરસ્પરતોઽન્યોન્યતઃ સ્ત્રીપુરુષમિથુનાત્ સમ્ભૂતં જગત્ । કિમન્યત્કારણમસ્ય ? નાસ્ત્યન્યત્કિઞ્ચિત્; કિં તુ કામહૈતુકમ્, સ્ત્રીપુરુષયોઃ કામ એવ પ્રવાહરૂપેણ હેતુરસ્યેત્યાહુરિત્યર્થઃ । ઘનાહઙ્કારશ્ચ તત્રૈવોદાહૃતઃ-

"ઇદમદ્ય મયા લબ્ધમિમં પ્રાપ્સ્યે મનોરથમ્ ।
ઇદમસ્તીદમપિ મે ભવિષ્યતિ પુનર્ધનમ્ ॥

અસૌ મયા હતઃ શત્રુર્હનિષ્યે ચાપરાનપિ ।
ઈશ્વરોઽહમહં ભોગી સિદ્ધોઽહં બલવાન્સુખી ॥

આઢ્યોઽભિજનવાનસ્મિ કોઽન્યોઽસ્તિ સદૃશો મયા ।
યક્ષ્યે દાસ્યામિ મોદિષ્ય ઇત્યજ્ઞાનવિમોહિતાઃ ॥

અનેકચિત્તવિભ્રાન્તા મોહજાલસમાવૃતાઃ ।

પ્રસક્તાઃ કામભોગેષુ પતન્તિ નરકેઽશુચૌ" । - (ભગવદ્ગીતાયાં ૧૬.૧૩ -૧૬) ઇતિ ॥

એતેન પુનર્જન્મકારણત્વમુદાહૃતં ભવતિ, તચ્ચ પુનઃ પ્રપઞ્ચિતં -
"આત્મસમ્ભાવિતાઃ સ્તબ્ધા ધનમાનમદાન્વિતાઃ ।
યજન્તે નામયજ્ઞૈસ્તે દમ્ભેનાવિધિપૂર્વકમ ॥ ૧૭॥

અહઙ્કારં બલં દર્પં કામં ક્રોધં ચ સંશ્રિતાઃ ।
મામાત્મપરદેહેષુ પ્રદ્વિષન્તોઽભ્યસૂયકાઃ ॥ ૧૮॥

તાનહં દ્વિષતઃ ક્રૂરાન્ સંસારેષુ નરાધમાન્ ।
ક્ષિપામ્યજસ્રમશુભાનાસુરીષ્વેવ યોનિષુ ॥ ૧૯॥

આસુરી યોનિમાપન્ના મૂઢા જન્મનિ જન્મનિ ।
મામપ્રાપ્યૈવ કૌન્તેય તતો યાન્ત્યધમાં ગતિમ્" ॥ - (ભગવદ્ગીતાયાં ૧૬.૧૭-૨૦) ઇતિ ॥

શુદ્ધવાસના તુ જ્ઞાતજ્ઞેયા । જ્ઞેયસ્વરૂપં ત્રયોદશાધ્યાયે ભગવાનાહ -
"જ્ઞેયં યત્તત્પ્રવક્ષ્યામિ યજ્જ્ઞાત્વામૃતમશ્નુતે ।
અનાદિમત્પરં બ્રહ્મ ન સત્તન્નાસદુચ્યતે ॥ ૧૨॥

સર્વતઃ પાણિપાદં તત્સર્વતોક્ષિશિરોમુખમ્ ।
સર્વતઃ શ્રુતિમલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ॥ ૧૩॥

સર્વેન્દ્રિયગુણાભાસં સર્વેન્દ્રિયવિવર્જિતમ્ ।
અસક્તં સર્વભૃચ્ચૈવ નિર્ગુણં ગુણભોક્તૃ ચ ॥ ૧૪॥

બહિરન્તશ્ચ ભૂતાનામચરં ચરમેવ ચ ।
સૂક્ષ્મત્વાત્ તદવિજ્ઞેયં દૂરસ્થં ચાન્તિકે ચ તત્ ॥ ૧૫॥

અવિભક્તં ચ ભૂતેષુ વિભક્તમિવ ચ સ્થિતમ્ ।
ભૂતભર્તૃ ચ તજ્જ્ઞેયં ગ્રસિષ્ણુ પ્રભવિષ્ણુ ચ ॥ ૧૬॥

જ્યોતિષામપિ તજ્જ્યોતિસ્તમસઃ પરમુચ્યતે ।
જ્ઞાનં જ્ઞેયં જ્ઞાનગમ્યં હૃદિ સર્વસ્ય વિષ્ઠિતમ્" ॥ ૧૭॥ - (ભગવદ્ગીતાયાં ૧૩.૧૨ -૧૭) ઇતિ ॥

અત્ર તટસ્થલક્ષણસ્વરૂપલક્ષણાભ્યામવગન્તું સોપાધિકનિરુપાધિકસ્વરૂપદ્વયમુપન્યસ્તમ્ । કદાચિત્સમ્બન્ધિ સદ્યલ્લક્ષયતિ તત્તટસ્થલક્ષણમ્ । તત્સ્વરૂપલક્ષણમ્। યથા "કાકવદ્દેવદત્તગૃહમ્" ઇતિ તથા કાલત્રયસમ્બન્ધિ સદ્યલ્લક્ષયતિ તત્સ્વરૂપલક્ષણમ્ । યથા "પ્રકૃષ્ટપ્રકાશશ્ચન્દ્રઃ" ઇતિ ।
નનુ ત્યક્તપૂર્વાપરવિચારત્વં વાસનાલક્ષણમુક્તં ; જ્ઞેયજ્ઞાનં ચ વિચારજન્યમ્; અતો ન શુદ્ધાયાં તલ્લક્ષણમસ્તિ ।

મૈવમ્, લક્ષણે દૃઢ઼ભાવનયેત્યુક્તત્વાત્। યથા બહુષુ જન્મસુ દૃઢ઼ભાવિતત્વેનાસ્મિઞ્જન્મનિ વિનૈવ પરોપદેશમહઙ્કારમમકારકામક્રોધાદયો મલિનવાસના ઉત્પદ્યન્તે, તથા પ્રાથમિકસ્ય બોધસ્ય વિચારજન્યત્વેઽપિ દીર્ઘકાલનૈરન્તર્યસત્કારૈર્ભાવિતે તત્ત્વે પશ્ચાદ્વાક્યયુક્તિપરામર્શમન્તરેણૈવ પુરોવર્તિઘટાદિવત્સહસા તત્ત્વં પરિસ્ફુરતિ; તાદૃશ્યા બોધાનુવૃત્ત્યા સહિત ઇન્દ્રિયવ્યવહારઃ શુદ્ધવાસના । સા ચ દેહજીવનમાત્રાયોપયુજ્યતે, ન તુ દમ્ભદર્પાદ્યાસુરસમ્પદુત્પાદનાય, નાપિ જન્માન્તરહેતુધર્માધર્મોત્પાદનાય । યથા ભૃષ્ટાનિ વ્રીહ્યાદિબીજાનિ કુસૂલપૂરણમાત્રાયોપયુક્તાનિ, ન તુ રુચિરાન્નાય નાપિ સસ્યનિષ્પત્તયે, તદ્વત્ ।

મલિના ચ વાસના ત્રિવિધા, લોકવાસના શાસ્ત્રવાસના દેહવાસના ચેતિ । સર્વે જના યથા માં ન નિન્દન્તિ યથા વા સ્તુવન્તિ તથૈવ સર્વદાચરિષ્યામીત્યભિનિવેશો લોકવાસના । તસ્યાશ્ચ સમ્પાદયિતુમશક્યત્વાન્મલિનત્વમ્ । તથા હિ -

"કો ન્વસ્મિન્સામ્પ્રતં લોકે ગુણવાન્કશ્ચ વીર્યવાન્" । - (રામાયણે ૧.૧.૨) ॥

ઇત્યાદિના બહુધા વાલ્મીકિઃ પપ્રચ્છ ।

"ઇક્ષ્વાકુવંશપ્રભવો રામો નામ જનૈઃ શ્રુતઃ" । - (રામાયણે ૧.૧.૮) ॥

ઇત્યાદિના પ્રત્યુત્તરં નારદો દદૌ ।

તાદૃશસ્યાપિ રામસ્ય પતિવ્રતાશિરોમણિભૂતાયા જગન્માતુઃ સીતાયાશ્ચ શ્રોતુમશક્યો જનાપવાદઃ સમ્પ્રવૃત્તઃ; કિમુ વક્તવ્યમન્યેષાં ? તથા હિ દેશવિશેષેણ પરસ્પરં નિન્દાબાહુલ્યમુપલભ્યતે । દાક્ષિણ્યાત્યૈર્વિપ્રૈરૌત્તરા વેદવિદો વિપ્રા માંસભક્ષિણો નિન્દ્યન્તે । ઔત્તરૈશ્ચ માતુલસુતોદ્વાહિનો યાત્રાસુ મૃદ્ભાણ્ડવાહિનો દાક્ષિણાત્યા
નિન્દ્યન્તે । બહ્વૃચા આશ્વલાયનશાખાં કાણ્વશાખાયાઃ પ્રશસ્તાં મન્યન્તે । વાજસનેયિનસ્તુ વૈપરીત્યેન । એવં સ્વસ્વકુલગોત્રબન્ધુવર્ગેષ્ટદેવતાદિપ્રશંસા પરકીયનિન્દાચ આવિદ્વદઙ્ગનાગોપાલં સર્વત્ર પ્રસિદ્ધા । એતદેવાભિપ્રેત્યોક્તં -

"શુચિઃ પિશાચો વિચલો વિચક્ષણઃ
ક્ષમોઽપ્યશક્તો બલવાંશ્ચ દુષ્ટઃ ।
નિશ્ચિત્તચોરઃ સુભગોઽપિ કામી
કો લોકમારાધયિતું સમર્થઃ" ॥ "ઇતિ,
"વિદ્યતે ન ખલુ કશ્ચિદુપાયઃ
સર્વલોકપરિતોષકરો યઃ ।
સર્વથા સ્વહિતમાચરણીયં
કિં કરિષ્યતિ જનો બહુજલ્પઃ" ॥ ઇતિ ચ ।

અતો લોકવાસનાયા મલિનત્વમભિપ્રેત્ય યોગીશ્વરસ્ય તુલ્યનિન્દાસ્તુતિત્વં મોક્ષશાસ્ત્રેષુ વર્ણતમ્ । શાસ્ત્રવાસના ત્રિવિધા, પાઠવ્યસનં બહુશાસ્ત્રવ્યસનમનુષ્ઠાનવ્યસનં ચેતિ । પાઠવ્યસનં ભરદ્વાજેઽવગમ્યતે । સ હિ પુરુષાયુષત્રયેણ બહૂન્વેદાનધીત્યેન્દ્રેણ ચતુર્થાયુષિ પ્રલોભિતસ્તત્રાપિ પરિશિષ્ટવેદાધ્યયનાયોદ્યમં ચકાર ।

તસ્યાપિ પાઠસ્યાશક્યત્વાન્મલિનવાસનાત્વમ્ । તાં ચાશક્યતામિન્દ્રઃ પ્રતિબોધ્ય પાઠાન્નિવર્ત્ય તતોઽપ્યધિકાય પુરુષાર્થાય સગુણબ્રહ્મવિદ્યામુપદિદેશ । તદેતત્સર્વં તૈત્તિરીયબ્રાહ્મણે દ્રષ્ટવ્યમ્ ।

તથૈવાત્યન્તિકપુરુષાર્થાભાવાદ્બહુશાસ્ત્રવ્યસનસ્ય માલિન્યં કાવષેયગીતાયામુપલભ્યતે-

“કશ્ચિન્મુનિર્દુર્વાસા બહુવિધશાસ્ત્રપુસ્તકભારૈઃ સહ મહાદેવં નમસ્કર્તુમાગતસ્તત્સભાયાં મુનિના નારદેન ભારવાહિગર્દભસામ્યમાપાદિતઃ કોપાત્પુસ્તકાનિ લવણાર્ણવે પરિત્યજ્ય મહાદેવેનાત્મવિદ્યાયાં પ્રવર્તિતઃ” ઇતિ । આત્મવિદ્યા ચાનન્તર્મુખસ્ય ગુરુકારુણ્યરહિતસ્ય ન વેદશાસ્ત્રમાત્રેણોત્પદ્યતે ।

તથા ચ શ્રુતિઃ-

“નાયમાત્મા પ્રવચનેન લભ્યો ન મેધયા ન બહુના શ્રુતેન” (કઠોપનિષદિ ૧.૨.૨૩) ઇતિ ।

અન્યત્રાપ્યુક્તં -

“બહુશાસ્ત્રકથાકન્થારોમન્થેન વૃથૈવ કિમ્ ।

અન્વેષ્ટવ્યં પ્રયત્નેન તત્ત્વજ્ઞૈર્જ્યોતિરાન્તરમ્” ॥ ઇતિ,

“અધીત્ય ચતુરો વેદાન્ધર્મશાસ્ત્રાણ્યનેકશ ।

બ્રહ્મતત્ત્વં ન જાનાતિ દર્વી પાકરસં યથા” ॥ ઇતિ ચ । - (મુક્તિકોપનિષદિ ૨.૬૩, ૬૫) ॥

નારદશ્ચતુઃષષ્ટિકલાકુશલોઽપ્યનાત્મવિત્ત્વેનાનુતપ્તઃ સનત્કુમારમુપસસાદ ઇતિચ્છન્દોગા અધીયતે । અનુષ્ઠાનવ્યસનં વિષ્ણુપુરાણે નિદાઘસ્યોપલભ્યતે । વાસિષ્ઠરામાયણે દાશૂરસ્ય । નિદાઘો હિ ઋભુણા પુનઃ પુનઃ પ્રબોધ્યમાનોઽપિ કર્મશ્રદ્ધાજાડ્યં ચિરં ન જહૌ । દાશૂરશ્ચાત્યન્તશ્રદ્ધાજાડ્યેનાનુષ્ઠાનાય શુદ્ધપ્રદેશં ભૂમૌ ન ક્વાપ્યુપલેભે । અસ્યાશ્ચ કર્મવાસનાયાઃ પુનર્જન્મહેતુત્વાન્મલિનત્વમ્ ।

તથા ચાથર્વણિકા અધીયતે-

“પ્લવા હ્યેતે અદૃઢ઼ા યજ્ઞરૂપા

અષ્ટાદશોક્તમવરં યેષુ કર્મ ।

એતચ્છ્રેયો યેઽભિનન્દન્તિ મૂઢા

જરામૃત્યું તે પુનરેવાપિ યન્તિ ॥

અવિદ્યાયામન્તરે વર્તમાનાઃ

સ્વયં ધીરાઃ પણ્ડિતમ્મન્યમાનાઃ ।

જઙ્ઘન્યમાનાઃ પરિયન્તિ મૂઢા

અન્ધેનૈવ નીયમાના યથાન્ધાઃ ॥

અવિદ્યાયાં બહુધા વર્તમાના

વયં કૃતાર્થા ઇત્યભિમન્યન્તિ બાલાઃ ।

યત્કર્મિણો ન પ્રવેદયન્તિ રાગાત્-

તેનાતુરાઃ ક્ષીણલોકાશ્ચ્યવન્તે ॥

ઇષ્ટાપૂર્તં મન્યમાના વરિષ્ઠં
નાન્યચ્છ્રેયો વેદયન્તે પ્રમૂઢાઃ ।
નાકસ્ય પૃષ્ઠે તે સુકૃતેઽનુભૂત્વે-
મં લોકં હીનતરં વા વિશન્તિ” ॥ - (મુણ્ડકોપનિષદિ ૧.૨.૭-૧૦) ॥

ભગવતાપ્યુક્તમ્-
“યામિમાં પુષ્પિતાં વાચં પ્રવદન્ત્યવિપશ્ચિતઃ ।
વેદવાદરતાઃ પાર્થ નાન્યદસ્તીતિ વાદિનઃ ॥

કામાત્માનઃ સ્વર્ગપરા જન્મકર્મફલપ્રદામ્ ।
ક્રિયાવિશેષબહુલાં ભોગૈશ્વર્યગતિં પ્રતિ ॥

ભોગૈશ્વર્યપ્રસક્તાનાં તયાપહૃતચેતસામ્ ।
વ્યવસાયાત્મિકા બુદ્ધિઃ સમાધૌ ન વિધીયતે ॥

ત્રૈગુણ્યવિષયા વેદા નિસ્ત્રૈગુણ્યો ભવાર્જુન ।
નિર્દ્વન્દ્વો નિત્યસત્ત્વસ્થો નિર્યોગક્ષેમ આત્મવાન્ ॥

યાવાનર્થ ઉદપાને સર્વતઃ સમ્પ્લુતોદકે ।
તાવાન્સર્વેષુ વેદેષુ બ્રાહ્મણસ્ય વિજાનતઃ” ॥ - (ભગવદ્ગીતાયાં ૨.૪૨-૪૬) ઇતિ ॥

દર્પહેતુત્વાચ્ચ શાસ્ત્રવાસનાયા મલિનત્વમ્ । શ્વેતકેતુરલ્પેનૈવ કાલેન સર્વાન્વેદાનધીત્ય દર્પેણ પિતુરપિ પુરતો વિનયં ન ચકારેતિચ્છન્દોગાઃ ષષ્ઠાધ્યાયે પઠન્તિ। તથા બાલાકિઃ કાનિચિદુપાસનાન્યવગત્ય દૃપ્ત ઉશીનરાદિષુ બહુષુ દેશેષુ દિગ્વિજયેન બહૂન્વિપ્રાનવજ્ઞાય કાશ્યામજાતશત્રું બ્રહ્મવિચ્છિરોમણિમનુશાસિતું ધાર્ષ્ટ્યં ચકારેતિ કૌષીતકિનો વાજસનેયિનશ્ચાધીયતે ।

દેહવાસનાપ્યાત્મત્વગુણાધાનદોષાપનયનભ્રાન્તિભેદાત્ ત્રિવિધા । તત્રાત્મત્વં ભાષ્યકાર ઉદાજહાર - “દેહમાત્રં ચૈતન્યવિશિષ્ટમાત્મેતિ પ્રાકૃતા જના લૌકાયતિકાશ્ચ પ્રતિપન્નાઃ” (બ્રહ્મસૂત્રભાષ્યે ૧.૧.૧) ઇતિ । “સ વા એષ પુરુષોઽન્નરસમયઃ” ઇત્યારભ્ય “તસ્માદન્નં તદુચ્યતે” (તૈ૦ ઉપ૦ ૨.૧.૨) ઇત્યન્તેન ગ્રન્થેન તામેવ પ્રાકૃતપ્રતિપત્તિં તૈત્તિરીયાઃ સ્પષ્ટીકુર્વન્તિ । “વિરોચનઃ પ્રજાપતિનાનુશિષ્ટોઽપિ સ્વચિત્તદોષેણ દેહાત્મબુદ્ધિં દૃઢીકૃત્યાસુરાન્સર્વાનનુશશાસ” ઇતિચ્છન્દોગા અષ્ટમાધ્યાયે સમામનન્તિ ।

ગુણાધાનં દ્વિવિધં લૌકિકં શાસ્ત્રીયં ચેતિ । સમીચીનશબ્દાદિસમ્પાદનં લૌકિકમ્ । કોમલધ્વનિના ગાતુમધ્યેતું વા તૈલપાનમરીચભક્ષણાદિષુ લોકાઃ પ્રયતન્તે । મૃદુસ્પર્શાય લોકાઃ પુષ્ટિકરાવૌષધાહારા-વુપયુઞ્જતે । લાવણ્યાયાભ્યઙ્ગોદ્વર્તનદુકૂલાલઙ્કારાનુપસેવન્તે । સૌગન્ધ્યાય સ્રગાલેપને ધારયન્તિ । શાસ્ત્રીયં ગુણમાધાતું ગઙ્ગાસ્નાનસાલગ્રામતીર્થાદિકં સમ્પાદયન્તિ ।

દોષાપનયનં ચ ચિકિત્સકોક્તૈરૌષધૈર્મુખાદિપ્રક્ષાલનેન ચ લૌકિકમ્ । શૌચાચમનાદિભિર્વૈદિક-મિત્યુભયવિધમ્ । અસ્યાશ્ચ દેહવાસનાયા માલિન્યં વક્ષ્યતે । દેહસ્યાત્મત્વં તાવદપ્રામાણિકત્વાદશેષ-દુઃખહેતુત્વાચ્ચ મલિનત્વમ્ ।

અસ્મિંશ્ચાર્થે પૂર્વાચાર્યૈઃ સર્વૈરપિ પરાક્રાન્તમ્ । ગુણાધાનં ચ પ્રાયેણ ન પશ્યામઃ । પ્રસિદ્ધા એવ ગાયકા અધ્યાપકાશ્ચ પ્રયતમાના અપિ બહવો ધ્વનિસૌષ્ઠવં ન લભન્તે । મૃદુસ્પર્શોઽઙ્ગપુષ્ટિશ્ચ ન નિયતૌ । લાવણ્યસૌગન્ધ્યે અપિ દુકૂલસ્રગાદિનિષ્ઠે ન તુ દેહનિષ્ઠે । અત એવ વિષ્ણુપુરાણેઽભિહિતમ્-
"માંસાસૃક્પૂયવિણ્મૂત્રસ્નાયુમજ્જાસ્થિસંહતૌ ।
દેહે ચેત્પ્રીતિમાન્મૂઢો ભવિતા નરકેઽપિ સઃ" ॥ - (વિ। પુરાણે ૧.૧૭.૬૩) ॥

"સ્વદેહાશુચિગન્ધેન ન વિરજ્યેત યઃ પુમાન ।
વૈરાગ્યકારણં તસ્ય કિમન્યદુપદિશ્યતે" ॥ **ઇતિ । - (મુક્તિકોપનિષદિ ૨.૬૬) ॥

** સ્વદેહસ્ય વિગન્ધેન વિરજ્યતે ન યો નરઃ ॥ ૮૦॥

વિરાગકારણં તસ્ય કિમન્યદુપદિશ્યતે ।
સર્વમેવ જગત્પૂતં દેહમેવાશુચિઃ પરમ્ ॥ ૮૧॥ - પદ્મપુરાણે (ગુરુમણ્ડલગ્રન્થમાલાયામ્) ૨.૬૬.૮૦-૮૧॥

સ્વદેહાશુચિગન્ધેન યો વિરજ્યેત માનવઃ ।
વિરાગકારણં તસ્ય કિમન્યદુપદિશ્યતે ॥ ૮૦॥ - તત્રૈવ (આનન્દાશ્રમગ્રન્થાવલ્યાં ૧૩૧ ) ૨.૬૬.૮૦॥

શાસ્ત્રીયં ચ ગુણાધાનં પ્રબલેન શાસ્ત્રાન્તરેણાપોહ્યતે, યથા "ન હિંસ્યાત્સર્વા ભૂતાનિ" (મહાભારતે ૩.૨૦૩.૪૫) ઇત્યસ્ય, "અગ્નીષોમીયં પશુમાલભેત (તૈ૦ સં૦ ૬-૧-૧૧-૬) ઇત્યનેનાપવાદસ્તદ્વત્ । પ્રબલતરં શાસ્ત્રમેતદન્યશાસ્ત્રાપેક્ષયા–
"યસ્યાત્મબુદ્ધિ કુણપે ત્રિધાતુકે
સ્વધીઃ કલત્રાદિષુ ભૌમ ઇજ્યધીઃ ।
યસ્તીર્થબુદ્ધિઃ સલિલે ન કર્હિચિજ્ -
જનેષ્વભિજ્ઞેષુ સ એવા ગોખરઃ" ॥ - (ભાગવતે ૧૦.૮૪.૧૩) ॥

"અત્યન્તમલિનો દેહો દેહી ચાત્યન્તનિર્મલઃ ।
ઉભયોરન્તરં જ્ઞાત્વા કસ્ય શૌચં વિધીયતે" ॥ ઇત્યાદિ । - (સૂતસંહિતાયાં ૨.૧૪.૧૯) ॥

યદ્યપ્યનેન શાસ્ત્રેણ દોષાપનયનં પ્રતિષિધ્યતે ન તુ ગુણાધાનમ્, તથાપિ સતિ વિરોધિનિ પ્રબલપ્રદોષે ગુણ આધાતુમશક્ય ઇત્યર્થાદ્ ગુણાધાનસ્ય પ્રતિષેધઃ । અત્યન્તમાલિન્યં ચાત્ર મૈત્રાયણીયશાખાયાં શ્રૂયતે - "ભગવન્નસ્થિચર્મસ્નાયુમજ્જામાંસશુક્રશોણિતાદૂષતે વિણ્મૂત્રવાતપિત્તકફસઙ્ઘાતે દુર્ગન્ધે નિઃસારેઽસ્મિ-ઞ્શરીરે કિં કામોપભોગૈઃ" (૧.૧.૨) ઇતિ, શરીરમિદં મૈથુનાદેવોદ્ભૂતં સંવિદ્વ્યપેતં નિરય ઇવ મૂત્રદ્વારેણ નિષ્ક્રાન્તમસ્થિભિશ્ચિતં માંસેનાનુલિપ્તં ચર્મણાવનદ્ધં વિણ્મૂત્રપિત્તકફમજ્જામેદોવસાભિરન્યૈશ્ચ મલૈર્બહુભિઃ પરિપૂર્ણં કોશ ઇવ વસુના" ઇતિ ચ । ચિકિત્સયા ચ રોગશાન્તિર્ન નિયતા । શાન્તોઽપિ રોગઃ કદાચિત્પુનરુદેતિ । નવભિશ્છિદ્રૈર્નિરન્તરં સ્રવત્સુ મલેષુ રોમકૂપૈરસઙ્ખ્યાતેઃ સ્વિન્ને ગાત્રે કો નામ ખેદેન પ્રક્ષાલયિતું શક્નુયાત્ ? તદુક્તં પૂર્વાચાર્યૈઃ -
"નવચ્છિદ્રયુતા દેહાઃ સ્રવન્તિ ઘટિકા ઇવ ।
બાહ્યશૌચૈર્ન શુધ્યન્તિ નાન્તઃ શૌચં ચ વિદ્યતે" ॥

અતો દેહવાસના મલિના । તદેતન્માલિન્યમભિપ્રેત્ય વસિષ્ટ આહ –
“આપાદમસ્તકમહં માતાપિતૃવિનિર્મિતઃ ।
ઇત્યેકો નિશ્ચયો રામ બન્ધાયાસદ્વિલોકનાત્” ॥ - (લઘુયોગવાસિષ્ઠે ૨૦.૪૨) ॥

“સા કાલસૂત્રપદવી સા મહાવીચિવાગુરા ।
સાસિપત્રવનશ્રેણી યા દેહેઽહમિતિ સ્થિતિઃ ॥

સા ત્યાજ્યા સર્વયત્નેન સર્વનાશેઽપ્યુપસ્થિતે ।
સ્પ્રષ્ટવ્યા સા ન ભવ્યેન સશ્વમાંસેવ પુલ્કસી ॥ - (લઘુયોગવાસિષ્ઠે ૧૮.૧૬-૧૭) ઇતિ ॥

તદેતલ્લોકશાસ્ત્રદેહવાસનાત્રયમવિવેકિનામુપાદેયત્વેન પ્રતિભાસમાનમપિ વિવિદિષોર્વેદનોત્પત્તિવિરોધિત્વાદ્વિદુષો જ્ઞાનપ્રતિષ્ઠાવિરોધિત્વાચ્ચ વિવેકિભિર્હેયમ્ ।
અત એવ સ્મર્યતે-
“લોકવાસનયા જન્તોઃ શાસ્ત્રવાસનયાપિ ચ ।
દેહવાસનયા જ્ઞાનં યથાવન્નૈવ જાયતે” ॥ - (સૂતસંહિતાયાં ૪.૧૪.૫૧) ઇતિ ॥

યા તુ દમ્ભદર્પાદ્યાસુરસમ્પદ્રૂપા માનસવાસના, તસ્યા નરકહેતુત્વાન્માલિન્યમતિપ્રસિદ્ધમ્ । અતઃ કેનાપ્યુપાયેન વાસનાચતુષ્ટયસ્ય ક્ષયઃ સમ્પાદનીયઃ । યથા વાસનાયાઃ ક્ષયઃ સમ્પાદનીયસ્તથા મનસોઽપિ ।
ન ચ તાર્કિકવન્નિત્યદ્રવ્યમણુપરિમાણં મનો વૈદિકા અભ્યુપગચ્છન્તિ યેન મનોનાશો દુઃસમ્પાદઃ સ્યાત્ । કિં તર્હિ સાવયવમનિત્યં સર્વદા જતુસુવર્ણાદિવદ્બહુવિધપરિણામાર્હં દ્રવ્યં મનઃ ।
તસ્ય લક્ષણં પ્રમાણં ચ વાજસનેયિનઃ સમામનન્તિ - “કામઃ સઙ્કલ્પો વિચિકિત્સા શ્રદ્ધાશ્રદ્ધા ધૃતિરધૃતિર્હ્રીર્ધીર્ભીરિત્યેતત્સર્વં મન એવ” (બૃહદારણ્યકે ઉપ૦ .૧.૫.૩) ઇત્યેતલ્લક્ષણમ્ ।
યાઃ કામાદિવૃત્તયઃ ક્રમેણોત્પદ્યમાનાશ્ચાક્ષુષપ્રત્યક્ષઘટાદિવત્સાક્ષિપ્રત્યક્ષેણાતિસ્પષ્ટં ભાસન્તે, તદુપાદાનં મન ઇત્યર્થઃ । “અન્યત્રમના અભૂવં નાદર્શમન્યત્રમના અભૂવં નાશ્રૌષમ્” (બૃહ। ઉપ૦ .૧.૫.૩) ઇતિ “મનસા હ્યેષ પશ્યતિ મનસા શ‍ૃણોતિ” (બૃહ। ઉપ૦ .૧.૫.૩) ઇત્યેતત્પ્રમાણમ્ ।
ચક્ષુઃસન્નિકૃષ્ટઃ સ્ફીતાલોકમધ્યવર્તી ઘટઃ શ્રોત્રસન્નિકૃષ્ટ ઉચ્ચૈઃ પઠિતો વેદશ્ચ યસ્યાનવધાને સતિ ન પ્રતીયતે, સતિ તુ પ્રતીયતે, અવધાને તુ પ્રતીયતે, તાદૃશં સર્વવિષયોપલબ્ધિસાધારણકરણમન્વય-વ્યતિરેકાભ્યાં પ્રતીયત ઇત્યર્થઃ ।
“તસ્માદપિ પૃષ્ઠત ઉપસ્પૃષ્ટો મનસા વિજાનાતિ” (બૃ। ઉપ૦ .૧.૫.૩) ઇત્યેતદુદાહરણમ્ ।
યસ્માચ્ચ લક્ષણપ્રમાણાભ્યાં સિદ્ધં મનસ્તસ્માત્તદેવમુદાહરણીયમ્। પૃષ્ઠભાગેપ્યઽન્યેનોપસ્પૃષ્ટો દેવદત્તો વિશેષેણ જાનાતિ હસ્તસ્પર્શોઽયમઙ્ગુલિસ્પર્શોઽયમિતિ । ન હિ તત્ર ચક્ષુઃ પ્રસરતિ, ત્વગિન્દ્રિયં તુ માર્દવકાઠિન્યમાત્રગ્રહણ ઉપક્ષીણમ્ । તસ્માન્મન એવ વિશેષજ્ઞાનકારણં પરિશિષ્યતે । તચ્ચ મનનાન્મન ઇતિ ચેતનાચ્ચિત્તમિતિ ચાભિધીયતે । તચ્ચ ચિત્તં સત્ત્વરજસ્તમોગુણાત્મકં પ્રકાશપ્રવૃત્તિમોહાનાં સત્ત્વાદિકાર્યાણાં તત્ર દર્શનાત્ ।

પ્રકાશાદીનાં ચ ગુણકાર્યત્વં ગુણાતીતલક્ષણેઽવગમ્યતે- "પ્રકાશં ચ પ્રવૃત્તિં ચ મોહમેવ ચ પાણ્ડવ" (ભગવદ્ગીતાયાં ૧૪.૨૨) ઇત્યભિધાનાત્ ।
સાઙ્ખ્યશાસ્ત્રેઽપિ - "પ્રકાશપ્રવૃત્તિમોહા નિયમાર્થાઃ" ઇત્યુક્તમ્ । પ્રકાશો નામ નાત્ર સિતભાસ્વરરૂપં કિં તુ જ્ઞાનમ્ ।
"સત્ત્વાત્સઞ્જાયતે જ્ઞાનં રજસો લોભ એવ ચ ।
પ્રમાદમોહૌ તમસો ભવતોઽજ્ઞાનમેવ ચ" ॥ - (ભગવદ્ગીતાયાં ૧૪.૧૭) ॥

ઇત્યુક્તત્વાત્ ।
જ્ઞાનવત્સુખમપિ સત્ત્વકાર્યમ્ । તદપ્યુક્તમ્-
"સત્ત્વં સુખે સઞ્જયતિ રજઃ કર્મણિ ભારત ।
જ્ઞાનમાવૃત્ય તુ તમઃ પ્રમાદે સઞ્જયત્યુત" ॥ - (ભગવદ્ગીતાયાં ૧૪.૯) ઇતિ ॥

સમુદ્રતરઙ્ગવન્નિરન્તરં પરિણમમાનેષુ ગુણેષુ કદાચિત્કશ્ચિદુદ્ભવતિ । ઇતરાવભિભૂયેતે । તદુક્તમ્-
"રજસ્તમશ્ચાભિભૂય સત્ત્વં ભવતિ ભારત ।
રજઃ સત્ત્વં તમશ્ચૈવ તમઃ સત્ત્વં રજસ્તથા" ॥ - (તત્રૈવ ૧૪.૧૦) ઇતિ ॥

"બાધ્યબાધકતાં યાન્તિ કલ્લોલા ઇવ સાગરે" । - (વિષ્ણુપુરાણે ૫.૧.૨૦) ઇતિ ચ ॥

તત્ર તમસ ઉદ્ભવે સત્યાસુરસમ્પદુદેતિ । રજસ ઉદ્ભવે સતિ લોકાદિવાસનાસ્તિસ્રો ભવન્તિ । સત્ત્વસ્યોદ્ભવે સતિ દૈવી સમ્પદુપજાયતે । એતદેવાભિપ્રેત્યોક્તમ્-
"સર્વદ્વારેષુ દેહેઽસ્મિન્ પ્રકાશ ઉપજાયતે ।
જ્ઞાનં યદા તદા વિદ્યાદ્વિવૃદ્ધં સત્ત્વમિત્યુત" ॥ - (ભગવદ્ગીતાયાં ૧૪.૧૧) ઇતિ ॥

યદ્યપ્યન્તઃકરણં ત્રિગુણાત્મકં ભાસતે, તથાપિ સત્ત્વમેવાસ્ય મુખ્યમુપાદાનકારણમ્ । રજસ્તમસી તૂપષ્ટમ્ભકે । ઉપાદાનસહકારિભૂતા અવયવા ઉપષ્ટમ્ભકાઃ। અત એવ જ્ઞાનિનો યોગાભ્યાસેન રજસ્તમસોરપનીતયોઃ સત્ત્વમેવ સ્વરૂપં પરિશિષ્યતે । એતદેવાભિપ્રેત્યોક્તમ્- "જ્ઞસ્ય ચિત્તમચિત્તં સ્યાજ્જ્ઞચિત્તં સત્ત્વમુચ્યતે" ઇતિ ।
તચ્ચ સત્ત્વં ચાઞ્ચલ્યહેતુરજોગુણશૂન્યત્વાદેકાગ્રમ્ । ભ્રાન્તિકલ્પિતાનાત્મસ્વરૂપસ્થૂલપદાર્થાકારહેતુ-તમોગુણશૂન્યત્વાત્સૂક્ષ્મમ્ । તત આત્મદર્શનયોગ્યમ્ । અત એવ શ્રુતિઃ-
"દૃશ્યતે ત્વગ્ર્યયા બુદ્ધ્યા સૂક્ષ્મયા સૂક્ષ્મદર્શિભિઃ" । - (કઠ૦ ઉપ૦ ૧.૩.૧૨) ઇતિ ॥

ન ખલુ વાયુના દોધૂયમાનેન પ્રદીપેન મણિમુક્તાદિલક્ષણાનિ નિર્ધારયિતું શક્યન્તે । નાપિ સ્થૂલેન ખનિત્રેણ સૂચ્યેવ સૂક્ષ્મપટસ્યૂતિઃ સમ્ભવતિ । તદેતદીદૃશં સત્ત્વમેવાયોગિષુ તમોગુણગર્ભિતેન રજોગુણેનોપસ્પૃષ્ટં બહુવિધદ્વૈતસઙ્કલ્પેન ચેતયમાનં ચિત્તં ભવતિ । તચ્ચિત્તં તમોગુણાધિક્યે સત્યાસુરીં સમ્પદમુપચિન્વત્પીનં ભવતિ । તથાહ વસિષ્ઠઃ-
"અનાત્મન્યાત્મભાવેન દેહભાવનયા તથા ।
પુત્રદારૈઃ કુટુમ્બૈશ્ચ ચેતો ગચ્છતિ પીનતામ્ ॥

અહઙ્કારવિકારેણ મમતામલલીલયા ।
ઇદં મમેતિભાવેન ચેતો ગચ્છતિ પીનતામ્ ॥

આધિવ્યાધિવિલાસેન સમાશ્વાસેન સંસૃતૌ ।
હેયાદેયવિભાગેન ચેતો ગચ્છતિ પીનતામ્ ॥

સ્નેહેન ધનલોભેન લાભેન મણિયોષિતામ્ ।
આપાતરમણીયેન ચેતો ગચ્છતિ પીનતામ્ ॥

દુરાશાક્ષીરપાનેન ભોગાનિલબલેન ચ ।
આસ્થાદાનેન ચારેણ ચિત્તાહિર્યાતિ પીનતામ્" ॥ - (લઘુયોગવાસિષ્ઠે ૨૪.૧૭-૨૧) ઇતિ ॥

આસ્થા નામ પ્રપઞ્ચે સત્યત્વબુદ્ધિઃ, તસ્યા આદાનમઙ્ગીકારઃ, સ એવ ચારો ગમનાગમનક્રિયા તેનેતિ । તદેવં વિનાશનીયયોર્વાસનામનસોઃ સ્વરૂપં નિરૂપિતમ્ ।

અથ વાસનાક્ષયમનોનાશૌ ક્રમેણ નિરૂપ્યેતે । તત્ર વાસનાક્ષયપ્રકારમાહ વસિષ્ઠઃ-

"બન્ધો હિ વાસનાબન્ધો મોક્ષઃ સ્યાદ્વાસનાક્ષયઃ ।
વાસનાસ્ત્વં પરિત્યજ્ય મોક્ષાર્થિત્વમપિ ત્યજ ॥

માનસીર્વાસનાઃ પૂર્વં ત્યક્ત્વા વિષયવાસનાઃ ।
મૈત્ર્યાદિભાવનાનામ્નીર્ગૃહાણામલવાસનાઃ ॥

તા અપ્યન્તઃ પરિત્યજ્ય તાભિર્વ્યવહરન્નપિ ।
અન્તઃ શાન્તતમસ્નેહો ભવ ચિન્માત્રવાસનઃ ॥

તામપ્યન્તઃ પરિત્યજ્ય મનોબુદ્ધિસમન્વિતામ્ ।
શેષે સ્થિરસમાસીનો યેન ત્યજસિ તત્ત્યજ" ॥ - (લઘુયોગવાસિષ્ઠે ૧૮.૨૦-૨૩) ઇતિ ॥

અત્ર માનસવાસનાશબ્દેન પૂર્વોક્તાસ્તિસ્રો લોકશાસ્ત્રદેહવાસના વિવક્ષિતાઃ । વિષયવાસનાશબ્દેન દમ્ભદર્પાદ્યાસુરસમ્પદ્વિવક્ષિતા । મૃદુતીવ્રત્વે તદ્વિવક્ષાભેદકારણે । યદ્વા શબ્દસ્પર્શરૂપરસગન્ધા વિષયાઃ, તેષાં કામ્યમાનત્વદશાજન્યઃ સંસ્કારો માનસવાસના । ભુજ્યમાનત્વદશાજન્યઃ સંસ્કારો વિષયવાસના । અસ્મિન્પક્ષે પૂર્વોક્તાનાં ચતસૃણામનયોરેવાન્તર્ભાવઃ, અન્તર્બાહ્યવ્યતિરેકેણ વાસનાન્તરાસમ્ભવાત્ ।

નનુ વાસનાયાઃ પરિત્યાગઃ કથં ઘટતે ? ન હિ તાસાં મૂર્તિરસ્તિ સમ્માર્જનીસમૂહિતધૂલિતૃણવદ્ધસ્તેનોદ્ધૃત્ય બહિસ્ત્યક્ષ્યામઃ ।

મૈવમ્; ઉપવાસજાગરણવત્તદુપપત્તેઃ । સ્વભાવપ્રાપ્તયોર્ભુજિક્રિયાનિદ્રયોરમૂર્તત્વેઽપિ તત્પરિત્યાગરૂપે ઉપવાસજાગરણે સર્વૈરપ્યનુષ્ઠીયેતે; તદ્વદત્રાપ્યસ્તુ ।

"અદ્ય સ્થિત્વા નિરાહારં" ** ઇત્યાદિમન્ત્રેણ સઙ્કલ્પં કૃત્વા સાવધાનત્વેનાવસ્થાનં તત્ર ત્યાગ ઇતિ ચેત્,

** અદ્ય સ્થિત્વા નિરાહારઃ સર્વભોગવિવર્જિતઃ ।

શ્વો ભક્ષ્યે પુણ્ડરીકાક્ષ શરણં મે ભવાચ્યુત ॥ -પદ્મપુરાણે ઉત્તરખણ્ડે (૬) ૬૧.૨૩॥

અત્રાપિ ન તદ્દણ્ડનિવારિતમ્, પ્રેષમન્ત્રેણ સઙ્કલ્પ્યાપ્રમત્તત્વેનાવસ્થાતું શક્યત્વાત્ । વૈદિકમન્ત્રાનધિકારિણાં તુ ભાષયા સઙ્કલ્પોઽસ્તુ । યદિ તત્ર શાકસૂપૌદનાદિસન્નિધિત્યાગસ્તર્હ્યત્રાપિ સ્રક્ચન્દનવનિતાસન્નિધિપરિત્યાગોઽસ્તુ । અથ તત્ર બુભુક્ષાનિદ્રાલસ્યાદિવિસ્મારકૈઃ પુરાણશ્રવણદેવપૂજા-નૃત્યગીતવાદિત્રાદિભિશ્ચિત્તમુપલાલ્યેત, તર્હ્યત્રાપિ મૈત્ર્યાદિભિસ્તદુપલાલયેત્ । મૈત્ર્યાદયશ્ચ પતઞ્જલિના સૂત્રિતાઃ- "મૈત્રીકરુણામુદિતોપેક્ષાણાં સુખદુઃખપુણ્યાપુણ્યવિષયાણાં ભાવનાતશ્ચિત્તપ્રસાદનં" (૧.૩૩) ઇતિ ।

ચિત્તં હિ રાગદ્વેષપુણ્યપાપૈઃ કલુષીક્રિયતે । રાગદ્વેષૌ ચ પતઞ્જલિઃ સૂત્રયામાસ - "સુખાનુશયી રાગઃ" (૨.૭) ; "દુઃખાનુશયી દ્વેષઃ" (૨.૮) ઇતિ । સ્વેનાનુભૂયમાનં સુખમનુશેતે કશ્ચિદ્ધીવૃત્તિવિશેષઃ "સુખજાતીયં મે સર્વં ભૂયાત્" ઇતિ । તચ્ચ દૃષ્ટાદૃષ્ટસામગ્ર્યભાવાન્ન સમ્પાદયિતું શક્યમ્ । અતઃ સ રાગશ્ચિત્તં કલુષીકરોતિ ।

યદા સુખષ્વયં મૈત્રીં ભાવયેત્ "સર્વેઽપ્યેતે સુખિનો મદીયાઃ" ઇતિ , તદા તત્સુખં સ્વકીયમેવ સમ્પન્નમિતિ ભાવયતસ્તત્ર રાગો નિવર્તતે, યથા સ્વસ્ય રાજ્યાભાવેઽપિ પુત્રાદિરાજ્યમેવ સ્વકીયં રાજ્યં તદ્વત્ । નિવૃત્તે ચ રાગે વર્ષાસ્વતીતાસુ શરત્સરિદિવ ચિત્તં પ્રસીદતિ ।

તથા દુઃખમનુશેતે કશ્ચિત્પ્રત્યયઃ "ઈદૃશં સર્વં દુઃખં સર્વદા મે મા ભૂત્" ઇતિ । તચ્ચ રોગશત્રુવ્યાઘ્રાદિષુ સત્સુ ન નિવારયિતું શક્યમ્ । ન ચ સર્વે દુઃખહેતવો હન્તું શક્યન્તે । તતઃ સ દ્વેષઃ સદા હૃદયં દહતિ । યદા સ્વસ્યેવ પરેષાં સર્વેષાં પ્રતિકૂલં દુઃખં મા ભૂદિત્યનેન પ્રકારેણ કરુણાં દુઃખિષુ પ્રાણિષુ ભાવયેત્ તદા વૈર્યાદિદ્વેષનિવૃત્તૌ ચિત્તં પ્રસીદતિ । અત એવ સ્મર્યતે -

"પ્રાણા યથાત્મનોઽભીષ્ટા ભૂતાનામપિ તે તથા ।
આત્મૌપમ્યેન ભૂતાનાં દયાં કુર્વન્તિ સાધવઃ" ॥ - (મહાભારતે ૧૩.૧૧૬.૨૧-૨૨**) ॥

(**આત્મૌપમ્યેન ગન્તવ્યં બુદ્ધિમદ્ભિર્મહાત્મભિઃ)

તત્પ્રકારં ચ મહાન્તો દર્શયન્તિ-

"સર્વેઽત્ર સુખિનઃ સન્તુ સર્વે સન્તુ નિરામયાઃ ।
સર્વે ભદ્રાણિ પશ્યન્તુ મા કશ્ચિદ્દુઃખમાપ્નુયાત્" ॥ ઇતિ ।

તથા હિ પ્રાણિનઃ સ્વભાવત એવ પુણ્ય નાનુતિષ્ઠન્તિ, પાપં ત્વનુતિષ્ઠન્તિ । તદાહુઃ-

"પુણ્યસ્ય ફલમિચ્છન્તિ પુણ્યં નેચ્છન્તિ માનવાઃ ।
ન પાપફલમિચ્છન્તિ પાપં કુર્વન્તિ યત્નતઃ" ॥ ઇતિ ।

તે ચ પુણ્યપાપે પશ્ચાત્તાપં જનયતઃ । સ ચ તાપઃ શ્રુત્યાનૂદ્યતે- "કિમહં સાધુ નાકરવમ્, કિમહં પાપમકરવમ્" (તૈ૦ ઉપ૦ ૨.૯) ઇતિ ।

યદ્યસૌ પુણ્યપુરુષેષુ મુદિતાં ભાવયેત્ તદા તદ્વાસનયા સ્વયમેવાપ્રમત્તઃ પુણ્યેષુ પ્રવર્તેત । તથા પાપિષૂપેક્ષાં ભાવયન્ સ્વયમપિ પાપાન્નિવર્તેત । અતઃ પશ્ચાત્તાપસ્યાભાવેન ચિત્તં પ્રસીદતિ । સુખિષુ મૈત્રીં ભાવયતો ન કેવલં રાગનિવૃત્તિઃ કિં ત્વસૂયેર્ષ્યાદયોઽપિ નિવર્તન્તે । ગુણેષુ દોષાવિષ્કરણમસૂયા, પરગુણાનામસહનમીર્ષ્યા । યદા મૈત્રીવશાત્પરકીયં સુખં સ્વકીયમેવ સમ્પદ્યતે, તદા કથમસૂયાદિકંસમ્ભવેત્ ? એવં દોષાન્તરનિવૃત્તિરપિ યથાયોગમુન્નેયા । દુઃખિષુ

કરુણાં ભાવયતઃ શત્રુધાદિકરો દ્વેષો યદા નિવર્તતે, તદા દુઃખિત્વપ્રતિયોગિકસ્વસુખિત્વપ્રયુક્તો દર્પોઽપિ નિવર્તતે ।
સ ચ દર્પ આસુરસમ્પદ્યહઙ્કાર પ્રસ્તાવે પૂર્વં નિરૂપિતઃ -
“ઈશ્વરોઽહમહં ભોગી સિદ્ધોઽહં બલવાન્સુખી” ।
“આઢ્યોઽભિજનવાનસ્મિ કોઽન્યોઽસ્તિસદૃશો મયા” । - (ભગવદ્ગીતાયાં ૧૬.૧૪, ૧૫) ઇત્યાદિ ॥

નનુ પુણ્યાત્મસુ મુદિતાં ભાવયતઃ પુણ્યપ્રવૃત્તિઃ ફલત્વેનોક્તા, સા ચ યોગિનો ન યુક્તા, મલિનાયાં શાસ્ત્રવાસનાયાં પુણ્યમન્તર્ભાવ્ય પૂર્વમુદાહૃતત્વાત્ । મૈવમ્, પુનર્જન્મકારણસ્ય કામ્યેષ્ટાપૂતદિસ્તત્ર મલિનત્વેનોદાહરણાત્ । ઇહ તુ યોગાભ્યાસજન્યમશુક્લાકૃષ્ણત્વેન જન્માનાપાદકં પુણ્યં વિવક્ષિતમ્ ।
અશુક્લાકૃષ્ણત્વં પતઞ્જલિઃ સૂત્રયામાસ-
“કર્માશુક્લકૃષ્ણં યોગિનસ્ત્રિવિધમિતરેષાં” (૪.૭) ઇતિ । કામ્યં કર્મ વિહિતત્વાચ્છુક્લમ્, નિષિદ્ધં કૃષ્ણમ્, મિશ્રં શુક્લકૃષ્ણમ્ । તદેતત્ત્રયમિતરેષામયોગિનાં સમ્પદ્યતે । તચ્ચ ત્રિવિધં જન્મ પ્રયચ્છતિ । તદાહુર્વિશ્વરૂપાચાર્યાઃ-
“શુભૈઃ પ્રાપ્નોતિ દેવત્વં નિષિદ્ધૈર્નારકીં ગતિમ્ ।
ઉભાભ્યાં પુણ્યપાપાભ્યાં માનુષ્યં લભતેઽવશઃ” । - (નૈષ્કર્મ્યસિદ્ધૌ ૧.૪૧) ઇતિ ॥

નનુ યોગસ્યાનિષિદ્ધત્વાદકૃષ્ણત્વેઽપિ વિહિતત્વાચ્છુક્લત્વમિતિ ચેત્,
મૈવમ્, અકામ્યત્વાભિપ્રાયેણાશુક્લત્વાભિધાનાત્ । અતોઽશુક્લકૃષ્ણે પુણ્યે પ્રવૃત્તિર્યોગિનોઽપેક્ષિતા ।
નનુ યોગિનોઽપ્યનેન ન્યાયેન યથોચિતં પુણ્યાત્મસુ મુદિતાં ભાવયિત્વા પુણ્યેષ્વેવ પ્રવર્તેરન્નિતિ ચેત્,
પ્રવર્તન્તાં નામ, યે મૈત્ર્યાદિભિશ્ચિત્તં પ્રસાદયન્તિ તેષામેવ યોગિત્વાત્ । મૈત્ર્યાદિચતુષ્ટયમુપલક્ષણમ્। તેન “અભયં સત્ત્વસંશુદ્ધિઃ” (ભગવદ્ગીતાયાં ૧૬.૧) ઇત્યાદિદૈવસમ્પત્ “અમાનિત્વમદમ્ભિત્વમ્” (તત્રૈવ ૧૩.૭) ઇત્યાદિ જ્ઞાનસાધનાનિ જીવન્મુક્તસ્થિતપ્રજ્ઞાદિવચનોક્તા ધર્માશ્ચોપલક્ષ્યતે, સર્વેષામેતેષાં શુભવાસના-રૂપત્વેન મલિનવાસનાનિવર્તકત્વાત્ ।
નનુ સન્ત્યનન્તાઃ શુભવાસનાઃ, ન ચૈકેન તાઃ સર્વા અભ્યસિતું શક્યન્તે; નિરર્થકશ્ચ તદભ્યાસપ્રયાસ ઇતિ ચેત્,
ન; તન્નિવર્ત્યાનામનન્તાનાં મલિનવાસનાનામેકસ્ય મનસ્યસમ્ભવાત્ । ન હ્યાયુર્વેદોક્તાનિ સર્વાણ્યૌષધાન્યેકેન સેવિતું શક્યન્તે । નાપિ તન્નિવર્ત્યાઃ સર્વે રોગા એકસ્ય દેહે સમ્ભવન્તિ । એવં તર્હિ સ્વચિત્તં પ્રથમતઃ પરીક્ષ્ય તત્ર યદા યાવત્યો મલિનવાસનાસ્તદા તાવતીર્વિરોધિનીઃ શુભવાસના અભ્યસ્યેત્ । યથા પુત્રમિત્રકલત્રાદિભિઃ પીડ્યમાનસ્તતો વિરક્તસ્તન્નિવર્તકં પારિવ્રાજ્યં ગૃહ્ણાતિ, તથા વિદ્યામદધનમદકુલાચારમદાદિમલિનવાસનાભિઃ પીડ્યમાનસ્તદ્વિરોધિનં વિવેકમભ્યસ્યેત્ । સ ચ વિવેકો જનકેન દર્શિતઃ-
“અદ્ય યે મહતાં મૂર્ધ્નિ તે દિનૈર્નિપતન્ત્યધઃ ।
હન્ત ચિત્ત મહત્તાયાઃ કૈષા વિશ્વસ્તતા તવ” ॥ - (લઘુયોગવાસિષ્ઠે ૧૯.૩૯) ॥

“ક્વ ધનાનિ મહીપાનાં બ્રહ્મણઃ ક્વ જગન્તિ વા ।
પ્રાક્તનાનિ પ્રયાતાનિ કેયં વિશ્વસ્તતા તવ ॥ ૧૫૦॥

કોટયો બ્રહ્મણાં યાતા ગતાઃ સ્વર્ગપરમ્પરાઃ ।

પ્રયાતાઃ પાંસુવદ્ભૂપાઃ કા ધૃતિર્મમ જીવિતે" । - (તત્રૈવ ૧૯.૪૧, ૪૨) ॥

"યેષાં નિમેષણોન્મેષૌ જગતઃ પ્રલયોદયૌ ।
તાદૃશાઃ પુરુષા નષ્ટા માદૃશાં ગણનૈવ કા" ॥ - (તત્રૈવ ૧૯.૪૯) ઇતિ ॥

નન્વયમપિ વિવેકસ્તત્ત્વજ્ઞાનોદયાત્પ્રાચીનઃ નિત્યાનિત્યવસ્તુવિવેકાદિસાધનવ્યતિરેકેણ બ્રહ્મજ્ઞાના-સમ્ભવાત્, ઇહ તૂત્પન્નબ્રહ્મસાક્ષાત્કારસ્ય જીવન્મુક્તયે વાસનાક્ષયાદિસાધનં વક્તુમુપક્રાન્તં અતઃ કિમિદમકાણ્ડે તાણ્ડવમિતિ ચેત્ ।

નાયં દોષઃ । સાધનચતુષ્ટયસમ્પન્નસ્ય પશ્ચાદ્બ્રહ્મજ્ઞાનમિત્યેષ સર્વપુરુષસાધારણઃ પ્રૌઢો રાજમાર્ગઃ । જનકસ્ય તુ પુર્વપુણ્યપુઞ્જપરિપાકેણાકાશફલપાતવદકસ્માત્સિદ્ધગીતાશ્રવણમાત્રેણ તત્ત્વજ્ઞાનમુત્પન્નમ્। તતશ્ચ ચિત્તવિશ્રાન્તયે વિવેકોઽયં ક્રિયતે ઇતિ કાણ્ડ વેદમુચિતં તાણ્ડવમ્ ।

નન્વેવમપ્યસ્ય વિવેકસ્ય જ્ઞાનસમનન્તરભાવિત્વેન મલિનવાસનાનુવૃત્ત્યભાવાચ્છુદ્ધવાસનાભ્યાસો નાપેક્ષિત ઇતિ ચેત્,

ન, જનકસ્ય તદનુવૃત્ત્યભાવેઽપિ યાજ્ઞવલ્ક્યભગીરથાદેસ્તદનુવૃત્તિદર્શનાત્ । અસ્તિ હિ યાજ્ઞવલ્ક્યસ્ય તત્પ્રતિવાદિનામુષસ્તકહોલાદીનાં ચ ભૂયાન્વિદ્યામદઃ, તૈઃ સર્વૈરપિ વિજિગીષુકથાયાં પ્રવૃત્તત્વાત્ ।

નનુ તેષાં વિદ્યાન્તરમેવાસ્તિ ન તુ બ્રહ્મવિદ્યેતિ ચેત્,

ન, કથાગતયોઃ પ્રશ્નોત્તરયોર્બ્રહ્મવિષયત્વાત્ ।

નનુ બ્રહ્મવિષયત્વેઽપિ તેષામાપાતતો જ્ઞાનમેવ ન તુ સમ્યગ્વેદનમિતિ ચેત્,

ન, તથા સત્યસ્માકમપિ તદીયવાક્યૈરુત્પન્નાયા બ્રહ્મવિદ્યાયા અસમ્યક્ત્વપ્રસઙ્ગાત્ ।

નનુ સમ્યક્ત્વેઽપિ પરોક્ષજ્ઞાનમેવેતિ ચેત્,

ન, "યત્સાક્ષાદપરોક્ષાદ્બ્રહ્મ" (બૃ૦ ઉપ૦ ૩.૪.૧) ઇતિ મુખ્યાપરોક્ષવિષયતયૈવ વિશેષતઃ પ્રશ્નોપલમ્ભાત્ ।

નન્વાત્મજ્ઞાનિનો વિદ્યામદ આચાર્યૈર્નાભ્યુપગમ્યતે; તથા ચોપદેશસાહસ્ચામભિહિતં

"બ્રહ્મવિત્ત્વં તથા મુક્ત્વા સ આત્મજ્ઞો ન ચેતરઃ" । (૧૨.૧૩) ઇતિ ।

નૈષ્કર્મ્યસિદ્ધાવપિ-

"ન ચાધ્યાત્માભિમાનોઽપિ વિદુષોઽસ્ત્યાસુરત્વતઃ ।
વિદુષોઽપ્યાસુરશ્ચેત્સ્યાન્નિષ્ફલં બ્રહ્મદર્શનમ્" ॥ (૧.૭૫) ઇતિ ।

ઇતિ ચેત્,

નાયં દોષઃ । જીવન્મુક્તિપર્યન્તસ્ય તત્ત્વજ્ઞાનસ્ય તત્ર વિવક્ષિતત્વાત્ । ન ખલુ વયમપિ જીવન્મુક્તાનાં વિદ્યામદમભ્યુપગચ્છામઃ ।

નનુ વિજિગીષોરાત્મબોધ એવ નાસ્તિ,

"રાગો લિઙ્ગમબોધસ્ય ચિત્તવ્યાયામભૂમિષુ ।
કુતઃ શાદ્વલતા તસ્ય યસ્યાગ્નિઃ કોટરે તરોઃ ॥ - (નૈષ્કર્મ્ય સિદ્ધૌ ૪.૬૭) ॥

ઇત્યાચાર્યૈરભ્યુપગમાદિતિ ચેત્,

ન ।

“રાગાદયઃ સન્તુ કામં ન તદ્ભાવોઽપરાધ્યતિ” । - (બૃહદારણ્યોપનિષદ્ભાષ્યવાર્ત્તિકે ૧.૪.૧૫૩૯) ॥

“ઉત્ખાતદંષ્ટ્રોરગવદવિદ્યા કિં કરિષ્યતિ” ॥ - (તત્રૈવ ૧.૪.૧૭૪૬) ॥

ઇત્યત્ર તૈરેવ રાગાદ્યભ્યુપગમાત્ । ન ચાત્ર પરસ્પરવ્યાહતિઃ, સ્થિતપ્રજ્ઞે જ્ઞાનિમાત્રે ચ વચનદ્વયસ્ય વ્યવસ્થાપનોપયુક્તત્વાત્ ।
નનુ જ્ઞાનિનો રાગાદ્યભ્યુપગમે ધર્માધર્મદ્વારેણ જન્માન્તરપ્રસઙ્ગ ઇતિ ચેત્,
મૈવમ્, અદગ્ધબીજવદવિદ્યાપૂર્વકકામાદેરેવ મુખ્યરાગાદિત્વેન પુનર્જન્મહેતુત્વાત્ । જ્ઞાનિનસ્તુ દગ્ધબીજવદાભાસમાત્રા એવ રાગાદયઃ । એતદેવાભિપ્રેત્યોક્તં -
“ઉત્પદ્યમાના રાગાદ્યા વિવેકજ્ઞાનવહ્નિના ।
તદા તદૈવ દહ્યન્તે કુતસ્તેષાં પ્રરોહણમ્” ॥ - (વરાહોપનિષદિ ૩.૨૪.૨૫) ઇતિ ॥

તર્હિ સ્થિતપ્રજ્ઞસ્યાપિ તે સન્ત્વિતિ ચેત્,
ન, તત્કાલે મુખ્યવદેવાભાસમાનાનાં બાધકત્વાત્; રજ્જુસર્પોઽપિ મુખ્યસર્પવદેવ તદાનીં ભીષયન્નુપલભ્યતે, તદ્વત્ ।
તર્હ્યાભાસત્વાનુસન્ધાનાનુવૃત્તૌ ન કોઽપિ બાધ ઇતિ ચેત્,
ચિરં જીવતુ ભવાન્ । ઇયમેવાસ્મદભિમતા જીવન્મુક્તિઃ । યાજ્ઞવલ્ક્યસ્તુ વિજિગીષુદશાયાં પં ન હીદૃશઃ, ચિત્તવિશ્રાન્તયે વિદ્વત્સંન્યાસસ્ય તેન કરિષ્યમાણત્વાત્ । ન કેવલમસ્ય વિજિગીષા કિન્તુ ધનતૃષ્ણાપિ મહતી જાતા, યતો, બહૂનાં બ્રહ્મવિદાં પુરતઃ સ્થાપિતં સાલઙ્કારં ગોસહસ્રમપહૃત્ય સ્વયમેવેદમાહ - “નમો વયં બ્રહ્મિષ્ઠાય કુર્મો ગોકામા એવ વયં સ્મઃ” (બૃ૦ ઉપ૦ ૩.૧.૨) ઇતિ ।
ઇતરાન્ બ્રહ્મવિદોઽવજ્ઞાતુમિયં કાચિદ્વચોભઙ્ગીતિ ચેત્ ।
અયમપિ તર્હ્યપરો દોષઃ । ઇતરે ચ બ્રહ્મવિદઃ સ્વકીયં ધનમનેનાપહૃતમિતિમત્વા ચુક્રુધઃ । અયં ચ ક્રોધપરવશઃ શાકલ્યં શાપેન મારયામાસ । ન ચાસ્ય બ્રહ્મઘ્નો મોક્ષાભાવઃ શઙ્કનીયઃ । યતઃ કૌષીતકિનઃ સમામનન્તિ - “નાસ્ય કેન ચ કર્મણા લોકો મીયતે ન માતૃવધેન ન પિતૃવધેન ન સ્તેયેન ન ભ્રૂણહત્યયા” (૩.૧) ઇતિ ।
શેષોઽપિ સ્વકૃતાયામાર્યાપઞ્ચાશીત્યામિદગાહ-
“હયમેધશતસહસ્રાણ્યથ કુરુતે બ્રહ્મઘાતલક્ષાણિ ।
પરમાર્થવિત્ર પુણ્યૈર્ન ચ પાપૈઃ સ્પૃશ્યતે વિમલઃ” ॥ - (પરમાર્થસારે ૭૭) ઇતિ ॥

તસ્માત્કિં બહુના, બ્રહ્મવિદાં યાજ્ઞવલ્ક્યાદીનામસ્ત્યેવ મલિનવાસનાનુવૃત્તિઃ, ભગીરથસ્તુ તત્ત્વં વિદિત્વાપિ રાજ્યં પાલયન્મલિનવાસનાભિશ્ચિત્તવિશ્રાન્ત્યભાવે સતિ સર્વં પરિત્યજ્ય પશ્ચાદ્વિશ્રાન્તવાનિતિ વસિષ્ઠેનોપાખ્યાયતે । અતઃ સ્વકીયં વર્તમાનં મલિનવાસનાદોષં પરકીયદોષવત્સમ્યગુત્પ્રેક્ષ્ય તત્પ્રતીકારમભ્યસ્યેત્ । અનેનૈવાભિપ્રાયેણ સ્મર્યતે-
“યથા સુનિપુણઃ સમ્યક્પરદોષેક્ષણે રતઃ ।
તથા ચેન્નિપુણઃ સ્વેષુ કો ન મુચ્યેત બન્ધનાત્” ॥ - (વરાહોપનિષદિ ૩.૨૫) ઇતિ ॥

નન્વાદૌ તાવદ્વિદ્યામદસ્ય કઃ પ્રતીકાર ઇતિ ચેત્,

કિં સ્વનિષ્ઠસ્ય પરવિષયસ્ય મદસ્ય, કિંવા સ્વવિષયસ્ય પરનિષ્ઠસ્ય ? આદ્યે ભઙ્ગોઽવશ્યં ક્વચિદ્ભવિષ્યતીતિ નિરન્તરં ભાવયેત્ । તદ્યથા શ્વેતકેતુર્વિદ્યયા મત્તઃ પ્રવાહણસ્ય રાજ્ઞઃ સભાં ગત્વા તેન પઞ્ચાગ્નિવિદ્યાયાં પૃષ્ટાયાં સ્વયમજાનાનો નિરુત્તરો રાજ્ઞા બહુધા ભર્ત્સિતઃ પિતુઃ સમીપમાગત્ય સ્વનિર્વેદમુદાજહાર । પિતા તુ નિર્મદસ્તમેવ રાજાનમનુસૃત્ય તાં વિદ્યાં લેભે । દૃપ્તબાલાકિશ્ચાજાતશત્રુણા રાજ્ઞા ભર્ત્સિતો દર્પં સન્ત્યજ્ય રાજાનમુપસસાદ। ઉષસ્તકહોલાદયશ્ચ મદેન કથાં કૃત્વા પરાજિતાઃ । યદા સ્વવિષયઃ પરનિષ્ઠો મદઃ પ્રવર્તેત તદા મત્તઃ સ પરો માં નિન્દતુ, અવમન્યતાં વા સર્વથાપિ ન મે હાનિરિતિ ભાવયેત્ । તથા હિ -

"આત્માનં યદિ નિન્દન્તિ નિન્દન્તિ સ્વયમેવ હિ ।
શરીરં યદિ નિન્દન્તિ સહાયાસ્તે મતા મમ ॥

નિન્દાવમાનાવત્યન્તં ભૂષણં યસ્ય યોગિનઃ ।
વિક્ષેપઃ કથં તસ્ય વાચાટૈઃ ક્રિયતામિહ" । ઇતિ ।

નૈષ્કર્મ્યસિદ્ધૌ-
"વર્ચસ્કે સમ્પરિત્યક્તે દોષતશ્ચાવધારિતે ।
યદિ દોષં વદેત્ તસ્મૈ કિં તત્રોચ્ચરિતુર્ભવેત્" ॥ (૨.૧૬) ।
"તદ્વત્સ્થૂલે તથા સૂક્ષ્મે દેહે ત્યક્તે વિવેકતઃ ।
યદિ દોષં વદેત્ તાભ્યાં કિં તત્ર વિદુષો ભવેત્" ॥ (૨.૧૭) ॥

"શોકહર્ષભયક્રોધલોભમોહસ્પૃહાદયઃ ।
અહઙ્કારસ્ય દૃશ્યન્તે જન્મ મૃત્યુશ્ચ નાત્મનઃ" ॥ - (ભાગવતે ૧૧.૨૮.૧૬) ઇતિ ॥

નિન્દાયા ભૂષણત્વં ચ જ્ઞાનાઙ્કુશે દર્શિતમ્-
"મન્નિન્દયા યદિ જનઃ પરિતોષમેતિ
નન્વપ્રયત્નસુલભોઽયમનુગ્રહો મે ।
શ્રેયોર્થિનો હિ પુરુષાઃ પરતુષ્ટિહેતો-
ર્દુઃખાર્જિતાન્યપિ ધનાનિ પરિત્યજન્તિ ॥

સતતસુલભદૈન્યે નિઃસુખે જીવલોકે
યદિ મમ પરિવાદાત્ પ્રીતિમાપ્નોતિ કશ્ચિત્ ।
પરિવદતુ યથેષ્ટં મત્સમક્ષં તિરો વા
જગતિ હિ બહુદુઃખે દુર્લભઃ પ્રીતિયોગઃ" ॥ ઇતિ ।

અવમાનસ્ય ભૂષણત્વં સ્મર્યતે-
"તથા ચરેત વૈ યોગી સતાં ધર્મમદૂષયન્ ।
જના યથાવમન્યેરન્ ગચ્છેયુર્નૈવ સઙ્ગતિમ્" ॥ - (નારદપરિ। ઉપ૦ .૫.૩૦) ઇતિ ॥

યાજ્ઞવલ્ક્યોષસ્તાદીનાં યૌ સ્વનિષ્ઠપરનિષ્ઠૌ વિદ્યામદૌ તયોર્યથા વિવેકેન પ્રતીકારસ્તથા ધનાભિલાષક્રોધયોરપ્યવગન્તવ્યઃ ।

“અર્થાનામર્જને ક્લેશસ્તથૈવ પરિપાલને ।
નાશે દુઃખં વ્યયે દુઃખં ધિગર્થાન્ક્લેશકારિણઃ” ॥

ઇતિ ધનવિષયે વિવેકઃ ॥

(અર્થાનામર્જને દુઃખમર્જિતાનાં ચ રક્ષણે ।
નાશે દુઃખં વ્યયે દુઃખં ધિગર્થં દુઃખભાજનમ્ ॥ - મહાભારત)
ક્રોધોઽપિ દ્વિવિધઃ - સ્વનિષ્ઠઃ પરવિષયઃ, પરનિષ્ઠઃ સ્વવિષયશ્ચેતિ । તત્ર સ્વનિષ્ઠં પરવિષયં પ્રત્યેવમુક્તમ્-
“અપકારિણિ કોપશ્ચેત્ કોપઃ કોપે કથં ન તે ।
ધર્માર્થકામમોક્ષાણાં પ્રસહ્ય પરિપન્થિનિ” ॥ - (યાજ્ઞવલ્ક્યોપનિષદિ ૨૦) ॥

“ફલાર્થિનો ધર્મયશોર્થનાશનઃ
સ ચેદપાર્થઃ, સ્વશરીરતાપનઃ ।
ન ચેહ નામુત્ર હિતાય યઃ સતાં
મનાંસિ કોપઃ સમુપાશ્રયેત્ કથમ્” ॥ ઇતિ ।
સ્વવિષયં પરનિષ્ઠં પ્રત્યેવમીરિતં -
“ન મેઽપરાધઃ કિમકારણે નૃણાં
મદભ્યસૂયેત્યપિ નૈવ ચિન્તયેત્ ।
ન યત્કૃતા પ્રાગ્ભવબન્ધનિષ્કૃતિ-
સ્તતોઽપરાધઃ પરમોઽનુચિન્ત્યતામ્” ॥

“નમોઽસ્તુ કોપદેવાય સ્વાશ્રયજ્વાલિને ભૃશમ્ ।
કોપ્યસ્ય મમ વૈરાગ્યદાયિને દોષબોધિને” ॥ ઇતિ । - (યાજ્ઞવલ્ક્યોપનિષદિ ૨૧) ॥

ધનાભિલાષક્રોધવદ્યોષિત્પુત્રાભિલાષાવપિ વિવેકેન નિવર્તનીયૌ । તત્ર યોષિદ્વિવેકો વસિષ્ઠેન દર્શિતઃ-
“માંસપાઞ્ચાલિકાયાસ્તુ યન્ત્રલોલેઽઙ્ગપઞ્જરે ।
સ્નાય્વસ્થિગ્રન્થિશાલિન્યાઃ સ્ત્રિયાઃ કિમિવ શોભનમ્ ॥ - (લઘુયોગવાસિષ્ઠે ૨.૯૦) ॥

“ત્વઙ્માંસરક્તવાષ્પામ્બુ પૃથક્કૃત્વા વિલોચને ।
સમાલોકય રમ્યે ચેત્ કિં મુધા પરિમુહ્યસિ ॥ ૨.૯૧॥

“મેરુશૃઙ્ગતટોલ્લાસિગઙ્ગાજલરયોપમા ।
દૃષ્ટા યસ્મિન્સ્તને મુક્તાહારસ્યોલ્લાસશાલિતા ॥ ૨.૯૨॥

શ્મશાનેષુ દિગન્તેષુ સ એવ લલનાસ્તનઃ ।

શ્વભિરાસ્વાદ્યતે કાલે લઘુપિણ્ડ ઇવાન્ધસઃ ॥ ૨.૯૩॥

"કેશકજ્જલધારિણ્યો દુઃસ્પર્શા લોચનપ્રિયાઃ ।
દુષ્કૃતાગ્નિશિખા નાર્યો દહન્તિ તૃણવન્નરાન્ ॥ ૨.૯૪॥

"જ્વલતામતિદૂરેઽપિ સરસા અપિ નીરસાઃ ।
સ્ત્રિયો હિ નરકાગ્નીનામિન્ધનં ચારુ દારુણમ્ ॥ ૨.૯૫॥

"કામનામ્ના કિરાતેન વિકીર્ણા મુગ્ધચેતસામ્ ।
નાર્યો નરવિહઙ્ગાનામઙ્ગબન્ધનવાગુરાઃ ॥ ૨.૯૬॥

"જન્મપલ્વલમત્સ્યાનાં ચિત્તકર્દમચારિણામ્ ।
પુંસાં દુર્વાસનારજ્જૌ નારી બડિશપિણ્ડિકા ॥ ૨.૯૭॥

"સર્વેષાં દોષરત્નાનાં સુસમુદ્ગિકયાનયા ।
દુઃખશ‌ૃઙ્ખલયા નિત્યમલમસ્તુ મમ સ્ત્રિયા ॥ ૨.૯૮॥

"ઇતો માંસમિતો રક્તમિતોઽસ્થીનીતિ વાસરૈઃ ।
બ્રહ્મન્કતિપયૈરેવ યાતિ સ્ત્રી વિશરારુતામ્ ॥ ૨.૯૯॥

"યસ્ય સ્ત્રી તસ્ય ભોગેચ્છા નિઃસ્ત્રીકસ્ય ક્વ ભોગભૂઃ ।
સ્ત્રિયં ત્યક્ત્વા જગત્ત્યક્તં જગત્ત્યક્ત્વા સુખી ભવેત્" ॥ (૨.૧૦૦)
પુત્રવિવેકો બ્રહ્માનન્દે દર્શિતઃ-
"અલભ્યમાનસ્તનયઃ પિતરૌ ક્લેશયેચ્ચિરમ્ ।
લબ્ધોઽપિ ગર્ભપાતેન પ્રસવેન ચ બાધતે ॥ - (પઞ્ચદશ્યાં ૧૨.૬૫) ॥

"જાતસ્ય ગ્રહરોગાદિઃ કુમારસ્ય ચ મૂર્ખતા ।
ઉપનીતે ત્વવિદ્યત્વમનુદ્વાહશ્ચ પણ્ડિતે ॥ ૧૨.૬૬॥

"પુનશ્ચ પરદારાદિર્દારિદ્ર્યં ચ કુટુમ્બિનઃ ।
પિત્રોર્દુઃખસ્ય નાસ્ત્યન્તો ધની ચેન્દ્રિયતે તદા" ॥ ૧૨.૬૭॥ - (પઞ્ચદશ્યાં ૧૨.૬૫ -૬૭) ઇતિ ॥

યથા વિદ્યાધનક્રોધયોષિત્પુત્રવિષયાણાં મલિનવાસનાનાં વિવેકેન પ્રતીકારસ્તથાન્યાસામપિ વાસનાનાં યથાયોગં શાસ્ત્રૈઃ સ્વયુક્ત્યા ચ દોષં વિવિચ્ય પ્રતીકારં કુર્યાત્ । કૃતે ચ પ્રતીકારે જીવન્મુક્તિલક્ષણં પરમં પદં લભ્યતે । તદાહ વસિષ્ઠઃ -
"વાસનાનાં પરિત્યાગે યદિ યત્નં કરોષ્યલમ્ ।
તત્તે શિથિલતાં યાન્તિ સર્વાધિવ્યાધયઃ ક્ષણાત્ । - (યોગવાસિષ્ઠે રામાયણે ઉપશમપ્રકરણે ૯૨.૯) ॥

"પૌરુષેણ પ્રયત્નેન બલાત્સન્ત્યજ્ય વાસનાઃ ।

સ્થિતિં બધ્નાસિ ચેત્તર્હિ પદમાસાદયસ્યલમ્" ॥ - (તત્રૈવ ૯૨.૩ -૪) ઇતિ ॥

નન્વત્ર પૌરુષઃ પ્રયત્નો નામ પૂર્વોક્તો વિષયદોષવિવેકઃ । સ ચ પુનઃ પુનઃ ક્રિયમાણોઽપિ પ્રબલેન્દ્રિયવ્યવહારેણાભિભૂયતે । તદુક્તં ભગવતા –
"યતતો હ્યપિ કૌન્તેય પુરુષસ્ય વિપશ્ચિતઃ ।
ઇન્દ્રિયાણિ પ્રમાથીનિ હરન્તિ પ્રસભં મનઃ ॥ - (ભગવદ્ગીતાયાં ૨.૬૦) ॥

"ઇન્દ્રિયાણાં હિ ચરતાં યન્મનોઽનુવિધીયતે ।
તદસ્ય હરતિ પ્રજ્ઞાં વાયુર્નાવમિવામ્ભસિ" ॥ - (તત્રૈવ ૨.૬૭) ઇતિ ॥

એવં તર્હ્યુત્પન્નવિવેકરક્ષાર્થમિન્દ્રિયાણિ નિરોદ્ધવ્યાનિ । તદપિ તત્રૈવોત્તરશ્લોકાભ્યાં દર્શિતમ્-
"તાનિ સર્વાણિ સંયમ્ય યુક્ત આસીત મત્પરઃ ।
વશે હિ યસ્યેન્દ્રિયાણિ તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા । - (તત્રૈવ ૨.૬૧) ॥

"તસ્માદ્યસ્ય મહાબાહો નિગૃહીતાનિ સર્વશઃ ।
ઇન્દ્રિયાણીન્દ્રિયાર્થેભ્યસ્તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા । " - (તત્રૈવ ૨.૬૮) ઇતિ ॥

સ્મૃત્યન્તરેઽપિ -
"ન પાણિપાદચપલો ન નેત્રચપલો યતિઃ ।
ન ચ વાક્ચપલશ્ચૈવમિતિ શિષ્ટસ્ય લક્ષણમ્" ॥ ઇતિ ।
એતદેવાન્યત્ર સઙ્ગ્રહવિવરણાભ્યાં સ્પષ્ટીકૃતમ્-
"અજિહ્વઃ ષણ્ડકઃ પઙ્ગુરન્ધો બધિર એવ ચ ।
મુગ્ધશ્ચ મુચ્યતે ભિક્ષુઃ ષડ્ભિરેતૈર્ન સંશયઃ ॥ - (નારદપરિવ્રાજકોપનિષદિ ૩.૬૨) ॥

(** ન પાણિપાદચપલો ન નેત્રચપલો ભવેત્ ।
ન ચાઙ્ગચપલો વિપ્ર (ન ચ વાગઙ્ગચપલ) ઇતિ શિષ્ટસ્ય ગોચરઃ ॥ (વસિષ્ઠસ્મૃત્યાં ૬.૩૯) ॥

ન પાણિપાદચપલો ન નેત્રચપલો મુનિઃ ।
ન ચ વાગઙ્ગચપલ ઇતિ શિષ્ટસ્ય ગોચરઃ ॥ (મહાભારતે ૧૪.૪૫.૧૮)
ન પાણિપાદચપલો ન નેત્રચપલોઽનૃજુઃ ।
ન ચ વાગઙ્ગચપલો ન ચાશિષ્ટસ્ય ગોચરઃ ॥ (સ્કન્દપુરાણે માહેશ્વરખણ્ડે ૪૧.૧૩૯-૪૦)
"ઇમિષ્ટમિદં નેતિ યોઽશ્નન્નપિ ન સજ્જતે ।
હિતં સત્યં મિતં વક્તિ તમજિહ્વં પ્રચક્ષતે" ॥ ૩.૬૩॥

"અદ્ય જાતાં યથા નારીં તથા ષોડશવાર્ષિકીમ્ ।
શતવર્ષાં ચ યો દૃષ્ટ્વા નિર્વિકારઃ સ ષણ્ડકઃ" ॥ ૩.૬૪॥

"ભિક્ષાર્થમટનં યસ્ય વિણ્મૂત્રકરણાય ચ ।

યોજનાન્ન પરં યાતિ સર્વથા પઙ્ગુરેવ સઃ" ॥ ૩.૬૫॥

"તિષ્ઠતો વ્રજતો વાપિ યસ્ય ચક્ષુર્ન દૂરગમ્ ।
ચતુર્યુગાં ભુવં ત્યક્ત્વા પરિવ્રાટ્ સોઽન્ધ ઉચ્યતે" ॥ ૩.૬૬॥

"હિતં મિતં મનોરમ્યં વચઃ શોકાપહં ચ યત્ ।
શ્રુત્વા યો ન શ ૃણોતીવ બધિરઃ સ પ્રકીર્તિતઃ" ॥ ૩.૬૭॥

"સન્નિધૌ વિષયાણાં ચ સમર્થોઽવિકલેન્દ્રિયઃ ।
સુપ્તવદ્વર્તતે નિત્યં ભિક્ષુર્મુગ્ધઃ સ ઉચ્યતે" ॥ ૩.૬૮॥

"ન નિન્દાં ન સ્તુતિં કુર્યાન્ન કઞ્ચિન્મર્મણિ સ્પૃશેત્ ।
નાતિવાદી ભવેત્ તદ્વત્સર્વત્રૈવ સમો ભવેત્" ॥

"ન સમ્ભાષેત્સ્ત્રિયં કાઞ્ચિત્પૂર્વદૃષ્ટાં ન ચ સ્મરેત્ ।
કથાં ચ વર્જયેત્ તસ્યા ન પશ્યેલ્લિખિતામપિ" ॥ - (નારદપરિ૦ ઉપ૦ ૪.૩) ॥

યથા કશ્ચિદ્ વ્રતી નક્તૈકભુક્તોપવાસમૌનાદિવ્રતં સઙ્કલ્પ્ય સાવધાનો ભ્રંશમકૃત્વા સમ્યક્પાલયતિ, તથૈવાજિહ્વત્વાદિવ્રતે સ્થિતઃ સાવધાનો વિવેકં પાલયેત્ । તદેવં વિવેકેન્દ્રિયનિરોધાભ્યાં દીર્ઘકાલનૈરન્તર્યસત્કારસેવિતાભ્યાં મૈત્ર્યાદિભાવનાસુ પ્રતિષ્ઠિતાસ્વાસુરસમ્પદ્રૂપા મલિનવાસનાઃ ક્ષીયન્તે । તતો નિઃશ્વાસોચ્છ્વાસવન્નિમેષોન્મેષવચ્ચ પુરુષપ્રયત્નમન્તરેણ પ્રવર્તમાનાભિર્મૈત્ર્યાદિવાસનાભિર્લોકે વ્યવહરન્નપિ તદીયસાકલ્યવૈકલ્યાનુસન્ધાનં ચિત્તે પરિત્યજ્ય નિદ્રાતન્દ્રામનોરાજ્યાદિરૂપાઃ સમસ્તચેષ્ટાઃ પ્રયત્નેન શાન્તાઃ કૃત્વા ચિન્માત્રવાસનામભ્યસ્યેત્ । સ્વતસ્તાવદિદં જગચ્ચિજ્જડોભયાત્મકં ભાસતે; યદ્યપિ
શબ્દસ્પર્શાદિજડવસ્તુભાસનાયૈવેન્દ્રિયાણિ સૃષ્ટાનિ "પરાઞ્ચિ ખાનિ વ્યતૃણત્ સ્વયમ્ભૂઃ" (કઠ। ઉપ૦ .૨.૧.૧) ઇતિ શ્રુતેઃ, તથાપિ ચૈતન્યસ્યોપાદાનતયા વર્જયિતુમશક્યત્વાચ્ચૈતન્યપૂર્વકમેવ જડં જગદ્ભાસતે; "તમેવ ભાન્તમનુ ભાતિ સર્વં તસ્ય ભાસા સર્વમિદં વિભાતિ" (કઠ। ઉપ૦ .૨.૨.૧૫) ઇતિ શ્રુતેઃ; તથા સતિ પશ્ચાદ્ભાસમાનસ્ય જડસ્ય પ્રથમતો ભાસમાનમેવ ચૈતન્યં વાસ્તવં રૂપમિતિ નિશ્ચિત્ય જડમુપેક્ષ્ય ચિન્માત્રં ચિત્તે વાસયેત્ । એતચ્ચ બલિશુક્રયોઃ પ્રશ્નોત્તરાભ્યાં વિસ્પષ્ટમવગમ્યતે-
"કિમિહાસ્તીહ કિમ્માત્રમિદં કિમ્મયમેવ ચ ।
કસ્ત્વં કોઽહં ક એતે વા લોકા ઇતિ વદાશુ મે" ॥ - (લઘુયોગવાસિષ્ઠે ૨૧.૫૦) ॥

"ચિદિહાસ્તીહ ચિન્માત્રમિદં ચિન્મયમેવ ચ ।
ચિત્ત્વં ચિદહમેતે ચ લોકાશ્ચિદિતિ સઙ્ગ્રહઃ" ॥ - (તત્રૈવ ૨૧.૫૨) ઇતિ ॥

યથા સુવર્ણકામઃ કટકં ક્રીણન્નપિ વલયાકારસ્ય ગુણદોષાવુપેક્ષ્ય ગુરુત્વવર્ણયોરેવ મનઃ પ્રણિધિત્સતિ, તથા ચિન્માત્રે મનઃ પ્રણિધાતવ્યમ્ । યાવતા કાલેન જડં સર્વથૈવોપેક્ષ્ય ચિન્માત્ર મનસઃ પ્રવૃત્તિર્નિઃશ્વાસાદિવત્સ્વાભાવિકી સમ્પદ્યતે, તાવન્તં કાલં ચિન્માત્ર વાસનાયાં પ્રયતેત ।

નન્વાદાવેવ ચિન્માત્રવાસનાસ્તુ, તયૈવ મલિનવાસનાનિવૃત્તેઃ; કિમનેનાન્તર્ગડુના મૈત્ર્યાદ્યભ્યાસેનેતિ ચેત્, ન, ચિદ્વાસનાયા અપ્રતિષ્ઠિતત્વપ્રસઙ્ગાત્ । યથા કુટ્ટિમદાર્ઢ્યવ્યતિરેકેન ક્રિયમાણમપિ સ્તમ્ભકુડ્યાત્મકં ગૃહં ન પ્રતિતિષ્ઠતિ, યથા વા વિરેચનેન પ્રબલદોષમનિઃસાર્ય સેવિતમપ્યૌષધં નારોગ્યકરં તદ્વત્ ।

નનુ "તામપ્યથ પરિત્યજેત્" (યોગવાસિષ્ઠે સ્થિતિ .૫૭.૨૦) ઇતિ ચિન્માત્રવાસનાયાપિ પરિત્યાગોઽવગમ્યતે; તદપ્યયુક્તં ચિન્માત્રં પરિત્યજ્યાન્યસ્ય કસ્યચિદુપાદેયસ્યાભાવાત્ ।

નાયં દોષઃ। દ્વિવિધા ચિન્માત્રવાસના - મનોબુદ્ધિસમન્વિતા તદ્રહિતા ચેતિ । કરણં મનઃ, કર્તૃત્વોપાધિર્બુદ્ધિઃ । તથા ચ સત્યપ્રમત્તોઽહમેકાગ્રેણ મનસા ચિન્માત્રં ભાવયિષ્યામીત્યેતાદૃશેન કર્તૃકરણાનુસન્ધાનેન સમન્વિતા પ્રાથમિકી યા ચિન્માત્રવાસના ધ્યાનશબ્દાભિધેયા તાં પરિત્યજેત્ । યા ત્વભ્યાસપાટવેન કર્તૃત્વાદ્યનુસન્ધાનવ્યવધાનરહિતા સમાધિશબ્દાભિધેયા તામુપાદદીત ।

ધ્યાનસમાધ્યોસ્તુ લક્ષણં પતઞ્જલિઃ સૂત્રયામાસ-

"તત્ર પ્રત્યયૈકતાનતા ધ્યાનમ્" (૩.૨) ।

"તદેવાર્થમાત્રનિર્ભાસં સ્વરૂપશૂન્યમિવ સમાધિઃ" (૩.૩) ઇતિ ।

તાદૃશે સમાધૌ દીર્ઘકાલનૈરન્તર્યસત્કારૈઃ સેવિતે સ્થૈર્યં લબ્ધ્વા પશ્ચાત્કર્તૃકરણાનુસન્ધાનપરિત્યાગાર્થો યઃ પ્રયત્નસ્તમપિ પરિત્યજેત્ ।

મૈવમ્ । કતકરજોન્યાયેન સ્વપરનિવર્તકત્વાત્ । યથા કલુષિતે જલે પ્રક્ષિપ્તં કતકરજ ઇતરરજસા સહ સ્વાત્માનમપિ નિવર્તયતિ તથા ત્યાગાર્થઃ પ્રયત્નઃ કર્તૃકરણાનુસન્ધાનં નિવર્તયન્સ્વાત્માનમપિ નિવર્તયિષ્યતિ । નિવૃત્તે ચ તસ્મિન્મલિનવાસનાવચ્છુદ્ધવાસનાનામપિ ક્ષીણત્વાન્નિર્વાસનં મનોઽવતિષ્ઠતે । એતદેવાભિપ્રેત્ય વસિષ્ઠ આહ-

"તસ્માદ્વાસનયા બદ્ધં મુક્તં નિર્વાસનં મનઃ ।
રામ નિર્વાસનીભાવમાહરાશુ વિવેકતઃ । - (લઘુયોગવાસિષ્ઠે ૧૬.૪૫) ॥

"સમ્યગાલોચનાત્સત્યાદ્વાસના પ્રવિલીયતે ।
વાસનાવિલયે ચેતઃ શામ્યત્યસ્નેહદીપવત્ ॥ " - (તત્રૈવ ૧૬.૪૬) ઇતિ ॥

"યો જાગર્તિ સુષુપ્તિસ્થો યસ્ય જાગ્રન્ન વિદ્યતે ।
યસ્ય નિર્વાસનો બોધઃ સ જીવન્મુક્ત ઉચ્યતે ॥ - (તત્રૈવ ૫.૯૨) ઇતિ ચ ॥

"સુષુપ્તવત્પ્રશમિતભાવવૃત્તિના
સ્થિતં સદા જાગ્રતિ યસ્ય ચેતસા ।
કલાન્વિતો વિધુરિવ યઃ સદા બુધૈ-
ર્નિષેવ્યતે મુક્ત ઇતીહ સ સ્મૃતઃ ॥ - (તત્રૈવ ૨૦.૩૬) ઇતિ ચ ॥

"હૃદયાત્ સમ્પરિત્યજ્ય સર્વમેવ મહામતિઃ ।
યસ્તિષ્ઠતિ ગતવ્યગ્રઃ સ મુક્તઃ પરમેશ્વરઃ ॥ - (તત્રૈવ ૧૮.૨૬) ॥

“સમાધિમથ કર્માણિ મા કરોતુ કરોતુ વા ।
હૃદયેનાસ્તસર્વાશો મુક્ત એવોત્તમાશયઃ ॥ - (તત્રૈવ ૧૮.૨૭) ॥

“નૈષ્કર્મ્યેણ ન તસ્યાર્થસ્તસ્યાર્થોઽસ્તિ ન કર્મભિઃ ।
ન સમાધાનજપ્યાભ્યાં યસ્ય નિર્વાસનં મનઃ ॥ - (તત્રૈવ ૧૮.૨૮) ॥

“વિચારિતમલં શાસ્ત્રં ચિરમુદ્ગ્રાહિતં મિથઃ ।
સન્ત્યક્તવાસનાન્મૌનાદૃતે નાસ્ત્યુત્તમં પદમ્” ॥ - (તત્રૈવ ૧૮.૨૯) ઇતિ ચ ॥

ન ચ નિર્વાસનમનસ્કસ્ય જીવનહેતુર્વ્યવહારો લુપ્યેતેતિ શઙ્કનીયમ્ । કિં ચક્ષુરાદિવ્યવહારસ્ય લોપઃ કિં વા માનસવ્યવહારસ્ય ? તત્રાદ્યમુદ્દાલકો નિરાચષ્ટે-
“વાસનાહીનમપ્યેતચ્ચક્ષુરાદીન્દ્રિયં સ્વતઃ ।
પ્રવર્તતે બહિઃ સ્વાર્થે વાસના નાત્ર કારણમ્ ॥ - (યોગવાસિષ્ઠે ૫.૫૨.૫૯; લઘુયોગવાસિષ્ઠે ૨૪.૭૦) ઇતિ ॥

દ્વિતીયં વસિષ્ઠો નિરાચષ્ટે -
“અયત્નોપનતેષ્વક્ષિ દિગ્દ્રવ્યેષુ યથા પુનઃ ।
નીરાગમેવ પતતિ તદ્વત્કાર્યેષુ ધીરધીઃ” ॥ - (યોગવાસિષ્ઠે ૪.૨૩.૪૪; લઘુયોગવાસિષ્ઠે ૧૫.૧૩) ઇતિ ॥

તાદૃશ્યા ધિયા પ્રારબ્ધભોગં સ એવોપપાદયતિ -
“પરિજ્ઞાયોપભુક્તો હિ ભોગો ભવતિ તુષ્ટયે ।
વિજ્ઞાય સેવિતશ્ચોરો મૈત્રીમેતિ ન ચોરતામ્ ॥

અશઙ્કિતોપસમ્પ્રાપ્તા ગ્રામયાત્રા યથાધ્વગૈઃ ।
પ્રેક્ષ્યતે તદ્વદેવ જ્ઞૈર્ભોગશ્રીરવલોક્યતે” ॥ - (લઘુયોગવાસિષ્ઠે ૧૫.૧૪, ૧૫) ઇતિ ॥

ભોગકાલેઽપિ સવાસનેભ્યો નિર્વાસનાનાં વિશેષમાહ -
“નાપદિ ગ્લાનિમાયાન્તિ હેમપદ્મં યથા નિશિ ।
નેહન્તે પ્રકૃતાદન્યદ્રમન્તે શિષ્ટવર્ત્મનિ ॥ - (તત્રૈવ ૧૮.૪૨) ॥

“નિત્યમાપૂર્ણતામન્તરક્ષુબ્ધામિન્દુસુન્દરીમ્ ।
આપદ્યપિ ન મુઞ્ચન્તિ શશિનઃ શીતતામિવ ॥ - (તત્રૈવ ૧.૪૩) ॥

“અબ્ધિવદ્ધૃતમર્યાદા ભવન્તિ વિતતાશયાઃ ।
નિયતિં ન વિમુઞ્ચન્તિ મહાન્તો ભાસ્કરા ઇવ” ॥

(તત્રૈવ ૧.૪૫) ઇતિ ।
જનકસ્યાપિ સમાધિવ્યુત્થિસ્યેદૃશમેવાચરણં પઠ્યતે-
“તૂષ્ણીમથ ચિરં સ્થિત્વા જનકો જનજીવિતમ્ ।
વ્યુત્થિતશ્ચિન્તયામાસ મનસા શમશાલિના ॥ ૬૦॥

કિમુપાદેયમસ્તીહ યત્નાત્સંસાધયામિ કિમ્ ।
સ્વતઃ સ્થિતસ્ય શુદ્ધસ્ય ચિતઃ કા મેઽસ્તિ કલ્પના ॥ ૬૧॥

નાભિવાઞ્છામ્યસમ્પ્રાપ્તં સમ્પ્રાપ્તં ન ત્યજામ્યહમ્ ।
સ્વસ્થ આત્મનિ તિષ્ઠામિ યન્મમાસ્તિ તદસ્તુ મે ॥ ૬૨॥

ઇતિ સઞ્ચિન્ત્ય જનકો યથાપ્રાપ્તક્રિયામસૌ ।
અસક્તઃ કર્તુમુત્તસ્થૌ દિનં દિનપતિર્યથા ॥ ૬૩॥

ભવિષ્યન્નાનુસન્ધત્તે નાતીતં ચિન્તયત્યસૌ ।
વર્તમાનનિમેષં તુ હસન્નેવાનુવર્તતે" ॥ ૬૪॥ - (તત્રૈવ ૧૯.૬૦ -૬૪) ઇતિ ॥

તદેવં યથોક્તેન વાસનાક્ષયેણ યથોક્તા જીવન્મુક્તિર્ભવિષ્યતીતિ સુસ્થિતમ્ ॥

ઇતિ શ્રીમદ્વિદ્યારણ્યપ્રણીતે જીવન્મુક્તિવિવેકે વાસનાક્ષયનિરૂપણં નામ દ્વિતીયં પ્રકરણમ્ ॥ ૨॥

## ૩. મનોનાશનિરૂપણં નામ તૃતીયં પ્રકરણમ્

અથ જીવન્મુક્તિસાધનં મનોનાશં નિરૂપયામઃ । યદ્યપ્યશેષવાસનાક્ષયે સતિ અર્થાન્મનો નશ્યત્યેવ, તથાપિ સ્વાતન્ત્ર્યેણ મનોનાશે સમ્યગભ્યસ્તે સતિ વાસનાક્ષયો રક્ષિતો ભવતિ ।
ન ચાજિહ્વત્વષણ્ડકત્વાદ્યભ્યાસેનૈવ તદ્રક્ષા સિદ્ધેતિ વાચ્યમ્,
નષ્ટે મનસ્યજિહ્વત્વાદીનામર્થસિદ્ધત્વેનાભ્યાસપ્રયાસાભાવાત્ ।
નનુ મનોનાશાભ્યાસપ્રયાસસ્તત્રાપ્યસ્તીતિ ચેત્ ।
અસ્તુ નામ, તસ્યાવશ્યિકત્વાત્ । અન્તરેણ મનોનાશમભ્યસ્તા અપ્યજિહ્વત્વાદયો ન સ્થિરા ભવન્તિ । અત એવ મનસો નાશનીયત્વં જનક આહ-
"સહસ્રાઙ્કુરશાખાત્મફલપલ્લવશાલિનઃ ।
અસ્ય સંસારવૃક્ષસ્ય મનો મૂલમિતિ સ્થિતમ્ ॥ - (લઘુયોગવાસિષ્ઠે ૧૯.૫૩) ઇતિ ॥

"સઙ્કલ્પમેવ તન્મન્યે સઙ્કલ્પોપશમેન તત્ ।
શોષયામિ યથા શોષમેતિ સંસારપાદપઃ ॥ - (તત્રૈવ ૧૯.૫૪) ॥

"પ્રબુદ્ધોઽસ્મિ પ્રબુદ્ધોઽસ્મિ દૃષ્ટશ્ચોરો મયાત્મનઃ ।
મનોનામેહ હન્મ્યેનં મનસાસ્મિ ચિરં હતઃ" ॥ - (તત્રૈવ ૧૯.૫૫) ઇતિ ॥

વસિષ્ઠોઽપ્યાહ-
"અસ્ય સંસારવૃક્ષસ્ય સર્વોપદ્રવદાયિનઃ ।

ઉપાય એક એવાસ્તિ મનસઃ સ્વસ્ય નિગ્રહઃ ॥ - (તત્રૈવ ૧૭.૧) ॥

"મનસોઽભ્યુદયો નાશો મનોનાશો મહોદયઃ ।
જ્ઞમનો નાશમભ્યેતિ મનોઽજ્ઞસ્ય હિ શ‍ૃઙ્ખલા ॥ - (તત્રૈવ ૧૭.૫) ॥

"તાવન્નિશીથવેતાલા વલ્ગન્તિ હૃદિ વાસનાઃ ।
એકતત્ત્વદૃઢાભ્યાસાદ્યાવન્ન વિજિતં મનઃ ॥ - (તત્રૈવ ૧૫.૨૩) ॥

"પ્રક્ષીણચિત્તદર્પસ્ય નિગૃહીતેન્દ્રિયદ્વિષઃ ।
પદ્મિન્ય ઇવ હેમન્તે ક્ષીયન્તે ભોગવાસનાઃ ॥ - (તત્રૈવ ૧૫.૨૨) ॥

"હસ્તં હસ્તેન સમ્પીડ્યદન્તૈર્દન્તાન્ વિચૂર્ણ્ય ચ ।
અઙ્ગાન્યઙ્ગૈઃ સમાક્રમ્ય જયેદાદૌ સ્વકં મનઃ ॥ - (તત્રૈવ ૧૫.૧૮) ॥

"એતાવતિ ધરણિતલે સુભગાસ્તે સાધુચેતસઃ પુરુષાઃ ।
પુરુષકથાસુ ચ ગણ્યા ન જિતા યે ચેતસા સ્વેન ॥ - (તત્રૈવ ૧૫.૧૯) ॥

"હૃદયબિલે કૃતકુણ્ડલ ઉલ્બણકલનાવિષો મનોભુજગઃ ।
યસ્યોપશાન્તિમગમચ્ચન્દ્રવદુદિતં તમવ્યયં વન્દે ॥ - (તત્રૈવ ૧૫.૨૦) ॥

"ચિત્તં નાભિઃ કિલાસ્યેદં માયાચક્રસ્ય સર્વતઃ ।
સ્થીયતે ચેત્તદાક્રમ્ય તન્ન કિઞ્ચિત્પ્રબાધતે" ॥ - (તત્રૈવ ૨૩.૯૨) ઇતિ ॥

ગૌડપાદાચાર્યૈરપ્યુક્તમ્-
"મનસો નિગ્રહાયત્તમભયં સર્વયોગિનામ્ ।
દુઃખક્ષયઃ પ્રબોધશ્ચાપ્યક્ષયા શાન્તિરેવ ચ" ॥ - (માણ્ડૂકકારિકાયાં ૩.૪૦) ઇતિ ॥

યત્ત્વર્જુનેનોક્તમ્-
"ચઞ્ચલં હિ મનઃ કૃષ્ણ પ્રમાથિ બલવદૃઢમ્ ।
તસ્યાહં નિગ્રહં મન્યે વાયોરિવ સુદુષ્કરમ્" ॥ - (ભગવદ્ગીતાયાં ૬.૩૪) ઇતિ ॥

તદ્વચનં હઠયોગવિષયમ્ । અત એવ વાલ્મીકિરાહ-
"ઉપવિશ્યોપવિશ્યૈકચિત્તકેન મુહુર્મુહુઃ ।
ન શક્યતે મનો જેતું વિના યુક્તિમનિન્દિતામ્ ॥ - (લઘુયોગવાસિષ્ઠે ૨૮.૧૨૬) ॥

"અઙ્કુશેન વિના મત્તો યથા દુષ્ટમતઙ્ગજઃ ।
વિજેતું શક્યતે નૈવ તથા યુક્ત્યા વિના મનઃ" ॥ - (તત્રૈવ ૨૮.૧૨૭) ॥

"મનોવિલય હેતૂનાં યુક્તીનાં સમ્યગીરણમ્ ।
વસિષ્ઠેન કૃતં તાવત્ તન્નિષ્ઠસ્ય વશે મનઃ ॥

“હઠતો યુક્તિતશ્ચાપિ દ્વિવિધો નિગ્રહો મતઃ ।
નિગ્રહો ધીક્રિયાક્ષાણાં હઠો ગોલકનિગ્રહાત્ ॥

કદાચિજ્જાયતે કશ્ચિન્મનસ્તેન વિલીયતે ।
“અધ્યાત્મવિદ્યાધિગમઃ સાધુસઙ્ગમ એવ ચ ॥

વાસનાસમ્પરિત્યાગઃ પ્રાણસ્પન્દનિરોધનમ્ ॥

એતાસ્તુ યુક્તયઃ પુષ્ટાઃ સન્તિ ચિત્તજયે કિલ ॥ - (લઘુયોગવાસિષ્ઠે ૨૮.૧૨૮, ૧૨૯) ॥

“સતીષુ યુક્તિષ્વેતાસુ હઠાન્નિયમયન્તિ યે ।
ચેતસ્તે દીપમુત્સૃજ્ય વિનિઘ્નન્તિ તમોઽઞ્જનૈઃ ॥ - (તત્રૈવ ૨૮.૧૩૦) ॥

“વિમૂઢ઼ાઃ કર્તુમુદ્યુક્તા યે હઠાચ્ચેતસો જયમ્ ।
નિબધ્નન્તિ નાગેન્દ્રમુન્મત્તં બિસતન્તુભિઃ” ॥ - (તત્રૈવ ૨૮.૧૩૧) ॥

નિગ્રહો દ્વિવિધઃ, હઠનિગ્રહઃ ક્રમનિગ્રહશ્ચેતિ । તત્ર ચક્ષુઃશ્રોત્રાદિજ્ઞાનેન્દ્રિયાણિ વાક્પાણ્યાદિકર્મેન્દ્રિયાણિ ચ તત્તદ્ગોલકોપરોધમાત્રેણ હઠાન્નિગૃહ્યન્તે; તદ્દૃષ્ટાન્તેન મનોઽપિ તથા નિગ્રહીષ્યામીતિ મૂઢસ્ય ભ્રાન્તિર્ભવતિ । ન તુ તન્નિગ્રહીતું શક્યતે, તદ્ગોલકસ્ય હૃદયકમલસ્ય નિરોદ્ધુમશક્યત્વાત્ । અતઃ ક્રમનિગ્રહ એવ યોગ્યઃ । ક્રમનિગ્રહે ચાધ્યાત્મવિદ્યાપ્રાપ્ત્યાદય એવોપાયાઃ । સા ચ વિદ્યા દૃશ્યમિથ્યાત્વં દૃગ્વસ્તુનઃ સ્વપ્રકાશત્વં ચ બોધયતિ । તથા ચ સત્યેતન્મનઃ સ્વગોચરેષુ દૃશ્યેષુ પ્રયોજનાભાવં પ્રયોજનવતિ દૃગ્વસ્તુન્યગોચરત્વં ચ બુદ્ધ્વા નિરિન્ધનાગ્નિવત્સ્વયમેવોપશામ્યતિ । તથા ચ શ્રૂયતે-
“યથા નિરિન્ધનો વહ્નિઃ સ્વયોનાવુપશામ્યતિ ।
તથા વૃત્તિક્ષયાચ્ચિત્તં સ્વયોનાવુપશામ્યતિ” ॥ - (મૈત્રાયણિ ઉપ૦ .૪.૧ ; પઞ્ચદશ્યાં ૧૧.૧૧૧)॥

યોનિરાત્મા । યસ્તુ બોધિતમપિ તત્ત્વં ન સમ્યગ્બુધ્યતે, યશ્ચ વિસ્મરતિ, તયોરુભયોઃ સાધુસઙ્ગમ એવોપાયઃ । સાધવો હિ પુનઃ પુનર્બોધયન્તિ સ્મારયન્તિ ચ । યસ્તુ વિદ્યામદાદિદુર્વાસનયા પીડ્યમાનો ન સાધૂનનુવર્તિતુમુત્સહતે, તસ્ય પૂર્વોક્તવિવેકેન વાસનાપરિત્યાગ ઉપાયઃ । વાસનાનાં પ્રાબલ્યેન ત્યક્તુમશક્યત્વે પ્રાણસ્પન્દનિરોધનમુપાયઃ । પ્રાણસ્પન્દવાસનયોશ્ચિત્તપ્રેરકત્ત્વાત્તયોર્નિરોધે ચિત્તશાન્તિરુપપદ્યતે । પ્રેરકત્વં ચ વસિષ્ઠ આહ-
“દ્વે બીજે ચિત્તવૃક્ષસ્ય વૃત્તિવ્રતતિધારિણઃ ।
એકં પ્રાણપરિસ્પન્દો દ્વિતીયં દૃઢવાસના ॥ - (લઘુયોગવાસિષ્ઠે ૨૮.૩૮) ॥

“સતી સર્વગતા સંવિત્પ્રાણસ્પન્દેન બોધ્યતે ।
સંવેદનાદનન્તાનિ તતો દુઃખાનિ ચેતસઃ” । - (લઘુયોગવાસિષ્ઠે ૨૮.૪૦-૪૧) ॥

યથા ભસ્મચ્છન્નમગ્નિં લોહકારા દૃતિભ્યાં ધમન્તિ, તત્ર ચ દૃત્યુત્પન્નેન વાયુના સોઽગ્નિર્જ્વલતિ, તથા ચિત્તોપાદાનેન કાષ્ઠસ્થાનીયેનાજ્ઞાનેનાવૃતા સંવિત્પ્રાણસ્પન્દેન ચિત્તવૃત્તિરૂપેણ પ્રજ્વલતિ । તસ્માચ્ચિત્તવૃત્તિનામકાત્ સંવિજ્જ્વાલારૂપાત્ સંવેદનાદ્ દુઃખાન્યુત્પદ્યન્તે । સેયં પ્રાણસ્પન્દેન પ્રેરિતા ચિત્તોત્પત્તિઃ । અન્યાં ચ સ એવાહ -

“ભાવસંવિત્પ્રકટિતામનુભૂતાં ચ રાઘવ ।
ચિત્તસ્યોત્પત્તિમપરાં વાસનાજનિતાં શૃણુ ॥ - (યોગવાસિષ્ઠે ૫.૯૧.૨૮) ॥

“દૃઢાભ્યસ્તપદાર્થૈકભાવનાદતિચઞ્ચલમ્ ।
ચિત્તં સઞ્જાયતે જન્મજરામરણકારણમ્” ॥ ઇતિ । - (યોગવાસિષ્ઠે ૫.૯૧.૩૫) ॥

ન કેવલં પ્રાણવાસનયોશ્ચિત્તપ્રેરકત્વમ્, કિં તુ પરસ્પરપ્રેરકત્વમપ્યસ્તિ । તદાહ વસિષ્ઠઃ -
“વાસનાવશતઃ પ્રાણસ્પન્દસ્તેન ચ વાસના ।
જાયતે ચિત્તવૃક્ષસ્ય તેન બીજાઙ્કુરક્રમઃ” ॥ ઇતિ । - (લઘુયોગવાસિષ્ઠે ૨૮.૬૫) ॥

અત એવાન્યતરનાશેનોભયનાશમપ્યાહ-
“દ્વે બીજે ચિત્તવૃક્ષસ્ય પ્રાણસ્પન્દનવાસને ।
એકસ્મિંશ્ચ તયોઃ ક્ષીણે ક્ષિપ્રં દ્વે અપિ નશ્યતઃ” ॥ - (લઘુયોગવાસિષ્ઠે ૨૮.૬૪) ઇતિ ॥

તયોર્નાશોપાયં નાશફલં ચાહ-
“પ્રાણાયામદૃઢાભ્યાસૈર્યુક્ત્યા ચ ગુરુદત્તયા ।
આસનાશનયોગેન પ્રાણસ્પન્દો નિરુધ્યતે ॥ - (લઘુયોગવાસિષ્ઠે ૨૮.૧૨૨) ॥

“અસઙ્ગવ્યવહારિત્વાદ્ભવભાવનવર્જનાત્ ।
શરીરનાશદર્શિત્વાદ્વાસના ન પ્રવર્તતે” ॥ - (અન્નપૂર્ણોપનિષદિ ૪.૮૮; લઘુયોગવાસિષ્ઠે ૨૮.૧૨૩) ॥

“વાસનાસમ્પરિત્યાગાચ્ચિત્તં ગચ્છત્યચિત્તતામ્ ।
પ્રાણસ્પન્દનિરોધાચ્ચ યથેચ્છસિ તથા કુરુ ॥ - (અન્નપૂર્ણોપનિષદિ ૪.૮૬; લઘુયોગવાસિષ્ઠે ૨૮.૧૨૧) ॥

“એતાવન્માત્રકં મન્યે રૂપં ચિત્તસ્ય રાઘવ ।
યદ્ભાવનં વસ્તુનોઽન્તર્વસ્તુત્વેન રસેન ચ ॥ - (લઘુયોગવાસિષ્ઠે ૨૮.૫૭) ॥

“યદા ન ભાવ્યતે કિઞ્ચિદ્ધેયોપાદેયરૂપિ યત્ ।
સ્થીયતે સકલં ત્યક્ત્વા તદા ચિત્તં ન જાયતે ॥ - (તત્રૈવ ૨૮.૫૪) ॥

“અવાસનત્વાત્સતતં યદા ન મનુતે મનઃ ।
અમનસ્તા તદોદેતિ પરમોપશમપ્રદા” ॥ - (લઘુયોગવાસિષ્ઠે ૨૮.૫૫) ઇતિ ॥

અમનસ્તાનુદયે શાન્ત્યભાવમાહ-
“ચિત્તયક્ષદૃઢાક્રાન્તં ન મિત્રાણિ ન બાન્ધવાઃ ।
શક્નુવન્તિ પરિત્રાતું ગુરવો ન ચ માનવાઃ” ॥ - (લઘુયોગવાસિષ્ઠે ૩૦.૧૮) ઇતિ ॥

આસનાશનયોગેનેતિ યદુક્તં તત્રાસનસ્ય લક્ષણમુપાયં ફલં ચ ત્રિભિઃ સૂત્રૈઃ પતઞ્જલિઃ સૂત્રયામાસ- “સ્થિરસુખમાસનં” (૨.૪૬) ; “પ્રયત્નશૈથિલ્યાનન્તસમાપત્તિભ્યાં” (૨.૪૭) ; “તતો દ્વન્દ્વાનભિઘાતઃ” (૨.૪૮) ઇતિ ।

પદ્મકસ્વસ્તિકાદિના યાદૃશેન દેહસ્થાપનરૂપેણ યસ્ય પુરુષસ્યાવયવવ્યથાનુત્પત્તિલક્ષણં સુખં સ્વદેહચલનરાહિત્યલક્ષણં સ્થૈર્યં ચ સમ્પદ્યતે, તસ્ય તદેવ સુખમાસનમ્ ।

તસ્ય ચ પ્રયત્નશૈથિલ્યં લૌકિક ઉપાયઃ । ગમનગૃહકૃત્યતીર્થયાત્રાસ્નાનહોમાદિવિષયો યઃ પ્રયત્નો માનસ ઉત્સાહસ્તસ્ય શૈથિલ્યં કર્તવ્યમ્ । અન્યથા સ ઉત્સાહો બલાદ્દેહમુત્થાપ્ય યત્ર ક્વાપિ પ્રેરયતિ ।

અલૌકિકોપાયશ્ચ “ફણાસહસ્રેણ ધરણીં ધારયિત્વા સ્થૈર્યેણાવતિષ્ઠતે યોઽયમનન્તઃ સ એવાહમસ્મિ” ઇતિ ધ્યાનં ચિત્તસ્યાનન્તસમાપત્તિઃ । તયા યથોક્તાસનસમ્પાદકમદૃષ્ટં નિષ્પદ્યતે ।

સિદ્ધે ચાસને શીતોષ્ણસુખદુઃખમાનાવમાનાદિદ્વન્દ્વૈર્યથાપૂર્વં નાભિહન્યતે । તથાવિધસ્ય ચાસનસ્ય યોગ્યો દેશઃ શ્રૂયતે-

વિવિક્તદેશે ચ સુખાસનસ્થઃ
શુચિઃ સમગ્રીવશિરઃ શરીરઃ ॥ - (કૈવલ્યોપનિષદિ ૪) ઇતિ,

સમે શુચૌ શર્કરવહ્નિવાલુકા-
વિવર્જિતે શબ્દજલાશયાદિભિઃ ।
મનોનુકૂલે ન તુ ચક્ષુપીડને
ગુહાનિવાતાશ્રયણે પ્રયોજયેત્ ॥ - (શ્વેતાશ્વતરોપનિષદિ ૨.૧૦) ઇતિ ચ ॥

સોઽયમાસનયોગઃ ।
અશનયોગસ્તુ મિતાહારત્વમ્,
“અત્યાહારમનાહારં નિત્યં યોગી વિવર્જયેત્” । - (અમૃતબિન્દૂપનિષદિ ૨૭) ઇતિ શ્રુતેઃ ॥

ભગવતાપ્યુક્તમ્–
“નાત્યશ્નતસ્તુ યોગોઽસ્તિ ન ચૈકાન્તમનશ્નતઃ ।
ન ચાતિસ્વપ્નશીલસ્ય જાગ્રતો નૈવ ચાર્જુન ॥

યુક્તાહારવિહારસ્ય યુક્તચેષ્ટસ્ય કર્મસુ ।
યુક્તસ્વપ્નાવબોધસ્ય યોગો ભવતિ દુઃખહા” । - (ભગવદ્ગીતાયાં ૬.૧૬, ૧૭) ઇતિ ॥

જિતાસનસ્ય પ્રાણાયામેન મનોવિનાશઃ શ્વેતાશ્વતરૈરામ્નાયતે–
“ત્રિરુન્નતં સ્થાપ્ય સમં શરીરં
હૃદીન્દ્રિયાણિ મનસા સન્નિવેશ્ય ।
બ્રહ્મોડુપેન પ્રતરેત વિદ્વાન્ ।
સ્રોતાંસિ સર્વાણિ ભયાવહાનિ ॥

પ્રાણાન્પ્રપીડ્યેહ સ યુક્તચેષ્ટઃ
ક્ષીણે પ્રાણે નાસિકયોચ્છ્વસીત ।
દુષ્ટાશ્વયુક્તમિવ વાહમેનં
વિદ્વાન્મનો ધારયેતાપ્રમત્તઃ" ॥ - (શ્વેતાશ્વતરોપનિષદિ ૨.૮, ૯) ઇતિ ॥

યોગી દ્વિવિધઃ, વિદ્યામદાદ્યાસુરસમ્પદ્રહિતસ્તત્સહિતશ્ચેતિ । તયોરાદ્યસ્ય બ્રહ્મધ્યાનેન મનસિ નિરુદ્ધે સતિ, તન્નાન્તરીયકતયા પ્રાણો નિરુધ્યતે । તં પ્રતિ "ત્રિરુન્નતં -" (શ્વે૦ ઉપ૦ ૨.૮) ઇતિ મન્ત્રઃ પઠિતઃ ।
દ્વિતીયસ્યાભ્યાસેન પ્રાણે નિરુદ્ધે, તન્નાન્તરીયકતયા મનો નિરુધ્યતે । તં પ્રતિ "પ્રાણાન્પ્રપીડ્ય-" (શ્વે૦ ઉપ૦ ૨.૯) ઇતિ મન્ત્રઃ પ્રવૃત્તઃ ।
પ્રાણપીડનપ્રકારો વક્ષ્યતે । તેન ચ પીડનેન યુક્તચેષ્ટો ભવતિ । મનશ્ચેષ્ટા વિદ્યામદાદયો નિરુધ્યન્તે । પ્રાણનિરોધેન ચિત્તદોષનિરોધે દૃષ્ટાન્તોઽન્યત્ર શ્રૂયતે-
"યથા પર્વતધાતૂનાં દહ્યન્તે ધમનાન્મલાઃ ।
તથેન્દ્રિયકૃતા દોષા દહ્યન્તે પ્રાણનિગ્રહાત્" ॥ - (અમૃતનાદોપનિષદિ ૭) ઇતિ ॥

અત્રોપપત્તિર્વસિષ્ઠેન દર્શિતા -
"યઃ પ્રાણપવનસ્પન્દશ્ચિત્તસ્પન્દઃ સ એવ હિ ।
પ્રાણસ્પન્દક્ષયે યત્નઃ કર્તવ્યો ધીમતોચ્ચકૈઃ" ॥ - (લઘુયોગવાસિષ્ઠે ૨૮.૧૨૫) ઇતિ ॥

મનોવાક્ચક્ષુરાદીન્દ્રિયદેવતાઃ સ્વસ્વવ્યાપારં નિરન્તરં કરિષ્યામ ઇતિ વ્રતં ધૃત્વા શ્રમરૂપેણ મૃત્યુના ગ્રસ્તાઃ । સ ચ મૃત્યુઃ પ્રાણં નાપ્નોત્ । તતો નિરન્તરમુચ્છ્વાસનિઃશ્વાસૌ કુર્વન્નપ્યયં પ્રાણો ન શ્રામ્યતિ । તદા વિચાર્ય દેવતાઃ પ્રાણરૂપં પ્રાવિશન્ । સોઽયમર્થો વાજસનેયિભિરામ્નાયતે-
"અયં વૈ નઃ શ્રેષ્ઠ યઃ સઞ્ચરંશ્ચાસઞ્ચરંશ્ચ ન વ્યથતે અથો ન રિષ્યતિ હન્તાસ્યૈવ સર્વે રૂપમસામેતિ । ત એતસ્યૈવ સર્વે રૂપમભવંસ્તસ્માદેત એતેનાખ્યાયન્તે પ્રાણા ઇતિ" (બૃ૦ ઉપ૦ ૧.૫.૨૧) ।
અત ઇન્દ્રિયાણાં પ્રાણરૂપત્વં નામ પ્રાણાધીનચેષ્ટાવત્ત્વમ્ । તચ્ચાન્તર્યામિબ્રાહ્મણે સૂત્રાત્મપ્રસ્તાવે શ્રૂયતે-
"વાયુર્વૈ ગૌતમ તત્સૂત્રં વાયુના વૈ ગૌતમ સૂત્રેણાયં ચ લોકઃ પરશ્ચ લોકઃ સર્વાણિ ચ ભૂતાનિ સન્દૃબ્ધાનિ ભવન્તિ । તસ્માદ્વૈ ગૌતમ પુરુષં પ્રેતમાહુર્વ્યસ્રંસિષતાસ્યાઙ્ગાનીતિ । વાયુના હિ ગૌતમ સૂત્રેણ સન્દૃબ્ધાનિ ભવન્તિ" (બૃ૦ ઉ૦ ૩.૭.૨) ઇતિ । અતઃ પ્રાણમનઃસ્પન્દયોઃ સહભાવિત્વાત્ પ્રાણનિગ્રહે મનો નિગૃહ્યતે ।
નનુ સહસ્પન્દો ન યુક્તઃ, સુષુપ્તૌ ચેષ્ટમાનેઽપિ પ્રાણે મનસોઽચેષ્ટમાનત્વાત્ ।
ન, વિલીનત્વેન તદાનીં મનસઃ સત્ત્વાભાવાત્ ।
નનુ ક્ષીણે પ્રાણે નાસિકયોચ્છ્વસીતેતિ વ્યાહતમ્ । ન હિ ક્ષીણપ્રાણસ્ય મૃતસ્ય શ્વાસં ક્વચિત્પશ્યામઃ । નાપિ શ્વસતો જીવતઃ પ્રાણક્ષયોઽસ્તિ ।
મૈવમ્ । અનુલ્બણત્વસ્ય ક્ષયત્વેનાત્ર વિવક્ષિતત્વાત્ । યથા ખનનચ્છેદનાદિષુ વ્યાપ્રિયમાણસ્ય પર્વતમારોહતઃ શીઘ્રં ધાવતો વા શ્વાસવેગો યાવાન્ભવતિ, ન તાવાન્સ્થિતસ્યાસીનસ્ય નિદ્રિતસ્ય વા વિદ્યતે, તથા પ્રાણાયામપાટવોપેતસ્યેતરસ્માદલ્પઃ શ્વાસો ભવતિ । એતદેવાભિપ્રેત્ય શ્રૂયતે-

"ભૂત્વા તત્રાયતપ્રાણઃ શનૈરેવ સમુચ્છ્વસેત્" । - (ક્ષુરિકોપનિષદિ ૫) ઇતિ ॥

યથા દુષ્ટૈરશ્વૈરુપેતો રથો માર્ગં ત્યક્ત્વા યત્ર ક્વાપિ નીયતે, સ ચ સારથિના દૃઢમશ્વં રજ્જુષ્વાકૃષ્ય સુખમાર્ગે પુનર્ધાર્યતે, તથેન્દ્રિયૈર્વાસનાદિભિરિતસ્તતો નીયમાનં ચિત્તં પ્રાણરજ્જૌ દૃઢં ધૃતાયાં ધાર્યતે । "પ્રાણાન્પ્રપીડ્ય-" (શ્વે૦ ઉપ૦ ૨.૯) ઇતિ યદુક્તં તત્ર પ્રાણપીડનપ્રકારોઽન્યત્ર શ્રૂયતે-

"સવ્યાહૃતિં સપ્રણવાં ગાયત્રી શિરસા સહ ।
ત્રિઃ પઠેદાયતપ્રાણઃ પ્રાણાયામઃ સ ઉચ્યતે" ॥ ૧૧ ॥ - (અમૃતનાદોપનિષદિ ૧૧) ॥

પ્રાણાયામાસ્ત્રયઃ પ્રોક્તા રેચકપૂરકકુમ્ભકાઃ ॥ ૧૦ ॥

ઉત્ક્ષિપ્ય વાયુમાકાશં શૂન્યં કૃત્વા નિરાત્મકમ્ ।
શૂન્યભાવેન યુઞ્જીત રેચકસ્યેતિ લક્ષણમ્ ॥ ૧૨ ॥ - (અમૃતનાદોપ૦ ૧૦, ૧૨) ॥

"વક્ત્રેણોત્પલનાલેન તોયમાકર્ષયેન્નરઃ ।
એવં વાયુર્ગ્રહીતવ્યઃ પૂરકસ્યેતિ લક્ષણમ્" ॥ ૧૩ ॥ - (અમૃતનાદોપ૦ ૧૩) ॥

નોચ્છ્વસેન્નિઃશ્વસેન્નૈવ નૈવ ગાત્રાણિ ચાલયેત્ ।
એવં તાવન્નિયુઞ્જીત કુમ્ભકસ્યેતિ લક્ષણમ્" ॥ ૧૪ ॥ - (અમૃતનાદોપ૦ ૧૪) ઇતિ ॥

અત્ર શરીરાન્તર્ગતં વાયું બહિર્નિઃસારયિતુમુત્ક્ષિપ્ય શારીરમાકાશં શૂન્યં નિરાત્મકં વાયુરહિતં કૃત્વા સ્વલ્પમપિ વાયુમપ્રવેશ્ય શૂન્યભાવેનૈવ નિયમયેત્ । સોઽયં રેચકો ભવતિ । કુમ્ભકો દ્વિવિધઃ, આન્તરો બાહ્યશ્ચેતિ । તદુભયં ચ વસિષ્ઠ આહ-

"અપાનેઽસ્તં ગતે પ્રાણો યાવન્નાભ્યુદિતો હૃદિ ।
તાવત્સા કુમ્ભકાવસ્થા યોગિભિર્યાનુભૂયતે" ॥ - (લઘુયોગવાસિષ્ઠે ૨૯.૨૧૧) ॥

"બહિરસ્તં ગતે પ્રાણે યાવન્નાપાન ઉદ્ગતઃ ।
તાવત્પૂર્ણસમાવસ્થાં બહિઃષ્ઠં કુમ્ભકં વિદુઃ" ॥ - (તત્રૈવ ૨૯.૨૧૬) ॥

તત્રોચ્છ્વાસ આન્તરકુમ્ભકવિરોધી; નિઃશ્વાસો બાહ્યકુમ્ભકવિરોધી; ગાત્રચાલનમુભયવિરોધિ, તસ્મિન્સતિ નિઃશ્વાસોચ્છ્વાસયોરન્યતરસ્યાવશ્યમ્ભાવિત્વાત્ । પતઞ્જલિરપ્યાસનાન્તરભાવિનં પ્રાણાયામં સૂત્રયામાસ-
"તસ્મિન્સતિ નિઃશ્વાસોચ્છ્વાસયોર્ગતિવિચ્છેદઃ પ્રાણાયામઃ" (૨.૪૯) ઇતિ ।
નનુ કુમ્ભકે ગત્યભાવેઽપિ રેચકપૂરકયોરુચ્છ્વાસનિઃશ્વાસગતી વિદ્યેતે ઇતિ ચેત્
ન, અધિકમાત્રાભ્યાસેન સ્વભાવસિદ્ધાયાઃ સમપ્રાણગતેર્વિચ્છેદાત્ । તમેવાભ્યાસં સૂત્રયતિ-
"બાહ્યાભ્યન્તરસ્તમ્ભવૃત્તિર્દેશકાલસઙ્ખ્યાભિઃ પરિદૃષ્ટો દીર્ઘઃ સૂક્ષ્મઃ" (૨.૫૦) ઇતિ ।

રેચકો બાહ્યવૃત્તિઃ । પૂરક આભ્યન્તરવૃત્તિઃ । કુમ્ભકઃ સ્તમ્ભવૃત્તિઃ । તત્રૈકૈકો દેશાદિભિઃ પરીક્ષણીયઃ । તદ્યથા- સ્વભાવસિદ્ધે રેચકે હૃદયાન્નિર્ગત્ય નાસાગ્રસમ્મુખે દ્વાદશાઙ્ગુલપર્યન્તે શ્વાસઃ સમાપ્યતે; અભ્યાસેન તુ ક્રમેણ નાભેરાધારાદ્વા વાયુર્નિર્ગચ્છતિ; ચતુર્વિંશત્યઙ્ગુલપર્યન્તે ષટ્ત્રિંશદઙ્ગુલપર્યન્તે વા સમાપ્તિઃ । અત્ર
રેચકે પ્રયત્નાતિશયે સતિ નાભ્યાદિપ્રદેશક્ષોભેણાન્તર્નિશ્ચેતું શક્યમ્; બહિશ્ચ સૂક્ષ્મં તૂલં ધૃત્વા તચ્ચાનેન નિશ્ચેતવ્યમ્ । સેયં દેશપરીક્ષા । રેચકકાલે પ્રણવસ્યાવૃત્તયો દશ વિંશતિસ્ત્રિંશદિત્યાદિભિઃ કાલપરીક્ષા । અસ્મિન્માસે પ્રતિદિનં દશ રેચકાઃ ઉત્તરમાસે ત્રિંશદિત્યાદિભિઃ સઙ્ખ્યા પરીક્ષા । યથોક્તદેશકાલવિશિષ્ટાઃ પ્રાણાયામા એકસ્મિન્દિને દશ વિંશતિસ્ત્રિંશદિત્યાદિભિઃ સઙ્ખ્યાપરીક્ષા । પૂરકેઽપ્યેવં યોજનીયમ્ । યદ્યપિ કુમ્ભકે દેશવ્યાપ્તિવિશેષો નાવગમ્યતે, તથાપિ કાલસઙ્ખ્યાવ્યાપ્તિરવગમ્યત એવ । યથા ઘનીભૂતસ્તૂલપિણ્ડઃ પ્રસાર્યમાણો દીર્ઘો વિરલતયા સૂક્ષ્મશ્ચ ભવતિ, તથા પ્રાણોઽપિ દેશકાલસઙ્ખ્યાધિક્યેનાભ્યસ્યમાનો દીર્ઘો દુર્લક્ષ્યતયા સૂક્ષ્મશ્ચ સમ્ભવતિ ।
રેચકાદિભ્યસ્ત્રિભ્યોઽન્યં પ્રકારં સૂત્રયતિ-
"બાહ્યાભ્યન્તરવિષયાનપેક્ષી ચતુર્થઃ" (૨.૫૧) ઇતિ ।
યથાશક્તિ સર્વં વાયું વિરેચ્યાનન્તરં ક્રિયમાણો બહિષ્કુમ્ભકઃ યથાશક્તિ વાયુમાપૂર્યાનન્તરં ક્રિયમાણોઽન્તઃ કુમ્ભકઃ ઇતિ, રેચકપૂરકાવનાદૃત્ય કેવલઃ કુમ્ભકોઽભ્યસ્યમાનઃ પૂર્વત્રયાપેક્ષયા ચતુર્થો ભવતિ । નિદ્રાતન્દ્રાદિપ્રબલદોષયુક્તાનાં રેચકાદિત્રયમ્; દોષરહિતાનાં ચતુર્થ ઇતિ વિવેકઃ । પ્રાણાયામફલં સૂત્રયતિ-
"તતઃ ક્ષીયતે પ્રકાશાવરણં" (૨.૫૨) ઇતિ ।
પ્રકાશસ્ય સત્ત્વસ્યાવરણં તમો નિદ્રાલસ્યાદિહેતુઃ, તસ્ય ક્ષયો ભવતિ । ક્ષયે સતિ ફલાન્તરં સૂત્રયતિ-
"ધારણાસુ ચ યોગ્યતા મનસઃ" (૨.૫૩) ઇતિ ।
આધારનાભિચક્રહૃદયભ્રૂમધ્યબ્રહ્મરન્ધ્રાદિદેશવિશેષે વિકૃષ્ય ચિત્તસ્ય સ્થાપનં ધારણા, "દેશબન્ધશ્ચિત્તસ્ય ધારણા" (૩.૧) ઇતિ સૂત્રણાત્ ।
શ્રુતિશ્ચ -
"મનઃ સઙ્કલ્પકં ધ્યાત્વા સઙ્ક્ષિપ્યાત્મનિ બુદ્ધિમાન્ ।
ધારયિત્વા તથાત્માનં ધારણા પરિકીર્તિતા" ॥ - (અમૃતનાદોપનિષદિ ૧૬) ઇતિ ॥

પ્રાણાયામેન રજોગુણકાર્યાચ્ચાઞ્ચલ્યાત્તમોગુણકાર્યાદાલસ્યાદેશ્ચ નિવારિતં મનસ્તસ્યાં ધારણાયાં યોગ્યં ભવતિ । "પ્રાણાયામદૃઢાભ્યાસૈર્યુક્ત્યા ચ ગુરુદત્તયા" । (લઘુયોગવાસિષ્ઠે ૨૮.૧૨૨) ઇત્યત્રત્યેન યુક્તિશબ્દેન યોગિજનપ્રસિદ્ધં શિરોરૂપમેરુચાલનમ્, જિહ્વાગ્રેણ ઘણ્ટિકાભ્રમણમ્, નાભિચક્રે હૃદયે ચ જ્યોતિર્ધ્યાનમ્, વિસ્મૃતિપ્રદૌષધસેવા ચેત્યેવમાદિકં ગૃહ્યતે ।
તદેવમધ્યાત્મવિદ્યાસાધુસઙ્ગમવાસનાક્ષયપ્રાણનિરોધાશ્ચિત્તનાશોપાયા દર્શિતાઃ। અથ તદુપાયભૂતં સમાધિં વક્ષ્યામઃ ।
પઞ્ચભૂમ્યુપેતસ્ય ચિત્તસ્ય ભૂમિત્રયત્યાગેનાવશિષ્ટં ભૂમિદ્વયં સમાધિઃ । ભૂમયશ્ચ યોગભાષ્યકૃતા દર્શિતાઃ -
"ક્ષિપ્તં મૂઢં વિક્ષિપ્તમેકાગ્રં નિરુદ્ધમિતિ ચિત્તસ્ય ભૂમયઃ" (યોગસૂત્રભાષ્યે ૧.૧) ઇતિ ।

આસુરસમ્પલ્લોકશાસ્ત્રદેહવાસનાસુ વર્તમાનં ચિત્તં ક્ષિપ્તં, નિદ્રાતન્દ્રાદિગ્રસ્તં મૂઢમ્, કાદાચિત્કધ્યાનયુક્તં ક્ષિપ્તાદ્વિશિષ્ટતયા વિક્ષિપ્તમ્ । તત્ર ક્ષિપ્તમૂઢયોઃ સમાધિશઙ્કૈવ નાસ્તિ । "વિક્ષિપ્તે તુ ચેતસિ વિક્ષેપોપસર્જનીભૂતઃ સમાધિર્યોગપક્ષે ન વર્તતે" (તત્રૈવ) ॥ વિક્ષેપાન્તર્ગતતયા દહનાન્તર્ગતબીજવત્સ સદ્ય એવ વિનશ્યતિ । "યસ્ત્વેકાગ્રેચેતસિ સમ્ભૂતમર્થં દ્યોતયતિ, ક્ષિણોતિ ચ ક્લેશાન્, કર્મબન્ધનાનિ શ્લથયતિ, નિરોધમભિમુખીકરોતિ, સ સમ્પ્રજ્ઞાતયોગ ઇત્યાખ્યાયતે" । (તત્રૈવ) ॥ "સર્વવૃત્તિનિરોધે ત્વસમ્પ્રજ્ઞાતસમાધિઃ" । (તત્રૈવ) ॥ તત્ર સમ્પ્રજ્ઞાતસમાધિભૂમિમેકાગ્રતાં સૂત્રયતિ-

"શાન્તોદિતૌ તુલ્યપ્રત્યયૌ ચિત્તસ્યૈકાગ્રતાપરિણામઃ" (૩.૧૨) ઇતિ ।

શાન્તોઽતીતઃ । ઉદિતો વર્તમાનઃ । પ્રત્યયશ્ચિત્તવૃત્તિઃ । અતીતઃ પ્રત્યયો યં પદાર્થં ગૃહ્ણાતિ તમેવ ચેદુદિતો ગૃહ્ણીયાત્તદા તાવુભૌ તુલ્યૌ ભવતઃ । તાદૃશશ્ચિત્તસ્ય પરિણામ એકાગ્રતેત્યુચ્યતે । એકાગ્રતાભિવૃદ્ધિલક્ષણં સમાધિં સૂત્રયતિ-

"સર્વાર્થતૈકાગ્રતયોઃ ક્ષયોદયૌ ચિત્તસ્ય સમાધિપરિણામઃ" (૩.૧૧) ઇતિ ।

રજોગુણેન ચાલ્યમાનં ચિત્તં ક્રમેણ સર્વાન્પદાર્થાન્ગૃહ્ણાતિ । તસ્ય રજોગુણસ્ય નિરોધાય ક્રિયમાણેન યોગિનઃ પ્રયત્નવિશેષેણ દિને દિને સર્વાર્થતા ક્ષીયતે, એકાગ્રતા ચોદેતિ; તાદૃશશ્ચિત્તસ્ય પરિણામઃ સમાધિરિત્યુચ્યતે । તસ્ય સમાધેરષ્ટસ્વઙ્ગેષુ યમનિયમાસનપ્રાણાયામપ્રત્યાહારાઃ પઞ્ચ બહિરઙ્ગાનિ । તત્ર યમાન્સૂત્રયતિ-

"અહિંસાસત્યાસ્તેયબ્રહ્મચર્યાપરિગ્રહા યમાઃ" (૨.૩૦) ઇતિ ।

હિંસાદિભ્યો નિષિદ્ધધર્મેભ્યો યોગિનં યમયન્તીતિ યમાઃ । નિયમાન્સૂત્રયતિ-

"શૌચસન્તોષતપઃસ્વાધ્યાયેશ્વરપ્રણિધાનાનિ નિયમાઃ" (૨.૩૨) ઇતિ ।

જન્મહેતોઃ કામ્યધર્માન્નિવર્ત્ય મોક્ષહેતૌ નિષ્કામધર્મે નિયમયન્તિ પ્રેરયન્તીતિ નિયમાઃ । યમનિયમયોરનુષ્ઠાનવૈલક્ષણ્યં સ્મર્યતે-

"યમાન્કુર્વીત સતતં ન કુર્યાન્નિયમાન્બુધઃ ।
યમાન્પતત્યકુર્વાણો નિયમાન્કેવલાન્ભજન્" ॥ - (મનુસંહિતાયાં ૪.૨૦૪) ॥

"પતતિ નિયમવાન્યમેષ્વસક્તો
ન તુ યમવાન્નિયમાલસોઽવસીદેત્ ।
ઇતિ યમનિયમૌ સમીક્ષ્ય બુદ્ધ્યા
યમબહુષ્વનુસન્ધીત બુદ્ધિમ્" ॥ ઇતિ ।

યમનિયમફલાનિ સૂત્રયતિ-

(અહિંસાપ્રતિષ્ઠાયાં) "તત્સન્નિધૌ વૈરત્યાગઃ" (યોગસૂત્રેષુ ૨.૩૫) ॥

(સત્યપ્રતિષ્ઠાયાં) "ક્રિયાફલાશ્રયત્વમ્" (યો૦ સૂ૦ .૨.૩૬) ।

(અસ્તેયપ્રતિષ્ઠાયાં) "સર્વરત્નોપસ્થાનમ્" । (યો૦ સૂ૦ .૨.૩૭) ॥

(બ્રહ્મચર્યપ્રતિષ્ઠાયાં) "વીર્યલાભઃ" । (યો૦ સૂ૦ .૨.૩૮) ।

(અપરિગ્રહસ્થૈર્યે) "જન્મકથન્તાસમ્બોધઃ" । (યો૦ સૂ૦ .૨.૩૯) ॥ જનનાદિભયાભાવઃ ।

“શૌચાત્સ્વાઙ્ગજુગુપ્સા પરૈરસંસર્ગઃ । ” (યો૦ સૂ૦ .૨.૪૦) ॥

“સત્ત્વશુદ્ધિસૌમનસ્યૈકાગ્ર્યેન્દ્રિયજયાત્મદર્શનયોગ્યત્વાનિ ચ” (યો૦ સૂ૦ .૨.૪૧) સમ્ભવન્તિ ।
“સન્તોષાદનુત્તમઃ સુખલાભઃ” (યો૦ સૂ૦.૨.૪૨) ॥

“કાયેન્દ્રિયસિદ્ધિરશુદ્ધિક્ષયાત્તપસઃ” (યો૦ સૂ૦ .૨.૪૩) ॥

“સ્વાધ્યાયાદિષ્ટદેવતાસમ્પ્રયોગઃ” । (યો૦ સૂ૦.૨.૪૪) ।
“સમાધિસિદ્ધિરીશ્વરપ્રણિધાનાત્” (યો૦ સૂ૦.૨.૪૫) ઇતિ ।
આસનપ્રાણાયામૌ વ્યાખ્યાતૌ । પ્રત્યાહારં સૂત્રયતિ -
“સ્વવિષયાસમ્પ્રયોગે ચિત્તસ્વરૂપાનુકાર ઇવેન્દ્રિયાણાં પ્રત્યાહારઃ” (યો૦ સૂ૦.૨.૫૪) ઇતિ ।
શબ્દસ્પર્શરૂપરસગન્ધા વિષયાઃ, તેભ્યો નિવર્તિતાઃ શ્રોત્રાદયશ્ચિત્તસ્વરૂપમનુકુર્વન્ત ઇવાતિષ્ઠતે । શ્રુતિશ્ચ ભવતિ -
“શબ્દાદિવિષયાન્પઞ્ચ મનશ્ચૈવાતિચઞ્ચલમ્ ।
ચિન્તયેદાત્મનો રશ્મીન્ પ્રત્યાહારઃ સ ઉચ્યતે” ॥ - (અમૃતનાદોપનિષદિ ૫) ॥

શબ્દાદયો વિષયા યેષાં શ્રોત્રાદીનાં તે શ્રોત્રાદયઃ પઞ્ચ; મનઃ ષષ્ઠાનામેતેષામનાત્મરૂપેભ્યઃ શબ્દાદિભ્યો નિવર્તનમાત્મરશ્મિત્વેન ચિન્તનમ્; પ્રત્યાહારઃ સ ઇત્યર્થ । પ્રત્યાહારફલં સૂત્રયતિ-
“તતઃ પરમા વશ્યતેન્દ્રિયાણામ્” (યો૦ સૂ૦.૨.૫૫) ઇતિ ।
ધારણાધ્યાનસમાધીન્સૂત્રૈસ્ત્રિભિઃ સૂત્રયતિ-
“દેશબન્ધશ્ચિત્તસ્ય ધારણા” (યો૦ સૂ૦.૩.૧) ;
“તત્ર પ્રત્યયૈકતાનતા ધ્યાનમ્” (યો૦ સૂ૦.૩.૨) ;
“તદેવાર્થમાત્રનિર્ભાસં સ્વરૂપશૂન્યમિવ સમાધિઃ” (યો૦ સૂ૦.૩.૩) ઇતિ ।
આધારાદિદેશાઃ પૂર્વમુક્તાઃ । દેશાન્તરં શ્રૂયતે-
“મનઃ સઙ્કલ્પકં ધ્યાત્વા સઙ્ક્ષિપ્યાત્મનિ બુદ્ધિમાન્ ।
ધારયિત્વા તથાત્માનં ધારણા પરિકીર્તિતા” ॥ - (અમૃતનાદોપનિષદિ ૧૬) ઇતિ ॥

“યત્સર્વવસ્તુસઙ્કલ્પકં મનઃ, તદાત્માનમેવ સઙ્કલ્પયતુ ન ત્વન્યત્” ઇત્યેવંવિધઃ પ્રયત્ન આત્મનિ સઙ્ક્ષેપઃ । પ્રત્યયસ્યૈકતાનતા તત્ત્વૈકવિષયઃ પ્રવાહઃ । સ ચ દ્વિવિધઃ વિચ્છિદ્ય વિચ્છિદ્ય જાયમાનઃ, સન્તતશ્ચેતિ । તાવુભૌ ક્રમેણ ધ્યાનસમાધી ભવતઃ । તદુભયં સર્વાનુભવયોગિના દર્શિતમ્-
“ચિત્તૈકાગ્ર્યાદ્યતો જ્ઞાનમુક્તં સમુપજાયતે ।
તત્સાધનમતો ધ્યાનં યથાવદુપદિશ્યતે” ॥ - (મુક્તિકોપનિષદિ ૨.૪૯) ॥

“વિલાપ્ય વિકૃતિં કૃત્સ્નાં સમ્ભવવ્યત્યયક્રમાત્ ।
પરિશિષ્ટં ચ સન્માત્રં ચિદાનન્દં વિચિન્તયેત્” ॥ ઇતિ । - (મુક્તિકોપનિષદિ ૨.૫૦) ॥

“બ્રહ્માકારમનોવૃત્તિપ્રવાહોઽહઙ્કૃતિં વિના ।
સમ્પ્રજ્ઞાતસમાધિઃ સ્યાદ્ધ્યાનાભ્યાસપ્રકર્ષજઃ” ॥ - (મુક્તિકોપનિષદિ ૨.૫૩) ઇતિ ચ ॥

તં ચ ભગવત્પાદા ઉદાજહ્રુઃ
“દૃશિસ્વરૂપં ગગનોપમં પરં
સકૃદ્વિભાતં ત્વમેકમક્ષરમ્ ।
અલેપકં સર્વગતં યદદ્વયં
તદેવ ચાહં સતતં વિમુક્ત ઓમ્ ॥ - (ઉપદેશસાહસ્ર્યાં ૧૦.૧) ॥

“દૃશિસ્તુ શુદ્ધોઽહમવિક્રિયાત્મકો
ન મેઽસ્તિ કશ્ચિદ્વિષયઃ સ્વભાવતઃ ।
પુરસ્તિરશ્ચોર્ધ્વમધશ્ચ સર્વતઃ
સમ્પૂર્ણભૂમા ત્વજ આત્મનિ સ્થિતઃ ॥ - (તત્રૈવ ૧૦.૨) ઇતિ ॥

“અજોઽમરશ્ચૈવ તથાજરોઽમૃતઃ સ્વયમ્પ્રભઃ સર્વગતોઽહમદ્વયઃ ।
ન કારણં કાર્યમતીવ નિર્મલઃ સદૈકતૃપ્તશ્ચ તતો વિમુક્ત ઓમ્” ॥ - (તત્રૈવ ૧૦.૩) ઇતિ ॥

નનુ સમ્પ્રજ્ઞાતસમાધિરઙ્ગી; સ કથં ધ્યાનાનન્તરભાવિનોઽષ્ટમાઙ્ગસ્ય સમાધેઃ સ્થાન ઉદાહ્રિયતે ?
નાયં દોષઃ, અત્યન્તભેદાભાવાત્ । યથા વેદમધીયાનો માણવકઃ પદે પદે સ્ખલન્પુનઃ પુનઃ સમાદધાતિ, અધીતવેદસ્તુ સાવધાનો ન સ્ખલતિ, અધ્યાપકો નિરવધાનસ્તન્દ્રાં કુર્વન્નપિ ન સ્ખલતિ; તથા પરિપાકતારતમ્યેન ધ્યાનસમાધિસમ્પ્રજ્ઞાતાનામવાન્તરભેદોઽવગન્તવ્યઃ । ધારણાદિત્રયં મનોવિષયત્વાત્ સમ્પ્રજ્ઞાતસમાધેરન્તરઙ્ગમ્। યમાદિપઞ્ચકં તુ બહિરઙ્ગમ્ । તદેતત્સૂત્રયતિ-
“ત્રયમન્તરઙ્ગં પૂર્વેભ્યઃ” (યો૦ સૂ૦.૩.૭) ઇતિ ।
તતઃ કેનાપિ પુણ્યેનાન્તરઙ્ગે પ્રથમં લબ્ધે બહિરઙ્ગલાભાય નાતિપ્રયાસઃ કર્તવ્યઃ । યદ્યપિ પતઞ્જલિના ભૌતિકભૂતતન્માત્રેન્દ્રિયાહઙ્કારાદિવિષયાઃ સમ્પ્રજ્ઞાતસવિકલ્પસમાધયો બહુધા પ્રપઞ્ચિતાઃ, તથાપિ તેષામન્તર્ધાનાદિસિદ્ધિહેતુતયા મુક્તિહેતુસમાધિવિરોધિત્વાન્નાસ્માભિસ્તત્રાદરઃ ક્રિયતે । તથા ચ સૂત્રિતમ્-
“તે સમાધાવુપસર્ગા વ્યુત્થાને સિદ્ધયઃ” (યો૦ સૂ૦.૩.૩૮) ઇતિ,
“સ્થાન્યુપનિમન્ત્રણે સઙ્ગસ્મયાકરણં પુનરનિષ્ટપ્રસઙ્ગાત્” (યો૦ સૂ૦ .૩.૫૨) ઇતિ ચ ।
સ્થાનિનો દેવાઃ । ઉદ્દાલકો દેવૈરામન્ત્રિતોઽપ્યવજ્ઞાય તાન્દેવાન્નિર્વિકલ્પસમાધિમેવ ચકારેત્યુપાખ્યાયતે । પ્રશ્નોત્તરાભ્યામપ્યેવમેવાવગમ્યતે ।
શ્રીરામઃ -
“જીવન્મુક્તશરીરાણાં કથમાત્મવિદાં વર ।
શક્તો નેહ દૃશ્યન્ત આકાશગમનાદિકાઃ ॥ - (લઘુયોગવાસિષ્ઠે ૨૮.૧) ॥

વસિષ્ઠઃ -
“અનાત્મવિદમુક્તોઽપિ નભોવિહરણાદિકમ્ ।

દ્રવ્યમન્ત્રક્રિયાકાલશક્ત્યાપ્નોત્યેવ રાઘવ" । (તત્રૈવ ૨૮.૨) ॥

"નાત્મજ્ઞસ્યૈષ વિષય આત્મજ્ઞો હ્યાત્મમાત્રદૃક્ ।
આત્મનાત્મનિ સન્તૃપ્તૌ નાવિદ્યામનુધાવતિ" ॥ - (તત્રૈવ ૨૮.૩) ॥

"યે કેચન જગદ્ભાવાસ્તાનવિદ્યામયાન્વિદુઃ ।
કથં તેષુ કિલાત્મજ્ઞસ્ત્યક્તાવિદ્યો નિમજ્જતિ ॥ - (તત્રૈવ ૨૮.૫) ॥

"દ્રવ્યમન્ત્રક્રિયાકાલશક્તયઃ સાધુ સિદ્ધિદાઃ ।
પરમાત્મપદપ્રાપ્તૌ નોપકુર્વન્તિ કાશ્ચન ॥ - (તત્રૈવ ૨૮.૭) ॥

"સર્વેચ્છાજાલસંશાન્તાવાત્મલાભોદયો હિ યઃ ।
સ કથં સિદ્ધિવાઞ્છાયાં મગ્નચિત્તેન લભ્યતે ॥ - (તત્રૈવ ૨૮.૯) ॥

"ન કેચન જગદ્ભાવાસ્તત્ત્વજ્ઞં રઞ્જયન્ત્યમી ।
નાગરં નાગરીકાન્તં કુગ્રામલલના ઇવ ॥ ઇતિ । - (લ। વા .૧૮.૩૪) ॥

"અપિ શીતરુચાવર્કે સુતીક્ષ્ણેઽપીન્દુમણ્ડલે ।
અપ્યધઃ પ્રસરત્યગ્નૌ જીવન્મુક્તો ન વિસ્મયી ॥ - (તત્રૈવ ૨૭.૬૬) ॥

"ચિદાત્મન ઇમા ઇત્થં પ્રસ્ફુરન્તીહ શક્તયઃ ।
ઇત્યસ્યાશ્ચર્યજાલેષુ નાભ્યુદેતિ કુતૂહલમ્" ॥ - (તત્રૈવ ૨૭.૬૭) ॥

"યસ્તુ વા ભાવિતાત્માપિ સિદ્ધિજાલાનિ વાઞ્છતિ ।
સ સિદ્ધિસાધકૈર્દ્રવ્યૈસ્તાનિ સાધયતિ ક્રમાત્" ॥ ઇતિ ચ । - (તત્રૈવ ૨૮.૬; યોગવાસિષ્ઠે ૮૯.૨૩) ॥

આત્મવિષયસ્તુ સમ્પ્રજ્ઞાતસમાધિર્વાસનાક્ષયસ્ય નિરોધસમાધેશ્ચ હેતુઃ । તસ્માદત્રાદરઃ કૃતઃ ।
અથ પઞ્ચમભૂમિરૂપો નિરોધસમાધિર્નિરૂપ્યતે । તં ચ નિરોધં સૂત્રયતિ-
"વ્યુત્થાનનિરોધસંસ્કારયોરભિભવપ્રાદુર્ભાવૌ નિરોધક્ષણચિત્તાન્વયો નિરોધપરિણામઃ" - (યો૦ સૂ૦.૩.૯) ઇતિ ॥

વ્યુત્થાનસંસ્કારાઃ સમાધિવિરોધિનઃ । તે ચોદ્દાલકસ્ય સમાધાવુદાહૃતાઃ-
"કદાહં ત્યક્તમનને પદે પરમપાવને ।
ચિરં વિશ્રાન્તિમેષ્યામિ મેરુશ‌ૃઙ્ગ ઇવામ્બુદઃ ॥ - (લઘુયોગવાસિષ્ઠે ૨૪.૨૯) ॥

"ઇતિ ચિન્તાપરવશો બલાદુદ્દાલકો દ્વિજઃ ।
પુનઃ પુનસ્તૂપવિશ્ય ધ્યાનાભ્યાસં ચકાર હ ॥ - (તત્રૈવ ૨૪.૩૫) ॥

"વિષયૈર્નીયમાને તુ ચિત્તે મર્કટચઞ્ચલે ।
ન સ લે સમાધાને પ્રતિષ્ઠાં પ્રીતિદાયિનીમ્ ॥ - (તત્રૈવ ૨૪.૩૬) ॥

"કદાચિદ્બાહ્યસંસ્પર્શપરિત્યાગાદનન્તરમ્ ।

તસ્યાગચ્છચ્ચિત્તકપિરાન્તરસ્પર્શસઞ્ચયાન્” ॥ - (તત્રૈવ ૨૪.૩૭) ॥

“કદાચિદાન્તરસ્પર્શાદ્બાહ્યં વિષયમાદદે ।
તસ્યોડ્ડીય મનો યાતિ કદાચિત્ ત્રસ્તપક્ષિવત્ ॥ - (તત્રૈવ ૨૪.૩૮) ॥

“કદાચિદુદિતાર્કાભં તેજઃ પશ્યતિ વિસ્તૃતમ્ ।
કદાચિત્કેવલં વ્યોમ કદાચિન્નિબિડં તમઃ ॥ - (તત્રૈવ ૨૪.૩૯) ॥

“આગચ્છતો યથાકામં પ્રતિભાસાન્ પુનઃ પુનઃ ।
અચ્છિનન્મનસા શૂરઃ ખડ્ગેનેવ રણે રિપૂન્” ॥ - (તત્રૈવ ૨૪.૧૦૯) ॥

“વિકલ્પૌઘે સમાલૂને સોઽપશ્યદ્ધૃદયામ્બરે ।
તમશ્છન્નવિવેકાર્કં લોલકજ્જલમેચકમ્ ॥ - (તત્રૈવ ૨૪.૧૧૦) ॥

તદપ્યુત્સાદયામાસ સમ્યગ્જ્ઞાનવિવસ્વતા ।
તમસ્યુપરતે સ્વાન્તે તેજઃપુઞ્જં દદર્શ સઃ ।
તલ્લુલાવ સ્થલાબ્જાનાં વનં બાલ ઇવ દ્વિપઃ ॥ - (તત્રૈવ ૨૪.૧૧૧) ॥

“તેજસ્યુપરતે તસ્ય ઘૂર્ણમાનં મનો મુનેઃ ।
નિશાબ્જવદગાન્નિદ્રાં તામપ્યાશુ લુલાવ સઃ ॥ - (તત્રૈવ ૨૪.૧૧૨) ॥

“નિદ્રાવ્યપગમે તસ્ય વ્યોમસંવિત્સમુદ્યયૌ ।
વ્યોમસંવિદિ નષ્ટાયાં મૂઢં તસ્યાભવન્મનઃ ।
મોહમપ્યેષ મનસસ્તં મમાર્જ મહાશયઃ । - (તત્રૈવ ૨૪.૧૧૩) ॥

તતસ્તેજસ્તમોનિદ્રામોહાદિપરિવર્જિતામ્ ।
કામપ્યવસ્થામાસાદ્ય વિશશ્રામ મનઃ ક્ષણમ્” ॥ - (તત્રૈવ ૨૪.૧૧૪) ઇતિ ॥

ત એતે વ્યુત્થાનસંસ્કારા નિરોધહેતુના યોગિપ્રયત્નેન પ્રતિદિનં પ્રતિક્ષણં ચાભિભૂયન્તે; તદ્વિરોધિનશ્ચ નિરોધસંસ્કારાઃ પ્રાદુર્ભવન્તિ । તથા સતિ નિરોધ એકૈકસ્મિન્ક્ષણે ચિત્તમનુગચ્છતિ । સોઽયમીદૃશશ્ચિત્તસ્ય નિરોધપરિણામો ભવતિ ।

નનુ “પ્રતિક્ષણપરિણામિનો હિ ભાવા ઋતે ચિતિશક્તેઃ” (સાઙ્ખ્યકૌમુદ્યાં (૫) ) ઇતિ ન્યાયેન ચિત્તસ્ય સર્વદા પરિણામપ્રવાહો વક્તવ્યઃ ।

બાઢમ્ । તત્ર વ્યુત્થિતચિત્તસ્ય વૃત્તિપ્રવાહઃ સ્ફુટઃ નિરુદ્ધચિત્તસ્ય તુ કથમિત્યાશઙ્ક્યોત્તરં સૂત્રયતિ -

“તતઃ પ્રશાન્તવાહિતા સંસ્કારાત્” (યો૦ સૂ૦ .૩.૧૦) ઇતિ ।

યથા સમિદાજ્યાહુતિપ્રક્ષેપે વહ્નિરુત્તરોત્તરવૃદ્ધ્યા પ્રજ્વલતિ, સમિદાદિક્ષયે પ્રથમક્ષણે કિઞ્ચિચ્છામ્યતિ, ઉત્તરોત્તરક્ષણે શાન્તિર્વર્ધતે । તથા નિરુદ્ધચિત્તસ્યોત્તરોત્તરાધિકઃ પ્રશમઃ પ્રવહતિ । તત્ર પૂર્વપૂર્વપ્રશમજનિતઃ સંસ્કાર એવોત્તરોત્તરપ્રશમસ્ય કારણમ્ । તામેતાં પ્રશાન્તવાહિતાં ભગવાન્વિસ્પષ્ટમુદાજહાર -

"યદા વિનિયતં ચિત્તમાત્મન્યેવાવતિષ્ઠતે ।
નિઃસ્પૃહઃ સર્વકામેભ્યો યુક્ત ઇત્યુચ્યતે તદા ॥ - (ભગવદ્ગીતાયાં ૬.૧૮) ॥

"યથા દીપો નિવાતસ્થો નેઙ્ગતે સોપમા સ્મૃતા ।
યોગિનો યતચિત્તસ્ય યુઞ્જતો યોગમાત્મનઃ" ॥ - (તત્રૈવ ૬.૧૯) ॥

"યત્રોપરમતે ચિત્તં નિરુદ્ધં યોગસેવયા ।
યત્ર ચૈવાત્મનાત્માનં પશ્યન્નાત્મનિ તુષ્યતિ ॥ - (તત્રૈવ ૬.૨૦) ॥

"સુખમાત્યન્તિકં યત્તદ્બુદ્ધિગ્રાહ્યમતીન્દ્રિયમ્ ।
વેત્તિ યત્ર ન ચૈવાયં સ્થિતશ્ચલતિ તત્વતઃ ॥ - (તત્રૈવ ૬.૨૧) ॥

"યં લબ્ધ્વા ચાપરં લાભં મન્યતે નાધિકં તતઃ ।
યસ્મિન્સ્થિતો ન દુઃખેન ગુરુણાપિ વિચાલ્યતે ॥ - (તત્રૈવ ૬.૨૨) ॥

"તં વિદ્યાદ્ દુઃખસંયોગવિયોગં યોગસંજ્ઞિતમ્ ॥

સ નિશ્ચયેન યોક્તવ્યો યોગોઽનિર્વિણ્ણચેતસા" ॥ - (તત્રૈવ ૬.૨૩) ઇતિ ॥

નિરોધસમાધેઃ સાધનં સૂત્રયતિ -
"વિરામપ્રત્યયાભ્યાસપૂર્વકઃ સંસ્કારશેષોઽન્યઃ" (યો૦ સૂ૦ .૧.૧૮) ઇતિ ।
વિરામો વૃત્ત્યુપરમઃ, તસ્ય પ્રત્યયઃ કારણં વૃત્ત્યુપરમાર્થઃ પુરુષપ્રયત્નઃ, તસ્યાભ્યાસઃ પૌનઃપુન્યેન સમ્પાદનમ્, તત્પૂર્વકસ્તજ્જન્યઃ, અનન્તરાતીતસૂત્રે સમ્પ્રજ્ઞાતસમાધેરુક્તત્વાત્ તદપેક્ષયાન્યોઽસમ્પ્રજ્ઞાતઃ સમાધિ । તત્ર વૃત્તિરહિતસ્ય ચિત્તસ્વરૂપસ્ય દુર્લક્ષ્યત્ત્વાત્ સંસ્કારરૂપેણ ચિત્તં શિષ્યતે । વિરામપ્રત્યયજન્યત્વં ભગવાન્વિસ્પષ્ટમાહ-
"સઙ્કલ્પપ્રભવાન્કામાંસ્ત્યક્ત્વા સર્વાનશેષતઃ ।
મનસૈવેન્દ્રિયગ્રામં વિનિયમ્ય સમન્તતઃ ॥ - (ભગવદ્ગીતાયાં ૬.૨૪) ॥

"શનૈઃ શનૈરુપરમેદબુદ્ધ્યા ધૃતિગૃહીતયા ।
આત્મસંસ્થં મનઃ કૃત્વા ન કિઞ્ચિદપિ ચિન્તયેત્ ॥ - (તત્રૈવ ૬.૨૫) ॥

"યતો યતો નિશ્ચરતિ મનશ્ચઞ્ચલમસ્થિરમ્ ।
તતસ્તતો નિયમ્યૈતદાત્મન્યેવ વશં નયેત્" ॥ - (તત્રૈવ ૬.૨૬) ઇતિ ॥

કામ્યમાનાઃ સ્રક્ચન્દનવનિતાપુત્રમિત્રગૃહક્ષેત્રાદયો મોક્ષશાસ્ત્રકુશલવિવેકિજનપ્રસિદ્ધૈર્બહુભિર્દોષૈરુપેતા અપ્યનાદ્યવિદ્યાવશાત્ તાન્દોષાનાચ્છાદ્ય તેષુ વિષયેષુ સમ્યક્ત્વં મનઃ કલ્પયતિ । તસ્માચ્ચ સઙ્કલ્પાદિદં મે સ્યાદિત્યેવંરૂપાઃ કામાઃ પ્રભવન્તિ । તથા ચ સ્મર્યતે-
"સઙ્કલ્પમૂલઃ કામો વૈ યજ્ઞાઃ સઙ્કલ્પસમ્ભવાઃ । " - (મનુસંહિતાયાં ૨.૩) ॥

“કામ જાનામિ તે મૂલં સઙ્કલ્પાત્ કિલ જાયસે ।
ન ત્વાં સઙ્કલ્પયિષ્યામિ સમૂલસ્ત્વં વિનઙ્ક્ષ્યસિ” ॥ - (મહાભારતે શાન્તિપર્વણિ ૧૭૧.૨૫) ઇતિ ॥

તત્ર વિવેકેન વિષયદોષેષુ સાક્ષાત્કૃતેષુ શુના વાન્તે પાયસ ઇવ કામાસ્ત્યજ્યન્તે । સ્રક્ચન્દનાદિષ્વિવ બ્રહ્મલોકાદિષ્વણિમાદ્યષ્ટૈશ્વર્યેષુ ચ કામાસ્ત્યાજ્યા ઇત્યભિપ્રેત્ય સર્વાનિત્યુક્તમ્ । માસોપવાસવ્રતિના તસ્મિન્માસેઽન્ને ત્યક્તેઽપિ કામઃ પુનઃ પુનરુદેતિ; તદ્વન્મા ભૂદિત્યશેષત ઇત્યુક્તમ્ । કામત્યાગે મનઃપૂર્વકપ્રવૃત્ત્યભાવેઽપિ ચક્ષુરાદીનાં રૂપાદિષુ યા સ્વભાવસિદ્ધા પ્રવૃત્તિઃ સાપિ પ્રયત્નયુક્તેન મનસૈવ નિયન્તવ્યા । દેવતાદર્શનાદિષ્વપ્યનનુસરણાય સમન્તત ઇત્યુક્તમ્ । ભૂમિકાજયક્રમેણોપરમસ્ય વિવક્ષિતત્વાચ્છનૈઃ શનૈરિત્યુક્તમ્ । તાશ્ચ ભૂમિકાશ્ચતસ્રઃ કઠવલ્લીષુ શ્રૂયન્તે -
“યચ્છેદ્વાઙ્મનસી પ્રાજ્ઞસ્તદ્યચ્છેજ્જ્ઞાન આત્મનિ ।
જ્ઞાનમાત્મનિ મહતિ નિયચ્છેત્તદ્યચ્છેચ્છાન્ત આત્મનિ” ॥ - (કઠ। ઉપ૦ .૧.૩.૧૩) ઇતિ ॥

વાગ્વ્યાપારો દ્વિવિધઃ -લૌકિકો વૈદિકશ્ચ । જલ્પાદિરૂપો લૌકિકઃ, જપાદિરૂપો વૈદિકઃ । તત્ર લૌકિકસ્ય બહુવિક્ષેપકરત્વાદ્ વ્યુત્થાનકાલેઽપિ યોગી તં પરિત્યજેત્ ।
અત એવ સ્મર્યતે-
“મૌનં યોગાસનં યોગસ્તિતિક્ષૈકાન્તશીલતા ।
નિઃસ્પૃહત્વં સમત્વં ચ સપ્તૈતાન્યેકદણ્ડિનઃ” ॥ - (નારદ પરિ। ઉપ૦ .૪.૨૫) ઇતિ ॥

જપાદિકં નિરોધસમાધૌ પરિત્યજેત્ । સેયં વાગ્ભૂમિઃ પ્રથમા । તાં ભૂમિં પ્રયત્નમાત્રેણ કતિપયૈર્દિનૈર્માસૈર્વત્સરૈર્વા દૃઢં વિજિત્ય પશ્ચાદ્વિતીયાયાં મનોભૂમૌ પ્રયતેત; અન્યથા બહુભૂમિકાપ્રાસાદવત્પ્રથમભૂમિપાતેનૈવોપરિતનયોગભૂમયઃ સર્વા વિનશ્યેયુઃ । યદ્યપિ ચક્ષુરાદયો નિરોદ્ધવ્યાઃ, તથાપિ તેષાં વાગ્ભૂમૌ મનોભૂમૌ વાન્તર્ભાવો દ્રષ્ટવ્યઃ ।
નનુ વાચં મનસિ નિયચ્છેદિત્યનુપપન્નં ; ન હીન્દ્રિયસ્યેન્દ્રિયાન્તરે પ્રવેશોઽસ્તિ ।
મૈવમ્ । પ્રવેશસ્યાવિવક્ષિતત્વાત્ । નાનાવિક્ષેપકારિણોર્વાઙ્મનસયોર્મધ્યે પ્રથમતો વાગ્વ્યાપારનિયમનેન મનોવ્યાપારમાત્રપરિશેષ ઇહ વિવક્ષિતઃ । ગોમહિષાશ્વાદીનામિવ વાઙ્નિયમે સ્વાભાવિકે સમ્પન્ને તતો જ્ઞાનાત્મનિ મનો નિયચ્છેત્ । આત્મા ત્રિવિધઃ, જ્ઞાનાત્મા મહાત્મા શાન્તાત્મા ચેતિ । જાનાત્યત્ર સ્થિત આત્મેતિ જ્ઞાતૃત્વોપાધિરહઙ્કારોઽત્ર જ્ઞાનશબ્દેન વિવક્ષિતઃ, કરણસ્ય મનસો નિયમ્યત્વેન પૃથગુપાત્તત્વાત્ । અહઙ્કારો દ્વિવિધઃ - વિશેષરૂપઃ સામાન્યરૂપશ્ચેતિ । “અયમહમેતસ્ય પુત્ર” ઇત્યેવં વ્યક્તમભિમન્યમાનો વિશેષરૂપઃ । “અસ્મિ” ઇત્યેતાવન્માત્રમભિમન્યમાનઃ સામાન્યરૂપઃ સ ચ સર્વવ્યક્તિષુ વ્યાપ્તત્વાન્મહાનિત્યુચ્યતે । તાભ્યામહઙ્કારાભ્યાં દ્વાભ્યામુપહિતૌ દ્વાવાત્માનૌ । નિરુપાધિકઃ શાન્તાત્મા । તદેતત્સર્વમન્તર્બહિર્ભાવેન વર્તતે । શાન્ત આત્મા સર્વાન્તરશ્ચિદેકરસઃ। તસ્મિન્નાશ્રિતં જડશક્તિરૂપમવ્યક્તં મૂલપ્રકૃતિઃ । સા ચ પ્રથમં સામાન્યાહઙ્કારરૂપેણ મહત્તત્ત્વનામ્ના વ્યક્તીભવતિ । તતો બહિર્વિશેષાહઙ્કારરૂપેણ, તતો બહિર્મનોરૂપેણ તતો બહિર્વાગાદીન્દ્રિયરૂપેણ । તદેતદભિપ્રેત્યોત્ત-રોત્તરમાન્તરત્વં વિવિનક્તિ શ્રુતિઃ-
“ઇન્દ્રિયેભ્યઃ પરા હ્યર્થા અર્થેભ્યશ્ચ પરં મનઃ ।
મનસસ્તુ પરા બુદ્ધિર્બુદ્ધેરાત્મા મહાન્પરઃ ॥

મહતઃ પરમવ્યક્તમવ્યક્તાત્ પુરુષઃ પરઃ ।
પુરુષાન્ન પરં કિઞ્ચિત્સા કાષ્ઠા સા પરા ગતિઃ” ॥ - (કઠ। ઉપ૦ .૧.૩.૧૦, ૧૧) ઇતિ ॥

એવં સત્યત્ર નાનાવિધસઙ્કલ્પવિકલ્પસાધનં કરણરૂપં મનોઽહઙ્કર્તરિ નિયચ્છેત્ । મનોવ્યાપારાન્પરિત્યજ્યાહઙ્કારમાત્રં શેષયેત્ । ન ચૈતદશક્યમિતિ વાચ્યમ્,
“તસ્યાહં નિગ્રહં મન્યે વાયોરિવ સુદુષ્કરમ્” ॥ (ભગવદ્ગીતાયાં ૬.૩૪) ઇતિ વદન્તમર્જુનં પ્રતિ ભગવતોત્તરાભિધાનાત્-
“અસંશયં મહાબાહો મનો દુર્નિગ્રહં ચલમ્ ।
અભ્યાસેન તુ કૌન્તેય વૈરાગ્યેણ ચ ગૃહ્યતે ॥

અસંયતાત્મના યોગો દુષ્પ્રાપ ઇતિ મે મતિઃ ।
વશ્યાત્મના તુ યતતા શક્યોઽવાપ્તુમુપાયતઃ” ॥ - (ભગવદ્ગીતાયાં ૬.૩૫, ૩૬) ઇતિ ॥

અભ્યાસવૈરાગ્યે પતઞ્જલિસૂત્રોદાહરણેન વ્યાખ્યાસ્યેતે । પૂર્વપૂર્વભૂમિદાઢર્યરહિતોઽસંયતાત્મા । તત્સહિતો વશ્યાત્મા । ઉપાયતઃ પ્રાપ્તિં ગૌડપાદાચાર્યાઃ સદૃષ્ટાન્તમાહુઃ-
“ઉત્સેક ઉદધેર્યદ્વત્કુશાગ્રેણૈકબિન્દુના ।
મનસો નિગ્રહસ્તદ્વદ્ભવેદપરિખેદતઃ” ॥ - (માણ્ડૂક્યકારિકાયાં ૩.૪૧) ઇતિ ॥

“બહુભિર્ન વિરોદ્ધવ્યમેકેનાપિ બલીયસા ।
સ પરાભવમાપ્નોતિ સમુદ્ર ઇવ ટિટ્ટિભાત્” ॥

અત્ર સમ્પ્રદાયવિદ આખ્યાયિકામાચક્ષતે- “કસ્યચિત્કિલ પક્ષિણોઽણ્ડાનિ તીરસ્થાન્યુદધિરુત્સે-કેનાપજહાર । તં ચ સમુદ્રં શોષયામીતિ પ્રવૃત્તઃ સ ચ પક્ષી સ્વમુખાગ્રેણૈકૈકં જલબિન્દું બહિઃ પ્રક્ષિપતિ સ્મ । તદા બહુભિઃ પક્ષિભિર્બન્ધુવર્ગૈર્વાર્યમાણોઽપ્યનુપરતઃ પ્રત્યુત તાનપિ સહકારિણો વવ્રે । તાંશ્ચ પતનોત્પતનાભ્યાં બહુધા ક્લિશ્યતઃ સર્વાનવલોક્ય કૃપાલુર્નારદો ગરુડં સમીપે પ્રેષયામાસ । તતો ગરુડપક્ષવાતેન શુષ્યન્સમુદ્રો ભીતસ્તાન્યણ્ડાન્યાનીય પક્ષિણે દદૌ” ।
એવમખેદેન મનોનિરોધે પરમધર્મે પ્રવર્તમાનં યોગિનમીશ્વરોઽનુગૃહ્ણાતિ । અખેદશ્ચ મધ્યે મધ્યે તદનુકૂલવ્યાપારમિશ્રણેન સમ્પદ્યતે, યથૌદનં ભુઞ્જાનસ્તત્તદ્ગ્રાસાન્તરે ચોષ્યલેહ્યાદીનાસ્વાદયતિ તદ્વત્ । ઇદમેવાભિપ્રેત્ય વસિષ્ઠ આહ-
“ચિત્તસ્ય ભોગૈર્દ્વૌ ભાગૌ શાસ્ત્રેણૈકં પ્રપૂરયેત્ ।
ગુરુશુશ્રૂષયા ભાગમવ્યુત્પન્નસ્ય સત્ક્રમે” ॥ - (લઘુયોગવાસિષ્ઠે ૨૧.૩૬) ॥

“કિઞ્ચિદ્વ્યુત્પત્તિયુક્તસ્ય ભાગં ભોગૈઃ પ્રપૂરયેત્ ।
ગુરુશુશ્રૂષયા ભાગ ભાગં શાસ્ત્રાર્થચિન્તયા” ॥ - (તત્રૈવ ૨૧.૩૭) ॥

“વ્યુત્પત્તિમનુયાતસ્ય પૂરયેચ્ચેતસોઽન્વહમ્ ।

દ્વૌ ભાગૌ શાસ્ત્રવૈરાગ્યૈર્દ્વૌ ધ્યાનગુરુપૂજયા" ॥ - (તત્રૈવ ૨૧.૩૮) ઇતિ ॥

ભોગશબ્દેનાત્ર જીવનહેતુર્ભિક્ષાટનાદિવ્યાપારો વર્ણાશ્રમોચિતવ્યાપારશ્ચોચ્યતે । ઘટિકામાત્રં મુહૂર્તં વા યથાશક્તિ યોગમભ્યસ્ય તતો મુહૂર્તં શાસ્ત્રશ્રવણેન પરિચર્યયા વા ગુરૂનનુગમ્ય મુહૂર્તં સ્વદેહમનુસૃત્ય મુહૂર્તં યોગશાસ્ત્રં પર્યાલોચ્ય પુનર્મુહૂર્તં યોગમભ્યસ્યેત્ । એવં યોગપ્રાધાન્યેન વ્યાપારાન્તરાણિ મેલયંસ્તાનિ દ્રાગભ્યસ્ય
શયનકાલે તદ્દિનગતાન્ યોગમુહૂર્તાન્ ગણયેત્ । તતઃ પરેદ્યુર્વા પરપક્ષે વા પરમાસે વા યોગમુહૂર્તાન્ વર્ધયેત્ । તથા ચૈકૈકસ્મિન્મુહૂર્તે એકૈકક્ષણયોગેઽપિ સંવત્સરમાત્રેણ ભૂયાન્યોગકાલો ભવતિ ।
ન ચૈવં યૌગૈકશરણત્વે વ્યાપારાન્તરાણિ લુપ્યેરન્નિતિ શઙ્કનીયમ્, લુપ્તેતરકૃત્સ્નવ્યાપારસ્યૈવ યોગેઽધિકારાત્ । અત એવ વિદ્વત્સંન્યાસોઽપેક્ષ્યતે । તસ્માત્તદેકનિષ્ઠઃ પુમાનધ્યેતૃવણિગાદિવત્ક્રમેણ યોગારૂઢો ભવતિ ।
યથાધ્યેતા માણવકઃ પાદાંશં પાદમર્ધર્ચમૃચમૃગ્દ્વયં વર્ગં ચ ક્રમેણ પઠન્દશદ્વાદશવર્ષૈરધ્યાપકો ભવતિ, યથા ચ વાણિજ્યં કુર્વન્નેકનિષ્કદ્વિનિષ્કાદિક્રમેણ લક્ષપતિઃ કોટિપતિર્વા ભવતિ તથા તાભ્યાં વણિગધ્યેતૃભ્યાં
સહૈવોપક્રમ્ય મત્સરગ્રસ્ત ઇવ યુઞ્જાનસ્તાવતા કાલેન કુતો ન યોગમારોહેત્ ?
તસ્માત્પુનઃ પુનઃ પ્રાપ્યમાણાન્સઙ્કલ્પવિકલ્પાનુદ્દાલકવત્ પૌરુષપ્રયત્નેન પરિત્યજ્યાહઙ્કર્તરિ જ્ઞાનાત્મનિ મનો નિયચ્છેત્ । તામેતાં દ્વિતીયભૂમિકાં વિજિત્ય બાલમૂકાદિવન્નિર્મનસ્ત્વે સ્વાભાવિકે સતિ તતો વિશેષાહઙ્કારરૂપં વિસ્પષ્ટં જ્ઞાનાત્માનમસ્પષ્ટે સામાન્યાહઙ્કારે મહત્તત્ત્વે નિયચ્છેત્ । યથા સ્વલ્પાં તન્દ્રાં પ્રાપ્તવતો વિશેષાહઙ્કારઃ સ્વત એવ સઙ્કુચતિ, વિનૈવ તન્દ્રાં તથા વિસ્મરણે પ્રયતમાનસ્યાહઙ્કારસઙ્કોચો ભવતિ । સેયં લોકપ્રસિદ્ધ્યા તન્દ્રયા તાર્કિકાભિમતનિર્વિકલ્પકજ્ઞાનેન ચ સમાના મહત્તત્ત્વમાત્રપરિશેષાવસ્થા તૃતીયા ભૂમિઃ । અસ્યાં ચાભ્યાસપાટવેન વશીકૃતાયાં તમેતં સામાન્યાહઙ્કારરૂપં મહાન્તમાત્માનં નિરુપાધિતયા શાન્તે ચિદેકરસસ્વભાવે નિયચ્છેત્ ।
"મહત્તત્ત્વં તિરસ્કૃત્ય ચિન્માત્રં પરિશેષયેત્" ।
અત્રાપિ પૂર્વોક્તવિસ્મૃતિપ્રયત્ન એવ તતોઽપ્યતિશયેનોપાયતામાપદ્યતે । યથા શાસ્ત્રાભ્યાસપ્રવૃત્તસ્ય વ્યુત્પત્તેઃ પ્રાક્પ્રતિગ્રન્થવ્યાખ્યાનાપેક્ષાયામપિ વ્યુત્પન્નસ્ય સ્વત એવોત્તરગ્રન્થાર્થઃ પ્રતિભાતિ, તથા સમ્યગ્વશીકૃતપૂર્વભૂમેર્યોગિન ઉત્તરભૂમ્યુપાયઃ સ્વત એવ પ્રતિભાતિ । તદાહ યોગભાષ્યકારઃ-
"યોગેન યોગો જ્ઞાતવ્યો યોગો યોગાત્પ્રવર્તતે ।
યોઽપ્રમત્તસ્તુ યોગેન સ યોગી રમતે ચિરમ્" ॥ - (યોગસૂત્રભાષ્યે ૩.૬ ; સૌભાગ્યલક્ષ્મ્યુપનિષદિ ૨.૭) ઇતિ ॥

નનુ મહત્તત્ત્વશાન્તાત્મનોર્મધ્યે મહત્તત્ત્વોપાદાનમવ્યક્તાખ્યં તત્ત્વં શ્રુત્યોદાહૃતમ્ । તત્ર તો નિયમનં નાભિધીયત ઇતિ ચેત્-
ન; લયપ્રસઙ્ગાદિતિ બ્રૂમઃ । યથા ઘટોઽનુપાદાને જલે નિરુધ્યમાનો ન લીયતે , ઉપાદાનભૂતાયાં તુ મૃદિ લીયતે; તથા મહત્તત્ત્વમાત્મનિ ન લીયતે, અવ્યક્તે તુ લીયતે । ન ચ સ્વરૂપલયઃ પુરુષાર્થ આત્મદર્શનાનુપયોગાત્ । "દૃશ્યતે ત્વગ્ર્યયા બુદ્ધ્યા સૂક્ષ્મયા સૂક્ષ્મદર્શિભિઃ" ઇતિ પૂર્વવાક્યે આત્મદર્શનં વિધાય સૂક્ષ્મત્વસિદ્ધ્યે નિરોધસ્યાભિધાનાત્, લયસ્ય પ્રતિદિનં સુષુપ્તૌ સ્વતઃ સિદ્ધત્વેન પ્રયત્નવૈયર્થ્યાચ્ચ ।
નનુ ધારણાધ્યાનસમાધિભિઃ સમ્પ્રજ્ઞાતસ્યૈકાગ્ર્યવૃત્તિરૂપત્વેન દર્શનહેતુત્વેઽપિ શાન્તાત્મન્યવરુદ્ધસ્યા-સમ્પ્રજ્ઞાતસમાધિમાપન્નસ્ય ચિત્તસ્ય વૃત્તિરહિતત્વેન સુષુપ્તિવન્ન દર્શનહેતુત્વમિતિ ચેત્ -

ચિત્તસ્ય
ન, સ્વતઃ સિદ્ધસ્ય દર્શનસ્ય નિવારયિતુમશક્યત્વાત્ । અત એવ શ્રેયોમાર્ગેઽભિહિતં -
“આત્માનાત્માકારં સ્વભાવતોઽવસ્થિતં સદા ચિત્તમ્ ।
આત્મૈકાકારતયા તિરસ્કૃતાનાત્મદૃષ્ટિ વિદધીત” ॥ “ઇતિ
યથા ઘટ ઉત્પદ્યમાનઃ સ્વતો વિયત્પૂર્ણ એવોત્પદ્યતે, જલતણ્ડુલાદિપૂરણં તૂત્પન્ને ઘટે પશ્ચાત્પુરુષપ્રયત્નેન ભવતિ; યથા તત્ર જલાદૌ નિઃસારિતેઽપિ ન વિયન્નિઃસારયિતું શક્યતે, મુખપિધાનેઽપ્યન્તર્વિયદવતિષ્ઠત એવ; તથા ચિત્તમુત્પદ્યમાનમાત્મચૈતન્યપૂર્ણમેવોત્પદ્યતે । ઉત્પન્ને ચિત્તે પશ્ચાન્મૂષાનિષિક્તદ્રુતતામ્રવદ્ઘટપટ-રૂપરસસુખદુઃખાદિવૃત્તિરૂપત્વં ભોગહેતુધર્માધર્માદિવશાદ્ભવતિ । તત્ર રૂપરસાદ્યનાત્માકારે નિવારિતેઽપિ નિર્નિમિત્તશ્ચિદાકારો ન નિવારયિતું શક્યતે । તતો નિરોધસમાધિના નિર્વૃત્તિકેન સંસ્કારમાત્રશેષતયા સૂક્ષ્મેણ ચિદાત્મમાત્રાભિમુખત્વાદેકાગ્રેણ ચિત્તેન નિર્વિઘ્નમાત્માઽનુભૂયતે । અનેનૈવાભિપ્રાયેણ વાર્તિકકાર-સર્વાનુભવયોગિનાવાહતુઃ-
“સુખદુઃખાદિરૂપત્વં ધિયો ધર્માદિહેતુતઃ ।
નિર્હેતુત્વાત્મસમ્બોધરૂપત્વં વસ્તુવૃત્તિતઃ ॥

પ્રશાન્તવૃત્તિકં ચિત્તં પરમાનન્દદીપકમ્ ।
અસમ્પ્રજ્ઞાતનામાયં સમાધિર્યોગિનાં પ્રિયઃ” ॥ ઇતિ - (મુક્તિકોપનિષદિ ૨.૫૩, ૫૪) ॥

આત્મદર્શનસ્ય સ્વતઃ સિદ્ધત્વેઽપ્યનાત્મદર્શનવારણાય નિરોધાભ્યાસઃ । અત એવોક્તં -
“આત્મસંસ્થં મનઃ કૃત્વા ન કિઞ્ચિદપિ ચિન્તયેત્” । (ભ। ગીતાયાં ૬.૨૫) ઇતિ ।
યોગશાસ્ત્રસ્ય ચિત્તચિકિત્સકસમાધિમાત્રે પ્રવૃત્તત્વાન્નિરોધસમાધાવાત્મદર્શનં તત્ર ન સાક્ષાદુક્તમ્ । ભઙ્ગ્યન્તરેણ ત્વભ્યુપગમ્યતે, “યોગશ્ચિત્તવૃત્તિનિરોધઃ” (યોગસૂત્રેષુ ૧.૨) ઇતિ સૂત્રયિત્વા “તદા દ્રષ્ટુઃ સ્વરૂપેઽવસ્થાનમ્” (યોગસૂત્રેષુ ૧.૩) ઇતિ સૂત્રણાત્ ।
યદ્યપિ નિર્વિકારો દ્રષ્ટા સદા સ્વરૂપ એવાવતિષ્ઠતે, તથાપિ વૃત્તિષૂત્પદ્યમાનાસુ તત્ર ચિચ્છાયાયાં પ્રતિબિમ્બિતાયાં તદવિવેકાદસ્વસ્થ ઇવ દ્રષ્ટા ભવતિ । તદપ્યનન્તરસૂત્રેણોક્તમ્-
“વૃત્તિસારૂપ્યમિતરત્ર” (યોગસૂત્રેષુ ૧.૪) , ઇતિ ।
અન્યત્રાપિ સૂત્રિતમ્-
“સત્ત્વપુરુષયોરત્યન્તાસઙ્કીર્ણયોઃ પ્રત્યયાવિશેષો ભોગઃ પરાર્થત્વાત્” (યોગસૂત્રેષુ ૩.૩૬) ઇતિ, “ચિતેરપ્રતિસઙ્ક્રમાયાસ્તદાકારાપત્તૌ સ્વબુદ્ધિસંવેદનં” “(યોગસૂત્રેષુ ૪.૨૨) ઇતિ ચ ।
નિરોધસમાધિના શોધિતે ત્વમ્પદાર્થે સાક્ષાત્કૃતેઽપિ તસ્ય બ્રહ્મત્વં ગોચરયિતું મહાવાક્યેન બ્રહ્મવિદ્યાનામકં વૃત્ત્યન્તરમુત્પદ્યતે; ન ચ શુદ્ધત્વમ્પદાર્થસાક્ષાત્કારે નિરોધસમાધિરેક એવોપાયઃ ; કિં તુ ચિજ્જડવિવેકેનાપિ પૃથક્કૃતે તત્ર સાક્ષાત્કારસમ્ભવાત્ । અત એવ વસિષ્ઠ આહ-
“દ્વૌ ક્રમૌ ચિત્તનાશસ્ય યોગો જ્ઞાનં ચ રાઘવ ।
યોગસ્તદ્વૃત્તિરોધો હિ જ્ઞાનં સમ્યગવેક્ષણમ્” ॥ - (લઘુયોગવાસિષ્ઠે ૨૭.૭૨) ઇતિ ॥

"અસાધ્યઃ કસ્યચિદ્યોગઃ કસ્યચિજ્જ્ઞાનનિશ્ચયઃ ।
પ્રકારૌ દ્વૌ તતો દેવો જગાદ પરમેશ્વરઃ" ॥ - (તત્રૈવ ૨૯.૬૦) ઇતિ ચ ॥

નનુ વિવેકોઽપિ યોગે પર્યવસ્યતિ, દર્શનવેલાયામાત્મમાત્રગોચરાયા એકાગ્રવૃત્તેઃ ક્ષણિકસમ્પ્રજ્ઞાતરૂપત્વાત્ ।
બાઢમ્ । તથાપિ સમ્પ્રજ્ઞાતાસમ્પ્રજ્ઞાતયોઃ સ્વરૂપતઃ સાધનતશ્ચાસ્ત્યેવ મહદ્વૈલક્ષણ્યમ્ । સ્ફુટઃ સ્વરૂપભેદઃ । સાધનં તુ સમ્પ્રજ્ઞાતસ્ય સજાતીયત્વાદ્ધારણાદિત્રયમન્તરઙ્ગમ્, અસમ્પ્રજ્ઞાતસ્ય ત્વવૃત્તિકસ્ય વિજાતીયત્વાદ્બહિરઙ્ગમ્।
તથા ચ સૂત્રં -
"તદપિ બહિરઙ્ગં નિર્બીજસ્ય" (યોગસૂત્રેષુ ૩.૮) ઇતિ ।
વિજાતીયત્વેઽપિ બહુવિધાનાત્મવૃત્તિનિવારણેનોપકારિતયા બહિરઙ્ગત્વમવિરુદ્ધમ્ । તદેવોપકારિત્વં વિશદયિતું સૂત્રયતિ-
"શ્રદ્ધાવીર્યસ્મૃતિસમાધિપ્રજ્ઞાપૂર્વક ઇતરેષામ્" (યોગસૂત્રેષુ ૧.૨૦) ઇતિ ।
કેષાઞ્ચિદ્દેવાદીનાં પૂર્વસૂત્રે જન્મનૈવ સમાધિમુક્ત્વા મનુષ્યાન્પ્રત્યેતદુચ્યતે । મમાયં યોગ એવ પરમપુરુષાર્થસાધનમિતિ પ્રત્યયઃ શ્રદ્ધા । સા ચોત્કર્ષશ્રવણેનોપજાયતે । તદુત્કર્ષશ્ચ સ્મર્યતે-
"તપસ્વિભ્યોઽધિકો યોગી જ્ઞાનિભ્યોઽપિ મતોઽધિકઃ ।
કર્મિભ્યશ્ચાધિકો યોગી તસ્માદ્યોગી ભવાર્જુન" । - (ભગવદ્ગીતાયાં ૬.૪૬) ઇતિ ॥

ઉત્તમલોકસાધનત્વાત્ કૃચ્છ્રચાન્દ્રાયણાદિતપસો જ્યોતિષ્ટોમાદિકર્મણશ્ચ યોગોઽધિકઃ। જ્ઞાનં પ્રત્યન્તરઙ્ગત્વાચ્ચિત્તવિશ્રાન્તિહેત ચ જ્ઞાનાદપ્યધિકઃ । એવં જાનતો યોગે શ્રદ્ધા જાયતે । તસ્યાં ચ શ્રદ્ધાયાં વાસિતાયાં વીર્યમુત્સાહો ભવતિ - સર્વથા યોગં સમ્પાદયિષ્યામીતિ । એતાદૃશેનોત્સાહેન તદા તદાનુષ્ઠેયાનિ યોગાઙ્ગાનિ સ્મર્યન્તે । તયા ચ સ્મૃત્યા સમ્યગનુષ્ઠિતસમાધેરધ્યાત્મપ્રસાદે સત્યૃતમ્ભરા પ્રજ્ઞોદેતિ ।
તત્પ્રજ્ઞાપૂર્વકસ્તત્પ્રજ્ઞાકારણકોઽસમ્પ્રજ્ઞાતસમાધિરિતરેષાં દેવાદિભ્યોઽર્વાચીનાનાં મનુષ્યાણાં સિધ્યતિ । તાં ચ પ્રજ્ઞાં સૂત્રયતિ-
"ઋતમ્ભરા તત્ર પ્રજ્ઞા" (યોગસૂત્રેષુ ૧.૪૮) ઇતિ ।
ઋતં સત્યં વસ્તુયાથાત્મ્યં બિભર્તિ પ્રકાશયતીતિ ઋતમ્ભરા । તત્ર તસ્મિન્સમાધ્યુત્કર્ષજન્યેઽધ્યાત્મપ્રસાદે સતીત્યર્થઃ । ઋતમ્ભરત્વોપપત્તિં સૂત્રયતિ-
"શ્રુતાનુમાનપ્રજ્ઞાભ્યામન્યવિષયા વિશેષાર્થત્વાત્" (યોગસૂત્રેષુ ૧.૪૯) ઇતિ ।
સૂક્ષ્મવ્યવહિતવિપ્રકૃષ્ટવસ્તુષ્વયોગિપ્રત્યક્ષં ન પ્રવર્તતે । આગમાનુમાનાભ્યાં તાનિ વસ્તૂન્યયોગિભિર્જ્ઞાયન્તે । તે ચ શાસ્ત્રાનુમાનજન્યે પ્રજ્ઞે વસ્તુસામાન્યમેવ ગોચરયતઃ । ઇદં તુ યોગિપ્રત્યક્ષં વસ્તુવિશેષગોચરત્વાદૃતમ્ભરમ્ । તસ્ય ચ યોગિપ્રત્યક્ષસ્યાસમ્પ્રજ્ઞાતસમાધૌ બહિરઙ્ગત્વસિદ્ધ્યર્થમુપકારિત્વં સૂત્રયતિ-
"તજ્જઃ સંસ્કારોઽન્યસંસ્કારપ્રતિબન્ધી" (યોગસૂત્રેષુ ૧.૫૦) ઇતિ ।
અસમ્પ્રજ્ઞાતસમાધેર્બહિરઙ્ગસાધનમુક્ત્વા તન્નિરોધપ્રયત્નસ્યાન્તરઙ્ગસાધનતાં સૂત્રયતિ-
"તસ્યાપિ નિરોધે સર્વનિરોધાન્નિર્બીજઃ સમાધિઃ" (યોગસૂત્રેષુ ૧.૫૧) ઇતિ ।

સોઽયં સમાધિઃ સુષુપ્તિસમાનઃ સાક્ષિચૈતન્યેનાનુભવિતું શક્યઃ । ન ચાસૌ સર્વધીવૃત્તિરાહિત્યાત્સુષુપ્તિરેવેતિ શઙ્કનીયમ્, મનઃ સ્વરૂપસ્ય સદસત્ત્વાભ્યાં વિશેષાત્ । તદુક્તં ગૌડપાદાચાર્યૈઃ–

“નિગૃહીતસ્ય મનસો નિર્વિકલ્પસ્ય ધીમતઃ ।
પ્રચારઃ સ તુ વિજ્ઞેયઃ સુષુપ્તેઽન્યો ન તત્સમઃ ॥

યહિ સુષુપ્તૌ તન્નિગૃહીતં ન લીયતે ।
તદેવ નિર્ભયં બ્રહ્મ જ્ઞાનાલોકં સમન્તતઃ” ॥ - (માણ્ડૂક્યકારિકાયાં ૩.૩૪-૩૫) ઇતિ,
દ્વૈતસ્યાગ્રહણં તુલ્યમુભયોઃ પ્રાજ્ઞતુર્યયોઃ ।
બીજનિદ્રાયુતઃ પ્રાજ્ઞઃ સા ચ તુર્યે ન વિદ્યતે ॥

સ્વપ્નનિદ્રાયુતાવાદ્યૌ પ્રાજ્ઞસ્ત્વસ્વપ્નનિદ્રયા ।
ન નિદ્રાં નૈવ ચ સ્વપ્નં તુર્યે પશ્યન્તિ નિશ્ચિતાઃ ॥

અન્યથા ગૃહ્ણતઃ સ્વપ્નો નિદ્રા તત્ત્વમજાનતઃ ।
વિપર્યાસે તયોઃ ક્ષીણે તુરીયં પદમશ્નુતે” ॥ - (માણ્ડૂક્યકારિકાયાં ૧.૧૩-૧૫) । ઇતિ ચ ॥

આદ્યૌ વિશ્વતૈજસૌ । અદ્વૈતસ્ય વસ્તુનોઽન્યથાગ્રહણં નામ દ્વૈતરૂપેણ પ્રતિભાસઃ । સ ચ વિશ્વતૈજસયોર્વર્તમાનઃ સ્વપ્ન ઇત્યુચ્યતે । તત્ત્વસ્યાજ્ઞાનં નિદ્રા । સા ચ વિશ્વતૈજસપ્રાજ્ઞેષુ વર્તતે । તયોઃ સ્વપ્નનિદ્રયોઃ સ્વરૂપભૂતયોર્વિપર્યાસો મિથ્યાજ્ઞાનમ્ । તસ્મિન્ વિદ્યયા ક્ષીણે સતિ તુરીયં પદમદ્વૈતં વસ્ત્વશ્નુતેઽનુભવતીત્યર્થઃ ।

નન્વસ્ત્વેવમસમ્પ્રજ્ઞાતસમાધિસુષુપ્ત્યોર્મહાન્ભેદઃ, તત્ર તત્ત્વદિદૃક્ષોર્દર્શનસાધનત્વેન સમાધ્યપેક્ષાયામપિ દૃષ્ટતત્ત્વસ્ય જીવન્મુક્તયે નાસ્તિ તદપેક્ષા, રાગદ્વેષાદિક્લેશબન્ધસ્ય સુષુપ્ત્યાપિ નિવૃત્તેઃ ।

મૈવમ્ । કિં પ્રતિદિનં સ્વતઃ પ્રાપ્તા કાદાચિત્કી સુષુપ્તિર્બન્ધનિવર્તિકા, કિં વાભ્યાસેન નિરન્તરવર્તિની ? આદ્યેઽપિ કિં સુષુપ્તિકાલીનસ્ય ક્લેશબન્ધસ્ય નિવૃત્તિઃ, કિં વા કાલાન્તરવર્તિનઃ ?

નાદ્યઃ, અપ્રસક્તેઃ । ન હિ મૂઢાનામપિ સુષુપ્તૌ ક્લેશબન્ધઃ, અન્યથાયાસઃ પ્રસજ્યેત । નદ્વિતીયઃ, અસમ્ભવાત્ । ન હ્યન્યકાલીનયા સુષુપ્ત્યા કાલાન્તરવર્તિનઃ ક્લેશસ્ય ક્ષયઃ સમ્ભવતિ; અન્યથા મૂઢાનામપિ જાગરણસ્વપ્નયોઃ ક્લેશસ્ય ક્ષયઃ પ્રસજ્યેત । નાપિ સુષુપ્તૌ નૈરન્તર્યમભ્યસિતું શક્યમ્, તસ્યાઃ કર્મક્ષયનિમિત્તત્વાત્ । તસ્માત્તત્ત્વવિદોઽપિ ક્લેશક્ષયાયાસ્ત્યેવાસમ્પ્રજ્ઞાતસમાધ્યપેક્ષા ।

તસ્ય ચ સમાધેર્ગવાશ્વાદિષ્વિવ વાઙ્નિરોધઃ પ્રથમા ભૂમિઃ । બાલમૂઢાદિષ્વિવ નિર્મનસ્ત્વં દ્વિતીયા । તન્દ્રાયામિવાહઙ્કારરાહિત્યં તૃતીયા । સુષુપ્તાવિવ મહત્તત્ત્વરાહિત્યં ચતુર્થી । તદેતદ્ભૂમિચતુષ્ટયમભિપ્રેત્ય “શનૈઃ શનૈરુપરમેત્” ઇત્યુક્તમ્ ।

અત્ર ચોપરમે ધૃતિગૃહીતા બુદ્ધિઃ સાધનમ્ । મહદહઙ્કારમનોવાગાદીનાં સ્વત એવ તીવ્રવેગેણ બહિઃ પ્રવહતાં કૂલઙ્કુષાયા નદ્યા ઇવ નિરોધે ધૈર્યં મહદપેક્ષિતમ્ । બુદ્ધિર્વિવેકઃ । પૂર્વા ભૂમિર્જિતા વા ન વેતિ પરિક્ષ્ય જિતાયામુત્તરભૂમ્યુપક્રમઃ, અજિતાયાં તુ સૈવ પુનરભ્યસનીયેતિ તદા તદા વિવિચ્યાત્ (વિવિઞ્ચયાત્ ઇતિ વા

પાઠઃ) । “આત્મસંસ્થં -” (ભગવદ્ગીતાયાં ૬.૨૫) ઇત્યાદિના સાર્ધશ્લોકેન ચતુર્થભૂમ્યભ્યાસોઽપિ સ્મૃતઃ । ગૌડપાદાચાર્યા આહુઃ-

“ઉપાયેન નિગૃહ્ણીયાદ્વિક્ષિપ્તં કામભોગયોઃ ।
સુપ્રસન્નં લયે ચૈવ યથા કામો લયસ્તથા ॥ ૪૨॥

દુઃખં સર્વમનુસ્મૃત્ય કામભોગાન્નિવર્તયેત્ ।
અજં સર્વમનુસ્મૃત્ય જાતં નૈવ તુ પશ્યતિ ॥ ૪૩॥

લયે સમ્બોધયેચ્ચિત્તં વિક્ષિપ્તં શમયેત્પુનઃ ।
સકષાયં વિજાનીયાત્સમપ્રાપ્તં ન ચાલયેત્” ॥ ૪૪॥ - (માણ્ડૂક્યકારિકાયાં ૩.૪૨-૪૪) ॥

“નાસ્વાદયેત્સુખં તત્ર નિઃસઙ્ગઃ પ્રજ્ઞયા ભવેત્ ।
નિશ્ચલં નિશ્ચરચ્ચિત્તમેકીકુર્યાત્પ્રયત્નતઃ ॥ ૪૫॥

“યદા ન લીયતે ચિત્તં ન ચ વિક્ષિપ્યતે પુનઃ ।
અનિઙ્ગનમનાભાસં નિષ્પન્નં બ્રહ્મ તત્તદા” ॥ ૪૬॥ - (માણ્ડૂક્યકારિકાયાં ૩.૪૫-૪૬) ઇતિ ॥

લયવિક્ષેપકષાયસમપ્રાપ્તયશ્ચતસ્રશ્ચિત્તસ્યાવસ્થાઃ । તત્ર નિરુધ્યમાનં ચિત્તં વિષયેભ્યો વ્યાવૃત્તં સત્પૂર્વાભ્યાસવશાદ્યદિ લયાય સુષુપ્તયેઽભિમુખં ભવેત્, તદાનીમુત્થાપનપ્રયત્નેન લયકારણનિવારણેન વા તચ્ચિત્તં સમ્યક્પ્રબોધયેત્ । લયહેતવો નિદ્રાશેષાજીર્ણબહ્વશનશ્રમાઃ । અત એવાહુઃ -

“સમાપય્ય નિદ્રાં સુજીર્ણાલ્પભોજી
શ્રમત્યાગ્યબાધે વિવિક્તે પ્રદેશે ।
સદાસીત નિસ્તૃષ્ણ એવાપ્રયત્નો-
ઽથ વા પ્રાણરોધી નિજાભ્યાસમાર્ગાત્” ॥ - (સૌભાગ્યલક્ષ્મ્યુપનિષદિ ૨.૨) ઇતિ ॥

લયાદુત્થાપિતં ચિત્તં દૈનન્દિનપ્રબોધાભ્યાસવશાદ્યદિ કામભોગયોર્વિક્ષિપ્યેત, તદા વિવેકિજનપ્રસિદ્ધભોગ્યવસ્તુગતસર્વદુઃખાનુસ્મ
શાસ્ત્રપ્રસિદ્ધજન્માદિરહિતાદ્વિતીયબ્રહ્મતત્ત્વાનુસ્મરણ-પૂર્વકેણ ભોગ્યવસ્તુદર્શનેન ચ પુનઃ પુનર્વિક્ષેપાચ્ચિત્તં શમયેત્ ।

કષાયસ્તીવ્રશ્ચિત્તદોષઃ । તીવ્રરાગદ્વેષાદિવાસનયા ગ્રસ્તં ચિત્તં કદાચિત્ સમાહિતમિવ લયવિક્ષેપરહિતં દુઃખૈકાગ્રમવતિષ્ઠતે; તાદૃશં તચ્ચિત્તં વિજાનીયાત્, સમાહિતચિત્તાદ્વિવેકેનાવગચ્છેત્ । અસમાહિતમેતદિત્યવગમ્ય લયવિક્ષેપવત્કષાયસ્ય પ્રતીકારં કુર્યાત્ । સમશબ્દેન બ્રહ્માભિધીયતે ।

“સમં સર્વેષુ ભૂતેષુ તિષ્ઠન્તં પરમેશ્વરમ્” । (ભગવદ્ગીતાયાં ૧૩.૨૮) ઇતિ સ્મૃતેઃ ।

લયવિક્ષેપકષાયેષુ પરિહૃતેષુ પરિશેષાચ્ચિત્તેન સમં બ્રહ્મ પ્રાપ્યતે । તચ્ચ સમપ્રાપ્તં ચિત્તં લયકષાયભ્રાન્ત્યા ન ચાલયેત્ । સૂક્ષ્મયા બુદ્ધ્યા લયકષાયપ્રાપ્તી વિવિચ્ય તસ્યાં સમપ્રાપ્તાવતિપ્રયત્નેન ચિરં સ્થાપયેત્ । સ્થાપિતે તસ્મિન્ બ્રહ્મસ્વરૂપભૂતઃ પરમાનન્દઃ સમ્યગાવિર્ભવતિ । તથા ચોદાહૃતં -

“સુખમાત્યન્તિકં યત્તદ્ બુદ્ધિગ્રાહ્યમતીન્દ્રિયમ્ । ” - (ભગવદ્ગીતાયાં ૬.૨૧) ઇતિ ॥

શ્રુતિશ્ચ ભવતિ
“સમાધિનિર્ધૂતમલસ્ય ચેતસો
નિવેશિતસ્યાત્મનિ યત્સુખં ભવેત્ ।
ન શક્યતે વર્ણયિતું ગિરા તદા
સ્વયં તદન્તઃકરણેન ગૃહ્યતે” ॥ - (મૈત્રાયણ્યુપનિષદિ ૪.૯) ઇતિ ॥

નનુ સમાધ્યાવિર્ભૂતસ્ય બ્રહ્માનન્દસ્ય બુદ્ધિગ્રાહ્યત્વં શ્રુતિસ્મૃતિભ્યામભિહિતમ્; આચાર્યૈસ્તુ - “નાસ્વાદયેત્સુખં તત્ર” (માણ્ડૂક્યકારિકાયાં ૩.૪૫) ઇતિ બુદ્ધિગ્રાહ્યત્વં પ્રતિષિધ્યત ઇતિ ચેત્ ।
નાયં દોષઃ । તત્ર નિરોધસુખં બુદ્ધિગ્રાહ્યં ન પ્રતિષિધ્યતે, કિં તુ સમાધિવિરોધિનો વ્યુત્થાનરૂપસ્ય પરામર્શસ્યૈવ પ્રતિષેધાત્ ।
યથા નિદાઘદિવસેષુ મધ્યાહ્ને જાહ્નવીહ્રદનિમગ્નેનાનુભૂયમાનમપિ શૈત્યસુખં તદા વક્તુમશક્યં પશ્ચાદુન્મગ્નેનાભિધીયતે; યથા વા સુષુપ્તાવવિદ્યાવૃત્તિભિરતિ-સૂક્ષ્માભિરનુભૂયમાનમપિ સ્વરૂપમુખં તદાનીં સવિકલ્પકેનાન્તઃ કરણવૃત્તિજ્ઞાનેન ગ્રહીતુમશક્યમ્, પ્રબોધકાલે તુ સ્મૃત્યા વિસ્પષ્ટં પરામૃશ્યતે; તથા સમાધૌ વૃત્તિરહિતેન સંસ્કારમાત્રશેષતયા સૂક્ષ્મેણ વા ચિત્તેન સુખાનુભવઃ શ્રુતિસ્મૃત્યોર્વિવક્ષિતઃ ।
“મહદિદં સમાધિસુખમન્વભૂવમ્” (માણ્ડૂક્યકારિકાયાં ૩.૪૫) ઇત્યેતાદૃશો વ્યુત્થિતસ્ય સવિકલ્પકઃ પરામર્શોઽત્રાસ્વાદનં ; તદેવાચાર્યૈઃ પ્રતિષિધ્યતે । તમેવ સ્વાભિપ્રાયં પ્રકટયિતું “નિઃસઙ્ગઃ પ્રજ્ઞયા ભવેત્” ઇત્યુક્તં (માણ્ડૂક્યકારિકાયાં ૩.૪૫) ।
પ્રકૃષ્ટં સવિકલ્પકં જ્ઞાનં પ્રજ્ઞા; તયા સહ સઙ્ગં પરિત્યજેત્ । યદ્વા પૂર્વોક્તા ધૃતિગૃહીતા બુદ્ધિઃ પ્રજ્ઞા; તદાત્મકેન સાધનેન સુખાસ્વાદનતદ્વર્ણનાદિરૂપામાસક્તિં વર્જયેત્ । સમાધૌ બ્રહ્માનન્દે નિમગ્નં ચિત્તં યદિ કદાચિત્સુખાસ્વાદનાય વા શીતવાતમશકાદ્યુપદ્રવેણ વા નિશ્ચરેત્ તદા નિશ્ચરત્તચ્ચિત્તં પુનઃ પુનર્નિશ્ચલં યથા
ભવતિ તથા પરબ્રહ્મણા સહૈકીકુર્યાત્ । તત્ર ચ નિરોધપ્રયત્ન એવ સાધનમ્ । એકીભાવ એવ “યદા ન લીયતે ચિત્તમ્” (માણ્ડૂક્યકારિકાયાં ૩.૪૬) ઇત્યનેન શ્લોકેન સ્પષ્ટીક્રિયતે । “અનિઙ્ગનમનાભાસમ્” (માણ્ડૂક્યકારિકાયાં ૩.૪૬) ઇત્યાભ્યાં પદાભ્યાં કષાયસુખાસ્વાદૌ દ્વૌ ચ પ્રતિષિધ્યેતે । લયવિક્ષેપકષાયસુખાસ્વાદેભ્યો વિનિર્મુક્તં ચિત્તમવિચ્છેદેન બ્રહ્મણ્યવસ્થિતં ભવતિ । એતદેવાભિપ્રેત્ય કઠવલ્લીષુ પઠ્યતે-
“યદા પઞ્ચાવતિષ્ઠન્તે જ્ઞાનાનિ મનસા સહ ।
બુદ્ધિશ્ચ ન વિચેષ્ટતે તામાહુઃ પરમાં ગતિમ્ ॥

તાં યોગમિતિ મન્યન્તે સ્થિરામિન્દ્રિયધારણામ્ ।
અપ્રમત્તસ્તદા ભવતિ યોગો હિ પ્રભવાપ્યયૌ । ” - (કઠોપનિષદિ ૨.૩.૧૦, ૧૧) ઇતિ ॥

ઉપેક્ષિતો યોગ ઇન્દ્રિયવૃત્તીનાં પ્રભવં કરોતિ । અનુષ્ઠિતસ્તુ તાસાં લયહેતુઃ । અત એવ યોગસ્ય સ્વરૂપલક્ષણં સૂત્રયતિ-
“યોગશ્ચિત્તવૃત્તિનિરોધઃ” (યોગસૂત્રેષુ ૧.૨) ઇતિ ।
વૃત્તીનામાનન્ત્યાન્નિરોધોઽશક્ય ઇતિ શઙ્કાં વારયિતુમિયત્તાં સૂત્રયતિ -

“વૃત્તયઃ પઞ્ચતય્યઃ ક્લિષ્ટા અક્લિષ્ટાઃ” (યોગસૂત્રેષુ ૧.૫) ઇતિ ।

રાગદ્વેષાદિક્લેશરૂપા આસુરવૃત્તયઃ ક્લિષ્ટાઃ । રાગાદિરહિતા દૈવવૃત્તયોઽક્લિષ્ટાઃ । યદ્યપિ પઞ્ચસ્વેવ ક્લિષ્ટાનામક્લિષ્ટાનાં ચાન્તર્ભાવઃ, તથાપિ ક્લિષ્ટા એવ નિરોદ્ધવ્યા ઇતિ મન્દબુદ્ધિં વારયિતું તાભિઃ સહાક્લિષ્ટા અપ્યુદાહૃતાઃ । નામધેયલક્ષણાભ્યાં તા વૃત્તીર્વિશદયિતું સૂત્રષટ્કમાહ-

“પ્રમાણવિપર્યયવિકલ્પનિદ્રાસ્મૃતયઃ” (યોગસૂત્રેષુ ૧.૬) ;

“પ્રત્યક્ષાનુમાનાગમાઃ પ્રમાણાનિ” (યોગસૂત્રેષુ ૧.૭) ;

“વિપર્યયો મિથ્યાજ્ઞાનમતદ્રૂપપ્રતિષ્ઠમ્” (યોગસૂત્રેષુ ૧.૮) ;

“શબ્દજ્ઞાનાનુપાતી વસ્તુશૂન્યો વિકલ્પઃ” (યોગસૂત્રેષુ ૧.૯) ;

“અભાવપ્રત્યયાલમ્બના વૃત્તિર્નિદ્રા” (યોગસૂત્રેષુ ૧.૧૦) ;

“અનૂભૂતવિષયાસમ્પ્રમોષઃ સ્મૃતિઃ” (યોગસૂત્રેષુ ૧.૧૧) ઇતિ ।

વસ્ત્વભાવઃ પ્રતીયતે યસ્મિંસ્તમસ્યાવરકે સતિ તત્તમોઽભાવપ્રત્યયઃ । તમોગુણં વિષયીકુર્વતી વૃત્તિર્નિદ્રેત્યુચ્યતે । અનુભૂતવિષયસ્યાસમ્પ્રમોષસ્તદનુભવજન્યમનુસન્ધાનમ્ । પઞ્ચવિધવૃત્તિનિરોધસાધનં સૂત્રયતિ-

“અભ્યાસવૈરાગ્યાભ્યાં તન્નિરોધઃ” (યોગસૂત્રેષુ ૧.૧૨) ઇતિ ।

યથા તીવ્રવેગોપેતં નદીપ્રવાહં સેતુબન્ધનેન નિવાર્ય કુલ્યાપ્રણયનેન ક્ષેત્રાભિમુખં તિર્યક્પ્રવાહાન્તરમુત્પાદ્યતે, તથા વૈરાગ્યેણ ચિત્તનદ્યા વિષયપ્રવાહં નિવાર્ય સમાધ્યભ્યાસેન પ્રશાન્તઃ પ્રવાહઃ સમ્પાદ્યતે । મન્ત્રજપદેવતાધ્યાનાદીનાં ક્રિયારૂપત્વેનાવૃત્તિલક્ષણોઽભ્યાસઃ સમ્ભાવ્યતે । સર્વવ્યાપારોપરમરૂપસ્ય સમાધેઃ સાધકઃ કો નામાભ્યાસ ઇતિ શઙ્કાં વારયિતું સૂત્રયતિ-

“તત્ર સ્થિતૌ યત્નોઽભ્યાસઃ” (યોગસૂત્રેષુ ૧.૧૩) ઇતિ ।

સ્થિતિર્નૈશ્ચલ્યં નિરોધઃ । યત્નો માનસ ઉત્સાહઃ । સ્વત એવ બહિષ્પ્રવાહશીલં ચિત્તં સર્વથા નિરોધયિષ્યામીત્યેવંવિધ ઉત્સાહ આવર્ત્યમાનોઽભ્યાસ ઇત્યુચ્યતે । અયમભ્યાસ ઇદાનીં પ્રવૃત્તઃ સ્વયમદૃઢઃ સન્નનાદિપ્રવૃત્તા વ્યુત્થાનવાસનાઃ કથમભિભવેદિત્યાશઙ્કામપવદિતું સૂત્રયતિ-

“સ તુ દીર્ઘકાલનૈરન્તર્યસત્કારાસેવિતો દૃઢભૂમિઃ” (યોગસૂત્રેષુ ૧.૧૪) ઇતિ ।

લોકા હિ મૂઢસ્ય વચનમુદાહરન્તિ “વિદ્યમાનાશ્ચત્વાર એવ વેદાઃ, તાનધ્યેતું ગતસ્ય માણવકસ્ય પઞ્ચદિવસા અતીતાઃ, અદ્યાપ્યસૌ નાગતઃ” ઇતિ । તાદૃશ એવાયં યોગી તદા સ્યાદ્ યદા દિવસૈર્વા માસૈર્વા યોગસિદ્ધિં વાઞ્છેત્ । તસ્માત્ સંવત્સરૈર્જન્મભિર્વા દીર્ઘકાલં યોગ આસેવિતવ્યઃ । તથા ચ સ્મર્યતે-

“અનેકજન્મસંસિદ્ધસ્તતો યાતિ પરાં ગતિમ્” ॥ - (ભગવદ્ગીતાયાં ૬.૪૫) ઇતિ ॥

ચિરમાસેવ્યમાનોઽપિ યદિ વિચ્છિદ્ય વિચ્છિદ્ય સેવ્યેત, તર્હ્યુત્પદ્યમાનાનાં યોગસંસ્કારાણાં સમનન્તરભાવિભિર્વિચ્છેદકારિભિર્વ્યુત સંસ્કારૈરભિભવે સતિ ખણ્ડનકારોક્તન્યાય આપતેત્ - “અગ્રે ધાવન્પશ્ચાલ્લુપ્યમાનો વિસ્મરણશીલશ્રુતવલ્કિમાલમ્બેત” ઇતિ । તસ્માન્નિરન્તરમાસેવિતવ્યઃ । સત્કાર આદરઃ । અનાદરેણ સેવ્યમાને વસિષ્ઠોક્તન્યાય આપતેત્-

“અકર્તૃકુર્વદપ્યેતચ્ચેતશ્ચેત્ક્ષીણવાસનમ્ ।

દૂરં ગતમના જન્તુઃ કથાશ્રવણે યથા” ॥ ઇતિ । - (લઘુયોગવાસિષ્ઠે ૫.૭.૧૩) ઇતિ ॥

અનાદરો લયવિક્ષેપકષાયસુખાસ્વાદાનામપરિહારઃ । તસ્માદાદરેણ સેવિતવ્યઃ । દીર્ઘકાલાદિત્રૈવિધ્યેન સેવિતસ્ય સમાધેર્દૃઢભૂમિત્વં નામ વિષયસુખવાસનયા દુઃખવાસનયા વા ચાલયિતુમશક્યત્વમ્ । તચ્ચ ભગવતા દર્શિતમ્-
"યં લબ્ધ્વા ચાપરં લાભં મન્યતે નાધિકં તતઃ ।
યસ્મિન્સ્થિતો ન દુઃખેન ગુરુણાપિ વિચાલ્યતે" ॥ - (ભગવદ્ગીતાયાં ૬.૨૨) ઇતિ ॥

અપરલાભસ્યાનાધિકં કચવૃત્તાન્તેન વસિષ્ઠ ઉદાજહાર -
"કચઃ કદાચિદુત્થાય સમાધેઃ પ્રીતમાનસઃ ।
એકાન્તે સમુવાચેદમેવં ગદ્ગદયા ગિરા ॥ ૩૭ ॥

કિં કરોમિ ક્વ ગચ્છામિ કિં ગૃહ્ણામિ ત્યજામિ કિમ્ ।
આત્મના પૂરિતં વિશ્વં મહાકલ્પામ્બુના યથા ॥ ૩૮ ॥

સબાહ્યાભ્યન્તરે દેહે હ્યધ ઊર્ધ્વં ચ દિક્ષુ ચ ।
ઇત આત્મા તથેહાત્મા નાસ્ત્યનાત્મમયં ક્વચિત્ ॥ ૩૯ ॥

ન તદસ્તિ ન યત્રાહં ન તદસ્તિ ન યન્મયિ ।
કિમન્યદભિવાઞ્છામિ સર્વં સંવિન્મયં તતમ્ ॥ ૪૦ ॥ - (લઘુયોગવાસિષ્ઠે ૧૮.૩૭-૪૦) ॥

"સ્ફારબ્રહ્મામલામ્ભોધેઃ ફેનાઃ સર્વે કુલાચલાઃ ।
ચિદાદિત્યમહાતેજોમૃગતૃષ્ણા જગચ્છ્રિયઃ" ॥ - (તત્રૈવ ૧૮.૩૫) ઇતિ ॥

ગુરુદુઃખેનાપ્યવિચાલ્યત્વં શિખિધ્વજસ્ય વત્સરત્રયસમાધિવૃત્તાન્તેનોદાજહાર-
"નિર્વિકલ્પસમાધિસ્થં તત્રાપશ્યન્મહીપતિમ્ ।
રાજાનં તાવદેતસ્માત્ બોધયામિ પરાત્પદાત્ ॥ ૧૨૨ ॥

ઇતિ સઞ્ચિન્ત્ય ચૂડાલા સિંહનાદં ચકાર સા ।
ભૂયો ભૂયઃ પ્રભોરગ્રે વનેચરભયપ્રદમ્ ॥ ૧૨૩ ॥

ન ચચાલ તદા રામ યદા નાદેન તેન સઃ ।
ભૂયો ભૂયઃ કૃતેનાપિ તદા સા તં વ્યચાલયત્ ॥ ૧૨૪ ॥

ચાલિતઃ પાતિતોઽપ્યેષ તદા નો બુબુધે બુધઃ" ॥ ૧૨૫ ॥ ઇતિ । - (લઘુયોગવાસિષ્ઠે ૩૭.૧૨૨-૧૨૫) ॥

પ્રહ્લાદવૃત્તાન્તેનાપ્યેતદેવોદાજહાર-
"ઇતિ સઞ્ચિન્તયન્નેવ પ્રહ્લાદઃ પરવીરહા ।
નિર્વિકલ્પપરાનન્દસમાધિં સમુપાયયૌ ॥ (તત્રૈવ ૨૨.૯૨) ।
નિર્વિકલ્પસમાધિસ્થશ્ચિત્રાર્પિત ઇવાબભૌ ।
પઞ્ચ વર્ષસહસ્રાણિ પીનાઙ્ગોઽતિષ્ઠદેકદૃક્ ॥ (તત્રૈવ ૨૨.૯૩)
મહાત્મન્ સમ્પ્રબુધ્યસ્વેત્યેવં વિષ્ણુરુદાહરત્ ।

પાઞ્ચજન્યં પ્રદધ્મૌ ચ ધ્વનયન્ કકુભાં ગણમ્ ॥ (તત્રૈવ ૨૨.૧૦૬)
મહતા તેન શબ્દેન વૈષ્ણવપ્રાણજન્મના ।
બભૂવ સમ્પ્રબુદ્ધાત્મા દાનવેશઃ શનૈઃ શનૈઃ" ॥ (તત્રૈવ ૨૨.૧૦૭) ઇતિ ।

એવં વીતહવ્યાદીનામપિ સમાધિરુદાહરણીયઃ । વૈરાગ્યં દ્વિવિધમ્, અપરં પરં ચેતિ । યતમાનવ્યતિરેકૈકેન્દ્રિયવશીકારભેદૈરપરં ચતુર્વિધમ્ । તત્રાદ્યં ત્રયમર્થાત્સૂત્રયન્સાક્ષાચ્ચતુર્થં સૂત્રયતિ-

"દૃષ્ટાનુશ્રવિકવિષયવિતૃષ્ણસ્ય વશીકારસંજ્ઞા વૈરાગ્યમ્" (યોગસૂત્રેષુ ૧.૧૫) ઇતિ ।

સ્રક્ચન્દનવનિતાપુત્રમિત્રક્ષેત્રધનાદયો દૃષ્ટાઃ । વેદોક્તાઃ સ્વર્ગાદય આનુશ્રુવિકાઃ । તત્રોભયત્ર સત્યામપિ તૃષ્ણાયાં વિવેકતારતમ્યેન યતમાનાદિવૈરાગ્યત્રયં ભવતિ ।

અસ્મિઞ્જગતિ કિં સારં કિમસારમિતિ ગુરુશાસ્ત્રાભ્યાં જ્ઞાસ્યામીત્યુદ્યોગો યતમાનત્વં (૧) ,

સ્વચિત્તે પૂર્વં વિદ્યમાનાનાં દોષાણાં મધ્યેઽભ્યસ્યમાનેન વિવેકેનૈતાવન્તઃ પક્વા એતાવન્તોઽવશિષ્ટ ઇતિ વિવેચનં વ્યતિરેકઃ (૨) ,

દૃષ્ટાનુશ્રવિકવિષયપ્રવૃત્તેર્દુઃખાત્મત્વબોધેન તાં પ્રવૃત્તિં પરિત્યજ્ય મનસશ્ચૌત્સુક્યમાત્રેણ વિતૃષ્ણાવસ્થાનમેકેન્દ્રિયત્વં (૩) ,

વિતૃષ્ણત્વં વશીકારઃ (૪) ,

તદિદમપરં વૈરાગ્યમષ્ટાઙ્ગયોગપ્રવર્તકત્વેન સમ્પ્રજ્ઞાતસ્યાન્તરઙ્ગમ્, અસમ્પ્રજ્ઞાતસ્ય તુ બહિરઙ્ગમ્ । તત્રાન્તરઙ્ગં પરં વૈરાગ્યં સૂત્રયતિ-

"તત્પરં પુરુષખ્યાતેર્ગુણવૈતૃષ્ણ્યમ્" (૧.૧૬) ઇતિ ।

સમ્પ્રજ્ઞાતસમાધિપાટવેન ગુણત્રયાત્મકાત્પ્રધાનાદ્વિરક્તસ્ય પુરુષસ્ય ખ્યાતિઃ સાક્ષાત્કાર ઉત્પદ્યતે । તસ્માચ્ચ સાક્ષાત્કારાદશેષગુણત્રયવ્યવહારે યદ્વૈતૃષ્ણ્યં તત્પરં વૈરાગ્યમ્ ।

તસ્ય તારતમ્યેન સમાધેઃ શીઘ્રત્વતારતમ્યં સૂત્રયતિ - "તીવ્રસંવેગાનામાસન્નઃ" (યોગસૂત્રેષુ ૧.૨૦) સમાધિલાભઃ ઇતિ ।

સંવેગો વૈરાગ્યમ્ । તદ્ભેદાદ્યોગિનસ્ત્રિવિધાઃ - મૃદુસંવેગા મધ્યસંવેગાસ્તીવ્રસંવેગાશ્ચેતિ । આસન્નોઽલ્પેનૈવ કાલેન સમાધિર્લભ્યત ઇત્યર્થઃ । તીવ્રસંવેગેષ્વેવ સમાધિતારતમ્યં સૂત્રયતિ -

"મૃદુમધ્યાધિમાત્રત્વાત્તતોઽપિ વિશેષઃ" (યોગસૂત્રેષુ ૧.૨૧) ઇતિ ।

મૃદુતીવ્રો મધ્યતીવ્રોઽધિમાત્રતીવ્ર ઇતિ । તેષ્વપ્યુત્તરોત્તરસ્ય ત્વરયા સિદ્ધિર્દ્રષ્ટવ્યા । ઉત્તમોત્તમા જનકપ્રહ્લાદાદયોઽધિમાત્રતીવ્રાઃ, મુહૂર્તમાત્રવિચારેણ દૃઢસમાધિલાભાત્ । અધમાધમા ઉદ્દાલકાદયો મૃદુસંવેગાઃ, ચિરપ્રયાસેન તલ્લાભાત્ । એવમન્યેઽપિ યથાયોગમુન્નેયાઃ ।

તદેવમધિમાત્રતીવ્રસ્ય દૃઢ઼ભૂમાવસમ્પ્રજ્ઞાતસમાધૌ લબ્ધે સતિ પુનર્વ્યુત્થાતુમશક્તં સન્મનો નશ્યતિ । મનોનાશેન ચ વાસનાક્ષયે રક્ષિતે સતિ જીવન્મુક્તિઃ સુપ્રતિષ્ઠિતા ભવતિ । ન ચ મનોનાશેન વિદેહમુક્તિરેવ ન તુ જીવન્મુક્તિરિતિ શઙ્કનીયમ્, પ્રશ્નોત્તરાભ્યાં તન્નિર્ણયાત્ ।

શ્રીરામઃ -

"વિવેકાભ્યુદયાચ્ચિત્તસ્વરૂપેઽન્તર્હિતે મુને ।

મૈત્ર્યાદયો ગુણાઃ કુત્ર જાયન્તે યોગિનાં વદ" ॥ - (લઘુયોગવાસિષ્ઠે ૨૮.૧૫) ॥

વસિષ્ઠઃ -

"દ્વિવિધશ્ચિત્તનાશોઽસ્તિ સરૂપોઽરૂપ એવ ચ ।

જીવન્મુક્તૌ સરૂપઃ સ્યાદરૂપોઽદેહમુક્તિગઃ" ॥ - (તત્રૈવ ૨૮.૧૬) ॥

"પ્રાકૃતં ગુણસમ્ભારં મમેતિ બહુ મન્યતે ।

સુખદુઃખાદ્યવષ્ટભ્ય વિદ્યમાનં મનો વિદુઃ" ॥ - (તત્રૈવ ૨૮.૧૮) ॥

"ચેતસઃ કથિતા સત્તા મયા રઘુકુલોદ્વહ ।

અસ્ય નાશમિદાનીં ત્વં શ◌ૃણુ પ્રશ્નવિદાં વર । - (તત્રૈવ ૨૮.૨૦) ॥

"સુખદુઃખદશા ધીરં સામ્યાન્ન પ્રોદ્ધરન્તિ યમ્ ।

નિઃશ્વાસા ઇવ શૈલેન્દ્રં તસ્ય ચિત્તં મૃતં વિદુઃ" ॥ - (તત્રૈવ ૨૮.૨૧) ॥

"આપત્કાર્પણ્યમુત્સાહો મદો માન્દ્યં મહોત્સવઃ ।

યં નયન્તિ ન વૈરૂપ્યં તસ્ય નષ્ટં મનો વિદુઃ" ॥ - (તત્રૈવ ૨૮.૨૨) ॥

"ચિત્તમાશાનિધાનં હિ યદા નશ્યતિ રાઘવ ।

મૈત્ર્યાદિભિર્ગુણૈર્યુક્તં તદા સત્ત્વમુદેત્યલમ્ । - (તત્રૈવ ૨૮.૨૩) ॥

"ભૂયોજન્મવિનિર્મુક્તં જીવન્મુક્તસ્ય તન્મનઃ ।

સરૂપોઽસૌ મનોનાશો જીવન્મુક્તસ્ય વિદ્યતે ॥ - (તત્રૈવ ૨૮.૨૪ -૨૫) ॥

"અરૂપસ્તુ મનોનાશો યો મયોક્તો રઘૂદ્વહ ।

વિદેહમુક્તાવેવાસૌ વિદ્યતે નિષ્કલાત્મકઃ ॥ - (તત્રૈવ ૨૮.૨૬) ॥

"સમગ્રાગ્ર્યગુણાધારમપિ?? સત્ત્વં પ્રલીયતે ।

વિદેહમુક્તાવલે પદે પરમપાવને ॥ - (તત્રૈવ ૨૮.૨૭) ॥

"સંશાન્તદુઃખમજડાત્મકમેકરૂપ-

માનન્દમન્થરમપેતરજસ્તમો યત્ ।

આકાશકોશતનવોઽતનવો મહાન્ત-

સ્તસ્મિન્પદે ગલિતચિત્તલવા વસન્તિ" ॥ - (તત્રૈવ ૨૮.૩૨) ઇતિ ॥

"જીવન્મુક્તા ન મુહ્યન્તિ સુખદુઃખરસસ્થિતૌ ।

પ્રાકૃતેનાર્થકારેણ કિઞ્ચિત્કુર્વન્તિ વા ન વા" । - (તત્રૈવ ૧૩.૨૬) ॥

તસ્માત્સરૂપો મનોનાશો જીવન્મુક્તિસાધનમિતિ સ્થિતમ્ ॥

ઇતિ શ્રીમદ્વિદ્યારણ્યપ્રણીતે જીવન્મુક્તિવિવેકે મનોનાશનિરૂપણં નામ તૃતીયં પ્રકરણમ્ ॥ ૩॥

# ૪. જીવન્મુક્તિસ્વરૂપસિદ્ધિપ્રયોજનનિરૂપણં નામ ચતુર્થં પ્રકરણમ્

કેયં જીવન્મુક્તિઃ, કિં વા તત્ર પ્રમાણમ્, કથં વા તત્સિદ્ધિઃ, ઇત્યેતસ્ય પ્રશ્નત્રયસ્યોત્તરં નિરૂપિતમ્ । સિદ્ધ્યા વા કિં પ્રયોજનમિત્યસ્ય ચતુર્થપ્રશ્નસ્યોત્તરમિદાનીમભિધીયતે- જ્ઞાનરક્ષાતપોવિસંવાદાભાવદુઃખનાશ-સુખાવિર્ભાવાઃ સન્તિ પઞ્ચ પ્રયોજનાનિ ।

નનુ પ્રમાણોત્પન્નસ્ય તત્ત્વજ્ઞાનસ્ય કો નામ બાધપ્રસઙ્ગો યેન રક્ષા અપેક્ષ્યત ઇતિ ચેદુચ્યતે -ચિત્તવિશ્રાન્ત્યભાવે સંશયવિપર્યયૌ પ્રસજ્યેયાતામ્ । તથા હિ - તત્ત્વવિદો રાઘવસ્ય વિશ્રાન્તેઃ પૂર્વં સંશયં વિશ્વામિત્ર ઉદાજહાર -

“ન રાઘવ તવાસ્ત્યન્યજ્જ્ઞેયં જ્ઞાનવતાં વર ।
સ્વયૈવ સૂક્ષ્મયા બુદ્ધ્યા સર્વં વિજ્ઞાતવાનસિ ॥

ભગવદ્વ્યાસપુત્રસ્ય શુકસ્યેવ મતિસ્તવ ।
વિશ્રાન્તિમાત્રમેવાત્ર જ્ઞાતજ્ઞેયાપ્યપેક્ષતે” ॥ - (લઘુયોગવાસિષ્ટે ૩.૧૭, ૧૮) ॥

શુકસ્તુ સ્વયમેવાદૌ તત્ત્વં વિદિત્વા તત્ર સંશયાનઃ પિતરં પૃષ્ટ્વા પિત્રાપિ તથૈવાનુશિષ્ટસ્તત્રાપિ સંશયાનો જનકમુપસદ્ય તેનાપિ તથૈવાનુશિષ્ટસ્તં પ્રત્યેવમુવાચ,

શ્રીશુકઃ -

“સ્વયમેવ મયા પૂર્વમેતજ્જ્ઞાતં વિવેકતઃ ।
એતદેવ હિ પૃષ્ટેન પિત્રા મે સમુદાહૃતમ્ ॥ ૪૩ ॥

ભવતાપ્યેષ એવાર્થઃ કથિતો વાગ્વિદાં વર ।
એષ એવ ચ વાક્યાર્થઃ શાસ્ત્રેષુ પરિદૃશ્યતે ॥ ૪૪ ॥

યથાયં સ્વવિકલ્પોત્થઃ સ્વવિકલ્પપરિક્ષયાત્ ।
ક્ષીયતે દગ્ધસંસારો નિઃસાર ઇતિ નિશ્ચયઃ ॥ ૪૫ ॥

તત્કિમેતન્મહાબાહો સત્યં બ્રૂહિ મમાચલમ્ ।
ત્વત્તો વિશ્રાન્તિમાપ્નોમિ ચેતસા ભ્રામિતં જગત્ ॥ ૪૬ ॥ - (તત્રૈવ ૩.૪૩-૪૬)

જનકઃ -

“નાતઃ પરતરઃ કશ્ચિન્નિશ્ચયોઽસ્ત્યપરો મુને ।
સ્વયમેવ ત્વયા જ્ઞાતં ગુરુતશ્ચ પુનઃ શ્રુતમ્ ॥ ૪૭ ॥

અવ્યુચ્છિન્નશ્ચિદાત્મૈકઃ પુમાનસ્તીહ નેતરઃ ।
સ્વસઙ્કલ્પવશાદ્બદ્ધો નિઃસઙ્કલ્પસ્તુ મુચ્યતે ॥ ૪૮ ॥

મુને ત્વયા સ્ફુટં જ્ઞાતં જ્ઞેયં સ્વસ્ય મહાત્મનઃ ।

ભોગેભ્યો વિરતિર્જાતા દૃશ્યાદ્વા સકલાદિહ ॥ ૪૯॥

પ્રાપ્તં પ્રાપ્તવ્યમખિલં ભવતા પૂર્ણચેતસા ।
ન દૃશ્યે યતસે બ્રહ્મન્ મુક્તસ્ત્વં ભ્રાન્તિમુત્સૃજ ॥ ૫૦॥

અનુશિષ્ટઃ સ ઇત્યેવં જનકેન મહાત્મના ।
વિશશ્રામ શુકસ્તૂષ્ણીં સ્વસ્થે પરમવસ્તુનિ ॥ ૫૧॥

વીતશોકભયાયાસ નિરીહશ્છિન્નસંશયઃ ।
જગામ શિખરં મેરોઃ સમાધ્યર્થમનિન્દિતમ્ ॥ ૫૨॥

તત્ર વર્ષસહસ્રાણિ નિર્વિકલ્પસમાધિના ।
દશ સ્થિત્વા શશામાસાવાત્મન્યસ્નેહદીપવત્" ॥ ૫૩॥ - (તત્રૈવ ૩.૪૭-૫૩) ઇતિ ॥

તસ્માદ્વિદિતેઽપિ તત્ત્વે વિશ્રાન્તિરહિતસ્ય શુકરાઘવયોરિવ સંશય ઉત્પદ્યતે । સ ચાજ્ઞાનમિવ મોક્ષસ્ય પ્રતિબન્ધકઃ । અત એવ ભગવતોક્તમ્-
"અજ્ઞશ્ચાશ્રદ્દધાનશ્ચ સંશયાત્મા વિનશ્યતિ ।
નાયં લોકોઽસ્તિ ન પરો ન સુખં સંશયાત્મનઃ" ॥ - (ભગવદ્ગીતાયાં ૪.૪૦) ઇતિ ॥

અશ્રદ્ધા વિપર્યયઃ । સ ચોત્તરત્રોદાહરિષ્યતે । અજ્ઞાનવિપર્યયૌ મોક્ષમાત્રવિરોધિનૌ; સંશયસ્તુ ભોગમોક્ષયોરુભયોરપિ વિરોધી, તસ્ય પરસ્પરવિરુદ્ધકોટિદ્વયાવલમ્બિત્વાત્ । યદા સંસારસુખાય પ્રવૃત્તિસ્તદા મોક્ષમાર્ગે બુદ્ધિસ્તાં નિરુણદ્ધિ । યદા ચ મોક્ષમાર્ગે પ્રવૃત્તિસ્તદા સંસારબુદ્ધિસ્તાં પ્રતિબધ્નાતિ । તસ્માત્ સંશયાત્મનો ન કિઞ્ચિત્સુખમસ્તીતિ મુમુક્ષુણા સર્વથા સંશયશ્છેત્તવ્યઃ । અત એવ શ્રૂયતે- "છિદ્યન્તે સર્વસંશયાઃ" (મુણ્ડકોપનિષદિ ૨.૨.૮) ઇતિ ।
વિપર્યયસ્યાપિ નિદાઘ ઉદાહરણમ્ । ઋભુઃ પરમકરુણયા નિદાઘસ્ય ગૃહમેત્ય બહુધા તં બોધયિત્વા નિર્જગામ । બુદ્ધેઽપિ તદુપદિષ્ટે વસ્તુન્યશ્રદ્દધાનો નિદાઘઃ કર્માણ્યેવ પરમપુરુષાર્થહેતુરિતિ વિપર્યયં પ્રાપ્ય કર્માનુષ્ઠાને યથાપૂર્વં પ્રવૃત્તઃ । સોઽપિ શિષ્યસ્ય પરમપુરુષાર્થભ્રંશો મા ભૂદિતિ કૃપયા ગુરુઃ પુનરાગત્ય બોધયામાસ । તદાપિ વિપર્યયં ન જહૌ । તૃતીયેન તુ બોધનેન વિપર્યયં પરિત્યજ્ય વિશ્રાન્તિમલભત । સંશયવિપર્યયાભ્યામ-સમ્ભાવનાવિપરીતભાવનારૂપાભ્યાં તત્ત્વજ્ઞાનસ્ય ફલં પ્રતિબધ્યતે ।
તદુક્તં પરાશરેણ-
"મણિમન્ત્રૌષધૈર્વહ્નિઃ સુદીપ્તોઽપિ યથેન્ધનમ્ ।
પ્રદગ્ધું નૈવ શક્તઃ સ્યાત્ પ્રતિબદ્ધસ્તથૈવ ચ ॥

જ્ઞાનાગ્નિરપિ સઞ્જાતઃ પ્રદીપ્તઃ સુદૃઢોઽપિ ચ ।
પ્રદગ્ધું નૈવ શક્તઃ સ્યાત્ પ્રતિબદ્ધસ્તુ કલ્મષમ્" ॥ - (પરાશરોપપુરાણે ૧૪.૪) ॥

"ભાવના વિપરીતા યા યા ચાસમ્ભાવના શુક ।

પ્રતિબન્ધં સા તત્ત્વજ્ઞાનસ્ય નાપરમ્” ॥ - (તત્રૈવ ૧૪.૫) ઇતિ । ૨૮૨
તસ્માદવિશ્રાન્તચિત્તસ્ય સંશયવિપર્યયપ્રસઙ્ગેન તત્ત્વજ્ઞાનસ્ય ફલપ્રતિબન્ધલક્ષણાદ્બાધાદ્રક્ષાપેક્ષ્યતે । વિશ્રાન્તચિત્તસ્ય તુ મનોનાશેન યદા જગદેવ પ્રવિલીયતે તદા સંશયવિપર્યયયોઃ કઃ પ્રસઙ્ગઃ ?
જગત્પ્રતિભાસરહિતસ્ય બ્રહ્મવિદો દેહવ્યવહારોઽપિ વિનૈવ સ્વપ્રયત્નં પરમેશ્વરપ્રેરિતેન પ્રાણવાયુના નિષ્પાદ્યતે । અત એવ છન્દોગા આમનન્તિ - “નોપજનં સ્મરન્નિદં શરીરં સ યથા પ્રયોગ્ય આચરણે યુક્ત એવમેવાયમસ્મિઞ્શરીરે પ્રાણો યુક્તઃ” (છાન્દોગ્યોપનિષદિ ૮.૧૨.૩) ઇતિ ।
ઉપજનં જનાનાં સમીપે વર્તમાનમિદં શરીરં ન સ્મરન્બ્રહ્મવિદ્વર્તતે । પાર્શ્વસ્થા જના એવ તત્ત્વવિદઃ શરીરં પશ્યન્તિ । સ્વયં તુ નિર્મનસ્કત્વાન્મદીયમિદં શરીરમિતિ ન સ્મરતિ । પ્રયોગ્યો રથશકટાદિવહને પ્રયોક્તુમર્હઃ શિક્ષિતોઽશ્વબલીવર્દાદિઃ; સ યથા સારથિના માર્ગસ્યાચરણે પ્રેરિતઃ પુનઃ પુનઃ સારથિપ્રયત્નમનપેક્ષ્ય સ્વયમેવ રથશકટાદિકં પુરોવર્તિગ્રામં નયતિ, એવમેવાયં પ્રાણવાયુઃ પરમેશ્વરેણાસ્મિઞ્શરીરે નિયુક્તઃ સત્યસતિ વા જીવપ્રયત્ને વ્યવહારં નિર્વાહયતિ । ભાગવતેઽપિ સ્મર્યતે -
“દેહં વિનશ્વરમવસ્થિતમુત્થિતં વા
સિદ્ધો ન પશ્યતિ યતોઽધ્યગમત્સ્વરૂપમ્ ।
દૈવાદુપેતમથ દૈવવશાદપેતં
વાસો યથા પરિકૃતં મદિરામદાન્ધઃ” ॥ - (ભાગ૦ ૧૧.૧૩.૩૬) ॥

વસિષ્ઠોઽપ્યાહ-
“પાર્શ્વસ્થબોધિતાઃ સન્તઃ પૂર્વાચાર ક્રમાગતમ્ ।
આચારમાચરન્ત્યેવ સુપ્તબુદ્ધવદક્ષતાઃ” - (લઘુયોગવાસિષ્ઠે ૧૩.૧૨૭) ઇતિ ॥

સિદ્ધો ન પશ્યત્યાચારમાચરતીત્યુભયોઃ પરસ્પરવિરોધ ઇતિ ચેન્ન । વિશ્રાન્તિતારતમ્યેન વ્યવસ્થોપપત્તેઃ । તદેવ તારતમ્યમભિપ્રેત્ય શ્રૂયતે - “આત્મક્રીડ આત્મરતિઃ ક્રિયાવાનેષ બ્રહ્મવિદાં વરિષ્ઠઃ” (મુણ્ડકોપનિષદિ ૩.૧.૪) ઇતિ ।
અત્ર ચત્વારઃ પ્રતીયન્તે - બ્રહ્મવિત્પ્રથમઃ, બ્રહ્મવિદ્વરો દ્વિતીયઃ, બ્રહ્મવિદ્વરીયાં તૃતીયો બ્રહ્મવિદ્વરિષ્ઠશ્ચતુર્થઃ । ત એતે સપ્તસુ યોગભૂમિષુ ચતુર્થીં યોગભૂમિમારભ્ય ક્રમેણ ભૂમિચતુષ્ટયં પ્રાપ્તા ઇત્યવગન્તવ્યમ્ । ભૂમયશ્ચ વસિષ્ઠેન દર્શિતાઃ-
“જ્ઞાનભૂમિઃ શુભેચ્છાખ્યા પ્રથમા સમુદાહૃતા ।
વિચારણા દ્વિતીયા સ્યાત્ તૃતીયા તનુમાનસા ॥

સત્ત્વાપત્તિશ્ચતુર્થી સ્યાત્તતોઽસંસક્તિનામિકા ।
પદાર્થાભાવિની ષષ્ઠી સપ્તમી તુર્યગા સ્મૃતા” ॥ - (તત્રૈવ ૧૩.૧૧૩, ૧૧૪) ઇતિ ॥

“સ્થિતઃ કિં મૂઢ એવાસ્મિ પ્રેક્ષેઽહં શાસ્ત્રસજ્જનૈઃ ।
વૈરાગ્યપૂર્વમિચ્છેતિ શુભેચ્છેત્યુચ્યતે બુધૈઃ ॥ - (તત્રૈવ ૧૩.૧૧૬) ॥

“શાસ્ત્રસજ્જનસમ્પર્કવૈરાગ્યાભ્યાસપૂર્વકમ્ ।
સદ્વિચારપ્રવૃત્તિર્યા પ્રોચ્યતે સા વિચારણા ॥ - (તત્રૈવ ૧૩.૧૧૭) ॥

“વિચારણાશુભેચ્છાભ્યામિન્દ્રિયાર્થેષ્વસક્તતા ।
યત્ર સા તનુતામેતિ પ્રોચ્યતે તનુમાનસા ॥ - (તત્રૈવ ૧૩.૧૧૮) ॥

“ભૂમિકાત્રિતયાભ્યાસાચ્ચિત્તેઽર્થવિરતેર્વશાત્ ।
સત્ત્વાત્મનિ સ્થિતિઃ શુદ્ધે સત્ત્વાપત્તિરુદાહૃતા ॥ - (તત્રૈવ ૧૩.૧૧૯)
“દશાચતુષ્ટયાભ્યાસાદસંસર્ગફલા તુ યા ।
રૂઢસત્ત્વચમત્કારા પ્રોક્તાસંસક્તિનામિકા ॥ - (તત્રૈવ ૧૩.૧૨૦) ॥

“ભૂમિકાપઞ્ચકાભ્યાસાત્સ્વાત્મારામતયા ભૃશમ્ ।
આભ્યન્તરાણાં બાહ્યાનાં પદાર્થાનામભાસનાત્ ॥

પરપ્રયુક્તેન ચિરં પ્રયત્નેનાવબોધનમ્ ।
પદાર્થાભાવિની નામ ષષ્ઠી ભવતિ ભૂમિકા ॥ - (તત્રૈવ ૧૩.૧૨૧, ૧૨૨) ॥

“ભૂમિષટ્કચિરાભ્યાસાદ્ ભેદસ્યાનુપલમ્ભનાત્ ।
યત્સ્વભાવૈકનિષ્ઠત્વં સા જ્ઞેયા તુર્યગા સ્થિતિઃ” ॥ - (તત્રૈવ ૧૩.૧૨૩) ઇતિ ॥

અત્ર ભૂમિકાત્રિતયં બ્રહ્મવિદ્યાયાઃ સાધનમેવ, નતુ વિદ્યાકોટાવન્તર્ભવતિ । ભૂમિત્રયે ભેદસત્યત્વબુદ્ધેરનિવર્તિતત્વાત્ । અત એવૈતજ્જાગરણમિતિ વ્યપદિશ્યતે । તદુક્તં -
“ભૂમિકાત્રિતયં ત્વેતદ્રામ જાગ્રદિતિ સ્થિતમ્ ।
યથાવદ્ભેદબુદ્ધ્યેદં જગજ્જાગ્રતિ દૃશ્યતે” । - (યોગવાસિષ્ઠરામાયણે નિર્વાણપ્રકરણે ૧૨૬.૫૨) ઇતિ ॥

તતો વેદાન્તવાક્યાન્નિર્વિકલ્પકો બ્રહ્માત્મૈક્યસાક્ષાત્કારશ્ચતુર્થી ભૂમિકા ફલરૂપા સત્ત્વાપત્તિઃ । ચતુર્થભૂમૌ સર્વજગદુપાદાનસ્ય બ્રહ્મણો વાસ્તવમદ્વિતીયસત્તાસ્વભાવં નિશ્ચિત્ય બ્રહ્મણ્યારોપિતયોર્જગ-ચ્છબ્દાભિધેયયોર્નામરૂપયોર્મિથ્ય
। મુમુક્ષોઃ પૂર્વોક્તં જાગરણમપેક્ષ્ય સેયં ભૂમિઃ સ્વપ્નઃ । તદાહ-
“અદ્વૈતે સ્થૈર્યમાયાતે દ્વૈતે ચોપરતિં ગતે ।
પશ્યન્તિ સ્વપ્નવલ્લોકં ચતુર્થી ભૂમિકામિતાઃ ॥

ચિત્તં તુ શરદભ્રાંશવિલયં પ્રવિલીયતે ।
સત્તાવશેષ એવાસ્તે પઞ્ચમીં ભૂમિકામિતઃ” ॥ - (લઘુયોગવાસિષ્ઠે ૪૩.૭૦, ૭૧) ॥

સોઽયં ચતુર્થી ભૂમિકાં પ્રાપ્તો યોગી બ્રહ્મવિદિત્યુચ્યતે । પઞ્ચમ્યાદયસ્તિસ્રો ભૂમયો જીવન્મુક્તેરવાન્તરભેદાઃ । તે ચ નિર્વિકલ્પસમાધ્યભ્યાસકૃતેન વિશ્રાન્તિતારતમ્યેન સમ્પદ્યન્તે । પઞ્ચમભૂમૌ નિર્વિકલ્પકાત્ સ્વયમેવ વ્યુત્તિષ્ઠતે । સોઽયં યોગી બ્રહ્મવિદ્વરઃ । ષષ્ઠભૂમૌ પાર્શ્વસ્થૈર્બોધિતો વ્યુત્તિષ્ઠતે । સોઽયં બ્રહ્મવિદ્વરીયાન્ । તદેતદ્ભૂમિદ્વયં સુષુપ્તિર્ગાઢસુષુપ્તિરિતિ ચાભિધીયતે । તદાહ-

“પઞ્ચમીં ભૂમિકામેત્ય સુષુપ્તિપદનામિકામ્ ।
શાન્તાશેષવિશેષાંશસ્તિષ્ઠત્યદ્વૈતમાત્રકે ॥ - (તત્રૈવ ૪૩.૭૩) ॥

“અન્તર્મુખતયા નિત્યં બહિર્વૃત્તિપરોઽપિ સન્ ।
પરિશ્રાન્તતયા નિત્યં નિદ્રાલુવિ લક્ષ્યતે ॥ - (તત્રૈવ ૪૩.૭૫) ॥

“કુર્વન્નભ્યાસમેતસ્યાં ભૂમિકાયાં વિવાસનઃ ।
ષષ્ઠીં ગાઢસુષુપ્ત્યાખ્યાં ક્રમાત્પતતિ ભૂમિકામ્ ॥ - (તત્રૈવ ૪૩.૭૬) ॥

“યત્ર નાસન્ન સદ્રૂપો નાહં નાપ્યનહઙ્કૃતિઃ ।
કેવલં ક્ષીણમનન આસ્તે દ્વૈતૈક્યવર્જિતઃ” । - (તત્રૈવ ૪૩.૭૭)
“અન્તઃ શૂન્યો બહિઃ શૂન્યઃ શૂન્યઃ કુમ્ભ ઇવામ્બરે ।
અન્તઃ પૂર્ણો બહિઃ પૂર્ણઃ પૂર્ણઃ કુમ્ભ ઇવાર્ણવે” ॥ (તત્રૈવ ૪૩.૭૯) ॥

ગાઢં નિર્વિકલ્પસમાધિં પ્રાપ્તસ્ય સંસ્કારમાત્રશેષસ્ય ચિત્તસ્ય મનોરાજ્યં કર્તું બાહ્યપદાર્થાન્ ગ્રહીતું વા સામર્થ્યાભાવાદાકાશાવસ્થિતકુમ્ભવદન્તર્બહિઃશૂન્યત્વમ્; સ્વયમ્પ્રકાશસચ્ચિદાનન્દૈકરસે બ્રહ્મણિ નિમગ્નત્વેન બહિશ્ચ સર્વત્ર બ્રહ્મદૃષ્ટ્યા સમુદ્રમધ્યસ્થાપિતજલપૂર્ણકુમ્ભવદન્તર્બહિઃ પૂર્ણત્વમ્ । તુરીયાભિધાં સપ્તમીં ભૂમિં પ્રાપ્તસ્ય યોગિનઃ સ્વતઃ પરતો વા વ્યુત્થાનમેવ નાસ્તિ । તાદૃશમેવોદ્દિશ્ય “દેહં વિનશ્વરમવસ્થિતમુત્થિતં વા” ઇત્યાદિભાગવતવાક્યં પ્રવૃત્તં (ભાગવતે ૧૧.૧૩.૩૬) । અસમ્પ્રજ્ઞાતસમાધિ-પ્રતિપાદકાનિ યોગશાસ્ત્રાણ્યત્રૈવ પર્યવસિતાનિ । સોઽયમીદૃશો યોગી પૂર્વોદાહૃતશ્રુતૌ બ્રહ્મવિદ્વરિષ્ઠ ઇત્યુચ્યતે ।
તદેવં પાર્શ્વસ્થબોધિતઃ સિદ્ધો ન પશ્યતીત્યનયોર્ભૂમિદ્વયે વ્યવસ્થિતત્વાન્ન કોઽપિ વિરોધઃ । તત્રાયં સઙ્ગ્રહઃ । પઞ્ચમ્યાદિભૂમિત્રયરૂપાયાં જીવન્મુક્તૌ સમ્પાદ્યમાનાયાં દ્વૈતપ્રતિભાસાભાવેન સંશયવિપર્યય-પ્રસઙ્ગાભાવાદુત્પન્નં તત્ત્વજ્ઞાનમબાધેન રક્ષિતં ભવતિ । સેયં જ્ઞાનરક્ષા જીવન્મુક્તેઃ પ્રથમં પ્રયોજનમ્ । તપો દ્વિતીયં પ્રયોજનમ્ । યોગભૂમીનાં દેવત્વાદિપ્રાપ્તિહેતુતયા તપસ્ત્વં દ્રષ્ટવ્યમ્ । તદ્ધેતુત્વં ચાર્જુનભગવતોઃ શ્રીરામવસિષ્ઠયોશ્ચ પ્રશ્નોત્તરાભ્યામવગમ્યતે । અર્જુન ઉવાચ -
“અયતિઃ શ્રદ્ધયોપેતો યોગાચ્ચલિતમાનસઃ ।
અપ્રાપ્ય યોગસંસિદ્ધિં કાં ગતિં કૃષ્ણ ગચ્છતિ ।
કચ્ચિન્નોભયવિભ્રષ્ટશ્છિન્નાભ્રમિવ નશ્યતિ ।
અપ્રતિષ્ઠો મહાબાહો વિમૂઢો બ્રહ્મણઃ પથિ ।
એતં મે સંશયં કૃષ્ણ છેત્તુમર્હસ્યશેષતઃ ।
ત્વદન્યઃ સંશયસ્યાસ્ય છેત્તા ન હ્યુપપદ્યતે” ॥ - (ભગવદ્ગીતાયાં ૬.૩૭-૩૯) ॥

ભગવાનુવાચ -
“પાર્થ નૈવેહ નામુત્ર વિનાશસ્તસ્ય વિદ્યતે ।
ન હિ કલ્યાણકૃત્કશ્ચિદ્દુર્ગતિં તાત ગચ્છતિ ॥

પ્રાપ્ય પુણ્યકૃતાં લોકાનુષિત્વા શાશ્વતીઃ સમાઃ ।
શુચીનાં શ્રીમતાં ગેહે યોગભ્રષ્ટોઽભિજાયતે ॥

અથવા યોગિનામેવ કુલે ભવતિ ધીમતામ્ ।
એતદ્ધિ દુર્લભતરં લોકે જન્મ યદીદૃશમ્ ।
તત્ર તં બુદ્ધિસંયોગં લભતે પૌર્વદેહિકમ્ ।
યતતે ચ તતો ભૂયઃ સંસિદ્ધૌ કુરુનન્દન" । - (ભગવદ્ગીતાયાં ૬.૪૦-૪૩) ઇતિ ॥

શ્રી રામ ઉવાચ -
"આદ્યામથ દ્વિતીયાં વા તૃતીયાં ભૂમિકામુત ।
આરૂઢસ્ય મૃતસ્યાથ કીદૃશી ભગવન્ ગતિઃ । - (યોગવાસિષ્ઠે નિર્વાણપ્રકરણે પૂર્વ .૧૨૬.૪૪) ॥

વસિષ્ઠ ઉવાચ –
"યોગભૂમિકયોત્ક્રાન્તજીવિતસ્ય શરીરિણઃ ।
ભૂમિકાંશાનુસારેણ ક્ષીયતે પૂર્વદુષ્કૃતમ્ ॥

તતઃ સુરવિમાનેષુ લોકપાલપુરેષુ ચ ।
મેરૂપવનકુઞ્જેષુ રમતે રમણીસખઃ ॥

તતઃ સુકૃતસમ્ભારે દુષ્કૃતે ચ પુરા કૃતે ।
ભોગક્ષયપરિક્ષીણે જાયન્તે યોગિનો ભુવિ ॥

શુચીનાં શ્રીમતાં ગેહે ગુપ્તે ગુણવતાં સતામ્ ।
તત્ર પ્રાગ્ભાવનાભ્યસ્તં યોગભૂમિત્રયં બુધઃ ।
સ્પૃષ્ટ્વોપરિ પતત્યુચ્ચૈરુત્તરં ભૂમિકાક્રમમ્" ॥ ઇતિ । - (તત્રૈવ ૧૨૬.૪૭-૫૧) ॥

અસ્ત્વેવં યોગભૂમીનાં દેવલોકપ્રાપ્તિહેતુત્વમ્; તાવતા તપસ્ત્વં કુત ઇતિ ચેત્,
શ્રુતેરિતિ બ્રૂમઃ । તથા ચ તૈત્તિરીયા આમનન્તિ - "તપસા દેવા દેવતામગ્ર આયન્, તપસર્ષયઃ સ્વરન્વવિન્દન્" (તૈત્તિરીય ઉપ૦ બ્રાહ્મણે ૩.૧૨.૩) ઇતિ । તત્ત્વજ્ઞાનાત્ પ્રાચીનસ્ય ભૂમિકાત્રયસ્ય તપસ્ત્વે સતિ તત્ત્વજ્ઞાનસ્યોત્તરકાલીનસ્ય નિર્વિકલ્પસમાધિરૂપસ્ય પઞ્ચમ્યાદિભૂમિકાત્રયસ્ય તપસ્ત્વં કૈમુતિકન્યાય-સિદ્ધમ્ । અત એવ સ્મર્યતે-
"મનસશ્ચેન્દ્રિયાણાં ચ ઐકાગ્ર્યં પરમં તપઃ ।
તજ્જ્યાયઃ સર્વધર્મેભ્યઃ સ ધર્મઃ પર ઉચ્યતે" ॥ - (મહાભારતે ૧૨.૨૪૨.૪) ઇતિ ॥

યદ્યપ્યનેન ન્યાયેન તપસા પ્રાપ્યં જન્માન્તરં નાસ્તિ, તથાપિ લોકસઙ્ગ્રહાયેદં તપો યુજ્યતે । અત એવ ભગવાનાહ -
"લોકસઙ્ગ્રહમેવાપિ સમ્પશ્યન્ કર્તુમર્હસિ" ॥ - (ભગવદ્ગીતાયાં ૩.૨૦) ઇતિ ॥

સઙ્ગ્રાહ્યશ્ચ લોકસ્ત્રિવિધઃ - શિષ્યો ભક્તસ્તટસ્થશ્ચેતિ । તત્ર શિષ્યસ્યાન્તર્મુખે યોગિનિ પ્રામાણિકત્વબુદ્ધ્યતિશયેન તદુપદિષ્ટે તત્ત્વે પરમં વિશ્વાસં પ્રાપ્ય ચિત્તં સહસા વિશ્રામ્યતિ । અત એવ શ્રૂયતે-
"યસ્ય દેવે પરા ભક્તિર્યથા દેવે તથા ગુરૌ ।
તસ્યૈતે કથિતાર્થાઃ પ્રકાશન્તે મહાત્મનઃ" ॥ - (શ્વેતાશ્વતરોપનિષદિ ૬.૨૩) ઇતિ ॥

સ્મર્યતે ચ-
"શ્રદ્ધાવાલ્લભતે જ્ઞાનં તત્પરઃ સંયતેન્દ્રિયઃ ।
જ્ઞાનં લબ્ધ્વા પરાં શાન્તિમચિરેણાધિગચ્છતિ" ॥ - (ભગવદ્ગીતાયાં ૪.૩૯) ઇતિ ॥

અન્નપ્રદાનનિવાસસ્થાનકલ્પનાદિના યોગિનં સેવમાનો ભક્તસ્તદીયં તપઃ સ્વયમેવાદત્તે । તથા ચ શ્રૂયતે -તસ્ય પુત્રા દાયમુપયન્તિ સુહૃદઃ સાધુકૃત્યાં દ્વિષન્તઃ પાપકૃત્યામ્" ઇતિ ।
તટસ્થોઽપિ દ્વિવિધઃ - આસ્તિકો નાસ્તિકશ્ચેતિ । તત્રાસ્તિકો યોગિનઃ સન્માર્ગાચરણં દૃષ્ટ્વા સ્વયમપિ સન્માર્ગે પ્રવર્તતે । તથા ચ સ્મૃતિઃ-
"યદ્યદાચરતિ શ્રેષ્ઠસ્તત્તદેવેતરો જનઃ ।
સ યત્પ્રમાણં કુરુતે લોકસ્તદનુવર્તતે" ॥ - (ભગવદ્ગીતાયાં ૩.૨૧) ઇતિ ॥

નાસ્તિકોઽપિ યોગિના દૃષ્ટઃ પાપાન્મુચ્યતે । તદુક્તમ્-
"યસ્યાનુભવપર્યન્તા તત્ત્વે બુદ્ધિઃ પ્રવર્તતે ।
તદ્દૃષ્ટિગોચરાઃ સર્વે મુચ્યન્તે સર્વપાતકૈઃ" ॥ - (સૂતસંહિતાયાં ૨૨૦.૪૪) ઇતિ ॥

અનેન પ્રકારેણ સર્વપ્રાણ્યુપકારિત્વં યોગિનો વિવક્ષિત્વા પઠ્યતે-
"સ્નાતં તેન સમસ્તતીર્થસલિલે સર્વાઽપિ દત્તાઽવનિ-
ર્યજ્ઞાનાં ચ સહસ્રમિષ્ટમખિલા દેવાશ્ચ સમ્પૂજિતાઃ ।
સંસારાચ્ચ સમુદ્ધૃતાઃ સ્વપિતરસ્ત્રૈલોક્યપૂજ્યોઽપ્યસૌ
યસ્ય બ્રહ્મવિચારણે ક્ષણમપિ સ્થૈર્યં મનઃ પ્રાપ્નુયાત્" ॥ - (લઘુયોગવાસિષ્ઠે ૬.૧૬.૩૪) ઇતિ ॥

"કુલં પવિત્રં જનની કૃતાર્થા વિશ્વમ્ભરા પુણ્યવતી ચ તેન ।
અપારસંવિત્સુખસાગરેઽસ્મિલ્લીનં પરે બ્રહ્મણિ યસ્ય ચેતઃ" ॥ - (સૂતસંહિતાયાં ૨ ૨૦.૪૫) ઇતિ ॥

ન કેવલં યોગિનઃ શાસ્ત્રીયવ્યવહારસ્યૈવ તપસ્ત્વમ્, કિં તુ સર્વસ્યૈવ લૌકિકવ્યવહારસ્યાપિ । તથા ચ તૈત્તિરીયાઃ સ્વશાખાયાં નારાયણસ્યાન્તિમેનાનુવાકેન વિદુષોઽપિ મહિમાનમામનન્તિ । તસ્મિંશ્ચાનુવાકે પૂર્વભાગે યોગિનોઽવયવા યજ્ઞાઙ્ગદ્રવ્યત્વેનામ્નાતાઃ-
"તસ્યૈવં વિદુષો યજ્ઞસ્યાત્મા યજમાનઃ શ્રદ્ધા પત્ની શરીરમિધ્મમુરો વેદિર્લોમાનિ બર્હિર્વેદઃ શિખા હૃદયં યૂપઃ કામ આજ્યં મન્યુઃ પશુસ્તપોઽગ્નિર્દમઃ શમયિતા દક્ષિણા વાગ્ધોતા પ્રાણ ઉદ્ગાતા ચક્ષુરધ્વર્યુર્મનો બ્રહ્મા શ્રોત્રમગ્નીત્" । (નારાયણોપનિષદિ ૮૦) ઇતિ ।

અત્ર ચ દાનં દક્ષિણેતિ દાનપદમધ્યાહર્તવ્યમ્, “અથ યત્તપોદાનમાર્જવમહિંસા સત્યવચનમિતિ તા અસ્ય દક્ષિણા” (છાન્દોગ્યોપનિષદિ ૩.૧૭.૪) ઇતિ છન્દોગૈરામ્નાતત્વાત્ । ઉક્તાનુવાકે મધ્યમભાગેન યોગિવ્યવહારાસ્તજ્જીવનકાલાશ્ચ જ્યોતિષ્ટોમાવયવક્રિયારૂપત્વેન સર્વયજ્ઞાવયવક્રિયારૂપત્વેન ચામ્નાતાઃ - “યાવદ્ધ્રિયતે સા દીક્ષા યદશ્નાતિ તદ્ધવિર્યત્પિબતિ તદસ્ય સોમપાનં યદ્રમતે તદુપસદો યત્સઞ્ચરત્યુપવિશત્યુત્તિષ્ઠતે ચ સ પ્રવર્ગ્યો યન્મુખં તદાહવનીયો યા વ્યાહૃતિરાહુતિર્યદસ્ય વિજ્ઞાનં તજ્જુહોતિ યત્સાયં પ્રાતરત્તિ તત્સમિધં યત્પ્રાતર્મધ્યન્દિનં સાયં ચ તાનિ સવનાનિ યે અહોરાત્રે તે દર્શપૂર્ણમાસૌ યેઽર્ધમાસાશ્ચ માસાશ્ચ તે ચાતુર્માસ્યાનિ ય ઋતવસ્તે પશુબન્ધા યે સંવત્સરાશ્ચ પરિવત્સરાશ્ચ તેઽહર્ગણાઃ સર્વવેદસં વા એતત્સત્રં યન્મરણં તદવભૃથઃ” (નારાયણ ઉપ૦ .૮૦) ઇતિ ।

સર્વવેદસં સર્વસ્વદક્ષિણાકમ્ । અત્રૈતચ્છબ્દેન પ્રકૃતાહોરાત્રાદિપરિવત્સરાન્તં સર્વકાલસમષ્ટ્યુપલક્ષિતં યોગિન આયુર્વિવક્ષ્યતે । યદાયુસ્તત્સર્વસ્વદક્ષિણોપેતં સત્રમિત્યર્થઃ । ઉક્તાનુવાકે ચરમભાગેન સર્વયજ્ઞાત્મકં યોગિનમુપાસીનસ્ય ક્રમમુક્તિરૂપં સૂર્યાચન્દ્રમસોઃ કાર્યકારણબ્રહ્મણોસ્તાદાત્મ્યલક્ષણં ફલમામ્નાયતે -

“એતદ્વૈ જરામર્યમગ્નિહોત્ર સત્રં ય એવં વિદ્વાનુદગયને પ્રમીયતે દેવાનામેવ મહિમાનં ગત્વાદિત્યસ્ય સાયુજ્યં ગચ્છત્યથ યો દક્ષિણે પ્રમીયતે પિતૃણામેવ મહિમાનં ગત્વા ચન્દ્રમસઃ સાયુજ્ય સલોકતામાપ્નોત્યેતૌ વૈ સૂર્યાચન્દ્રમસોર્મહિમાનૌ બ્રાહ્મણો વિદ્વાનભિજયતિ તસ્માદ્બ્રહ્મણો મહિમાનમાપ્નોતિ તસ્માદ્બ્રહ્મણો મહિમાન-મિત્યુપનિષત્” (નારાયણ ઉપ૦ .૮૦) ઇતિ ।

જરામરણાવધિકં યદ્યોગિચરિતમસ્તિ તદ્વેદોક્તાગ્નિહોત્રાદિસંવત્સરસત્રાન્ત-કર્મસ્વરૂપમિત્યેવમુપાસીનો ભાવનાતિશયેન સૂર્યાચન્દ્રમસોઃ સાયુજ્યં તાદાત્મ્યં પ્રાપ્નોતિ । ભાવનામાન્દ્યેન સમાનલોકં પ્રાપ્ય તસ્મિલ્લોઁકે સૂર્યાચન્દ્રમસોર્વિભૂતિમનુભૂય તત ઊર્ધ્વં સત્યલોકે ચતુર્મુખસ્ય બ્રહ્મણો મહિમાનમાપ્નોતિ । તત્રોત્પન્નતત્ત્વજ્ઞાનસ્તત ઊર્ધ્વં સત્યજ્ઞાનાનન્દરૂપસ્ય પરબ્રહ્મણો મહિમાનં કૈવલ્યં પ્રાપ્નોતિ । ઇત્યુપનિષદિત્યનેન યથોક્તવિદ્યાયાસ્તત્પ્રતિપાદકગ્રન્થસ્ય ચોપસંહારઃ ક્રિયતે ।

તદેવં જીવન્મુક્તેસ્તપોરૂપં દ્વિતીયં પ્રયોજનં સિદ્ધમ્ । વિસંવાદાભાવસ્તૃતીયં પ્રયોજનમ્ । ન ખલ્વન્તર્મુખે બાહ્યવ્યાપારમપશ્યતિ યોગીશ્વરે લૌકિકસ્તૈર્થિકો વા કશ્ચિદ્વિસંવદતે । લૌકિક વિસંવાદો દ્વિવિધઃ -કલહરૂપો નિન્દારૂપશ્ચ । તત્ર ક્રોધાદિરહિતેન યોગિના સહ કથં નામ લૌકિકઃ કલહાયતે ? તદ્રાહિત્યં ચ

સ્મર્યતે-

“ક્રુધ્યન્તં ન પ્રતિક્રુધ્યેદાક્રુષ્ટઃ કુશલં વદેત્” । (મનુસંહિતાયાં ૬.૪૮) ।

“અતિવાદાંસ્તિતિક્ષેત નાવમન્યેત કઞ્ચન” । (તત્રૈવ ૬.૪૭) ।

નનુ જીવન્મુક્તેઃ પ્રાચીનો વિદ્વત્સંન્યાસસ્તતોઽપિ પ્રાચીનં તત્ત્વજ્ઞાનં તસ્માદપિ પ્રાચીનો વિવિદિષાસન્ન્યાસઃ । તત્રૈતે ક્રોધાદિરાહિત્યાદયો ધર્માઃ સ્મૃતા ઇતિ ચેત્ -

બાઢમ્ । અત એવ જીવન્મુક્તસ્ય ક્રોધાદયઃ શઙ્કિતુમપ્યશક્યાઃ । અત્યર્વાચીને પદે વિવિદિષાસંન્યાસેઽપિ યદા ક્રોધાદયો ન સન્તિ તદોત્તમપદે તત્ત્વજ્ઞાને કુતસ્તે સ્યુઃ, કુતસ્તરાં ચ વિદ્વત્સન્ન્યાસે, કુતસ્તમાં ચ જીવન્મુક્તૌ ? અતો ન યોગિના સહ લૌકિકસ્ય કલહઃ સમ્ભવતિ । નાપિ નિન્દારૂપો વિસંવાદઃ શઙ્કનીયઃ । નિન્દ્યત્વસ્યાનિશ્ચિતત્વાત્ । તથા ચ સ્મર્યતે -

“યં ન સન્તં ન ચાસન્તં નાશ્રુતં ન બહુશ્રુતમ્ ।
ન સુવૃત્તં ન દુર્વૃત્તં વેદ કશ્ચિત્સ વૈ યતિઃ” ॥ - (વસિષ્ઠસ્મૃતૌ ૬.૪૦) ઇતિ ॥

સદસત્ત્વે ઉત્તમાધમજાતી । તૈર્થિકોઽપિ કિં શાસ્ત્રપ્રમેયે વિસંવદતે કિં વા યોગિચરિતે । આદ્યે ન તાવદ્યોગી પરશાસ્ત્રપ્રમેયં દૂષયતિ - “તમેવૈકં જાનથ આત્માનમન્યા વાચો વિમુઞ્ચથ” (મુણ્ડકોપનિષદિ ૨.૨.૫) ; “નાનુધ્યાયાદ્બહૂઞ્શબ્દાન્વાચો વિગ્લાપનં હિ તત્” (બૃહ। ઉપ૦ .૪.૪.૨૧) ઇત્યાદિશ્રુત્યનુરોધાત્ । નાપિ સ્વશાસ્ત્રપ્રમેયં પ્રતિવાદિનોઽગ્રે સમર્થયતે,
“પલાલમિવ ધાન્યાર્થી ત્યજેદ્ગ્રન્થમશેષતઃ” । (અમૃતબિન્દૂપનિષદિ ૧૮) ।
“પરમં બ્રહ્મ વિજ્ઞાય ઉલ્કાવત્તાન્યથોત્સૃજેત્” । (અમૃતનાદોપનિષદિ ૧)
યદા યોગી પ્રતિવાદિનમપિ સ્વાત્મતયા વીક્ષતે તદા વિજિગીષાયાઃ કા કથા ? નાપિ લૌકાયતિકવ્યતિરિક્તઃ સર્વોઽપિ તૈર્થિકો મોક્ષમઙ્ગીકુર્વન્ યોગિચરિતેઽપિ વિસંવદિતુમર્હતિ આર્હતબૌદ્ધવૈશેષિકનૈયાયિકશૈવવૈષ્ણવશાક્તસાઙ્ખ્યયોગાદિમોક્ષ પ્રતિપાદ્યપ્રમેયસ્ય નાનાવિધ-ત્વેઽપિ મોક્ષસાધનસ્ય યમનિયમાદ્યષ્ટાઙ્ગયોગસ્યૈકવિધત્વાત્ । તસ્માદવિસંવાદેન સર્વસમ્મતો યોગીશ્વરઃ । એતદેવાભિપ્રેત્ય વસિષ્ઠ આહ-
“યસ્યેદં જન્મ પાશ્ચાત્ત્યં તમાશ્વેવ મહામતે ।
વિશન્તિ વિદ્યા વિમલા મુક્તા વેણુમિવોત્તમમ્ ॥ - (યોગવાસિષ્ઠે ઉપશમપ્રકરણે ૬.૮) ॥

“આર્યતા હૃદ્યતા મૈત્રી સૌમ્યતા મુક્તતા જ્ઞતા ।
સમાશ્રયન્તિ તં નિત્યમન્તઃ પુરમિવાઙ્ગનાઃ ॥ - (તત્રૈવ ૬.૯) ॥

“પેશલાચારમધુરં સર્વે વાઞ્છન્તિ તં જનાઃ ।
વેણું મધુરનિધ્વાનં વને વનમૃગા ઇવ ॥ - (તત્રૈવ ૬.૧૨) ॥

“સુષુપ્તવત્પ્રશમિતભાવવૃત્તિના
સ્થિતઃ સદા જાગ્રતિ યેન ચેતસા ।
કલાન્વિતો વિધુરિવ યઃ સદા બુધૈ-
નિષેવ્યતે મુક્ત ઇતીહ સ સ્મૃતઃ” ॥ - (લઘુયોગવાસિષ્ઠે ૧૬.૨૨) ઇતિ ॥

“માતરીવ શમં યાન્તિ વિષમાણિ મૃદૂનિ ચ ।
વિશ્વાસમિહ ભૂતાનિ સર્વાણિ શમશાલિનિ ॥ - (લઘુયોગવાસિષ્ઠે ૪.૬૨) ઇતિ ॥

“તપસ્વિષુ બહુજ્ઞેષુ યાજકેષુ નૃપેષુ ચ ।
બલવત્સુ ગુણાઢ્યેષુ શમવાનેવ રાજતે” ॥ - (તત્રૈવ ૪.૬૬) ઇતિ ॥

તદેવમબાધં જીવન્મુક્તેર્વિસંવાદાભાવરૂપં તૃતીયં પ્રયોજનં સિદ્ધમ્ । દુઃખનાશસુખાવિર્ભાવરૂપે ચતુર્થપઞ્ચમપ્રયોજને વિદ્યાનન્દાત્મકેન બ્રહ્માનન્દગતેન ચતુર્થાધ્યાયેન નિરૂપિતે । તદુભયમત્ર સઙ્ક્ષિપ્યોચ્યતે -
“આત્માનં ચેદ્વિજાનીયાદયમસ્મીતિ પૂરુષઃ ॥

કિમિચ્છન્કસ્ય કામાય શરીરમનુસઞ્જ્વરેત્" ॥ - (બૃહ। ઉપ૦ .૪.૪.૧૨) ॥

ઇત્યાદિશ્રુત્યા દુઃખસ્યૈહિકસ્ય વિનાશ ઉક્તઃ । "એતહ?? વાવ ન તપતિ કિમહં સાધુ નાકરવં કિમહં પાપમકરવમ્" (તૈ। ઉપ૦ .૨.૯) ઇત્યાદિશ્રુતય આમુષ્મિકહેતુપુણ્યપાપચિન્તારૂપસ્ય દુઃખસ્ય નાશમાહુઃ । સુખાવિર્ભાવસ્ત્રેધા-સર્વ-કામાવાપ્તિઃ, કૃતકૃત્યત્વં, પ્રાપ્તપ્રાપ્તવ્યત્વં ચેતિ । સર્વકામાવાપ્તિસ્ત્રેધા-સર્વસાક્ષિત્વં, સર્વત્રાકામહતત્વં, સર્વભોક્તૃરૂપત્વં ચેતિ । "હિરણ્યગર્ભાદિસ્થાવરાન્તેષુ દેહેષ્વનુગતં સાક્ષિચૈતન્યરૂપં યદ્બ્રહ્મ તદેવાહમસ્મિ" - ઇતિ જાનતઃ સ્વદેહ ઇવ પરદેહેષ્વપિ સર્વકામસાક્ષિત્વમસ્તિ । તદેતદભિપ્રેત્ય શ્રૂયતે -"સોઽશ્નુતે સર્વાન્કામાન્સહ બ્રહ્મણા વિપશ્ચિતા" (તૈ। ઉપ૦ .૨.૧) ઇતિ ।
લોકે ભુક્તેષુ ભોગેષ્વકામહતત્વં યત્તત્કામપ્રાપ્તિરિત્યુચ્યતે । તથા ચ સર્વભોગદોષદર્શિનસ્તત્ત્વવિદઃ સર્વત્રાકામહતત્વાદસ્તિ સર્વકામાવાપ્તિઃ । અત એવ સાર્વભૌમોપક્રમેષુ હિરણ્યગર્ભપર્યન્તેષૂત્તરોત્તર-શતગુણેષ્વાનન્દેષુ "શ્રોત્રિયસ્ય ચાકામહતસ્ય" (તૈત્તિરીયોપનિષદિ ૨.૮.૧) ઇતિ શ્રુતમ્ । સદ્રૂપેણ ચિદ્રૂપેણાનન્દરૂપેણ ચ સર્વત્રાવસ્થિતં સ્વાત્માનમનુસન્દધતઃ સર્વભોક્તૃત્વમસ્તીત્યભિપ્રેત્યૈવં શ્રૂયતે -
"અહમન્નમહમન્નમહમન્નમ્ । અહમન્નાદોઽહમન્નાદોઽહમન્નાદઃ" । - (તૈત્તિરીયોપનિષદિ ૩.૧૦) ઇતિ ॥

કૃતકૃત્યત્વં તુ સ્મર્યતે-
"જ્ઞાનામૃતેન તૃપ્તસ્ય કૃતકૃત્યસ્ય યોગિનઃ ।
નૈવાસ્તિ કિઞ્ચિત્કર્તવ્યમસ્તિ ચેન્ન સ તત્ત્વવિત્" ॥ - (જાબાલદર્શનોપનિષદિ ૧.૨૩, ઉત્તરગીતાયાં ૧.૧૩ ચ ।)॥

"યસ્ત્વાત્મરતિરેવ સ્યાદાત્મતૃપ્તશ્ચ માનવઃ ।
આત્મન્યેવ ચ સન્તુષ્ટસ્તસ્ય કાર્યં ન વિદ્યતે" ॥ - (ભગવદ્ગીતાયા, ૩.૧૭) ઇતિ ॥

પ્રાપ્તપ્રાપ્તવ્યતાઽપિ શ્રૂયતે - "અભયં વૈ જનક પ્રાપ્તોઽસિ" (બૃ૦ ઉપ૦ ૪.૨.૨) ઇતિ, "તસ્માત્તત્સર્વમભવત્" (બૃ। ઉ .૧.૪.૧૦) ઇતિ, "બ્રહ્મવેદ બ્રહ્મૈવ ભવતિ" (મુણ્ડકોપનિષદિ ૩.૨.૯) ઇતિ ચ । નન્વેતૌ દ્વૌ દુઃખવિનાશસુખાવિર્ભાવૌ તત્વજ્ઞાનેનૈવ સિદ્ધત્વાન્ન જીવન્મુક્તિપ્રયોજનતામહર્તઃ । મૈવમ્, સુરક્ષિતયોસ્તયોરત્ર વિવક્ષિતત્વાત્ । યથા તત્ત્વજ્ઞાનં પૂર્વમેવોત્પન્નમપિ જીવન્મુક્ત્યા સુરક્ષિતં ભવતિ, એવમેતાવપિ સુરક્ષિતૌ ભવતઃ । નન્વેવં જીવન્મુક્તેઃ પઞ્ચપ્રયોજનત્વે સતિ સમાહિતો યોગીશ્વરો લોકવ્યવહારં કુર્વતસ્તત્ત્વવિદોઽપિ શ્રેષ્ઠ ઇતિ વક્તવ્યમ્; તચ્ચ રામવસિષ્ઠયોઃ પ્રશ્નોત્તરાભ્યાં નિરાકૃતમ્-
શ્રીરામઃ -
"ભગવન્ભૂતભવ્યેશ કશ્ચિજ્જાતુ સમાહિતઃ ।
પ્રબુદ્ધ ઇવ વિશ્રાન્તો વ્યવહારપરોઽપિ સન્ ॥ ૫॥

કશ્ચિદેકાન્તમાશ્રિત્ય સમાધિનિયમે સ્થિતઃ ।
તયોસ્તુઃ કતરઃ શ્રેયાનિતિ મે ભગવન્વદ ॥ ૬॥ - (લઘુયોગવાસિષ્ઠે ૨૫.૫-૬) ॥

વસિષ્ઠઃ -
"ઇમં ગુણસમાહારમનાત્મત્વેન પશ્યતઃ ।

અન્તઃ શીતલતા યાસૌ સમાધિરિતિ કથ્યતે ॥ ૭॥

દૃશ્યૈર્ન મમ સમ્બન્ધ ઇતિ નિશ્ચિત્ય શીતલઃ ।
કશ્ચિત્સંવ્યવહારસ્થઃ કશ્ચિદ્ધ્યાનપરાયણઃ ॥ ૮॥

દ્વાવતૌ રામ સુસમાવન્તશ્ચેત્ પરિશીતલૌ ।
અન્તઃ શીતલતા યા સ્યાત્તદનન્તતપઃ ફલમ્" ॥ ૯॥ - (લઘુયોગવાસિષ્ઠે ૨૫.૭-૯) ઇતિ ॥

નૈષ દોષઃ । અત્ર વાસનાક્ષયરૂપમન્તઃ શીતલત્વમવશ્યં સમ્પાદનીયમિત્યેતાવદેવ પ્રતિપાદ્યતે । ન તુ તદનન્તરભાવિનો મનોનાશસ્ય શ્રેષ્ઠત્વં નિવાર્યતે । શીતલત્વં તૃષ્ણાયાઃ પ્રશમનમિત્યેતાદૃશીં વિવક્ષાં સ્વયમેવ સ્પષ્ટીચકાર -
"અન્તઃ શીતલતાયાં તુ લબ્ધાયાં શીતલં જગત્ ।
અન્તસ્તૃષ્ણોપતપ્તાનાં દાવદાહમયં જગત્" ॥ ૨૪॥ - (તત્રૈવ ૨૫.૨૪) ॥

નનુ સમાધિનિન્દા વ્યવહારપ્રશંસા ચાત્રોપલભ્યેતે -
"સમાધિસ્થાનકસ્થસ્ય ચેતશ્ચેદ્વૃત્તિચઞ્ચલમ્ ।
તત્તસ્ય તુ સમાધાનં સમમુન્મત્તતાણ્ડવૈઃ ॥ ૧૦॥

ઉન્મત્તતાણ્ડવસ્થસ્ય ચેતશ્ચેત્ક્ષીણવાસનમ્ ।
તદસ્યોન્મત્તનૃત્યં તુ સમં બ્રહ્મસમાધિના" ॥ ૧૧॥ - (તત્રૈવ ૨૫.૧૦ -૧૧) ઇતિ ॥

મૈવમ્ । અત્ર હિ સમાધિપ્રાશસ્ત્યમેવાઙ્ગીકૃત્ય વાસના નિન્દ્યતે । ઇયમત્ર વચનવ્યક્તિઃ - યદ્યપિ વ્યવહારાત્સમાધિઃ પ્રશસ્તઃ, તથાપ્યસૌ સવાસનશ્ચેત્તદા નિર્વાસનાદ્વ્યવહારાદધમ એવેતિ સ ન સમાધિઃ । યદા સમાહિતવ્યવહર્તારાવુભાવપ્યતત્ત્વજ્ઞૌ સવાસનૌ ચ તદા સમાધેરુત્તમલોકપ્રાપ્તિહેતુપુણ્યત્વેન પ્રાશસ્ત્યમ્ । યદા તૂભૌ જ્ઞાનનિષ્ઠૌ નિર્વાસનૌ ચ, તદાઽપિ વાસનાક્ષયરૂપાં જીવન્મુક્તિં પરિપાલયન્નયં મનોનાશરૂપઃ સમાધિઃ પ્રશસ્ત એવ । તસ્માદ્ યોગીશ્વરસ્ય શ્રેષ્ઠત્વાત્ પઞ્ચપ્રયોજનોપેતાયા જીવન્મુક્તેર્ન કોઽપિ વિઘ્ન ઇતિ સિદ્ધમ્ ।
ઇતિ શ્રીમદ્વિદ્યારણ્યપ્રણીતે જીવન્મુક્તિવિવેકે જીવન્મુક્તિસ્વરૂપસિદ્ધિપ્રયોજનનિરૂપણં નામ ચતુર્થં પ્રકરણમ્ ॥ ૪॥

## ૫. વિદ્વત્સંન્યાસનિરૂપણં નામ પઞ્ચમં પ્રકરણમ્

એવં સ્વરૂપપ્રમાણસાધનપ્રયોજનૈર્જીવન્મુક્તિર્નિરૂપિતા । અથ તદુપકારિણં વિદ્વત્સંન્યાસં નિરૂપયામઃ । વિદ્વત્સન્યાસશ્ચ પરમહંસોપનિષદિ પ્રતિપાદિતઃ । તાં ચોપનિષદમનૂદ્ય વ્યાખ્યાસ્યામઃ ।
તત્રાદૌ વિદ્વત્સંન્યાસયોગ્યં પ્રશ્નમવતારયતિ -
"અથ યોગિનાં પરમહંસાનાં કોઽયં માર્ગસ્તેષાં કા સ્થિતિરિતિ નારદો ભગવન્તમુપગત્યોવાચ" ઇતિ ।

યદ્યપ્યથશબ્દાપેક્ષિત આનન્તર્યપ્રતિયોગી ન કોપ્યત્ર પ્રતિભાતિ, તથાઽપિ પ્રષ્ટવ્યાર્થોઽત્ર વિદ્વત્સંન્યાસઃ । તસ્મિંશ્ચ વિદિતતત્ત્વો લોકવ્યવહારૈર્વિક્ષિપ્યમાણો મનોવિશ્રાન્તિં કામયમાનોઽધિકારી । તતસ્તાદૃગધિકારસમ્પત્ત્યાનન્તર્યમથશબ્દાર્થઃ । કેવલયોગિનં કેવલપરમહંસં ચ વારયિતું પદદ્વયમુક્તમ્ । કેવલયોગી તત્ત્વજ્ઞાનાભાવેન ત્રિકાલજ્ઞાનાકાશગમનાદિષુ યોગૈશ્વર્યચમત્કારવ્યવહારેષ્વાસક્તઃ સંયમવિશેષૈસ્તત્ર તત્રોદ્યુઙ્ક્તે । તતઃ પરમપુરુષાર્થાદ્ભ્રષ્ટો ભવતિ । અસ્મિન્નર્થે સૂત્રં પૂર્વમેવોદાહૃતં - "તે સમાધાવુપસર્ગા વ્યુત્થાને સિદ્ધયઃ" (યોગસૂત્રેષુ ૩.૩૮) ઇતિ ।

કેવલપરમહંસસ્તુ તત્ત્વવિવેકેનૈશ્વર્યેષ્વસારતાં બુદ્ધ્વા વિરજ્યતિ । તદપ્યુદાહૃતમ્-

"ચિદાત્મન ઇમા ઇત્થં પ્રસ્ફુરન્તીહ શક્તયઃ ।
ઇત્યસ્યાશ્ચર્યજાલેષુ નાભ્યુદેતિ કુતૂહલમ્" ॥ ૬૭॥ - (લઘુયોગવાસિષ્ઠે ૨૭.૬૭) ઇતિ ॥

વિરક્તોઽપ્યસૌ બ્રહ્મવિદ્યાભરેણ વિધિનિષેધાવુલ્લઙ્ઘયતિ । તદુક્તં -"નિસ્ત્રૈગુણ્યે પથિ વિચરતાં કો વિધિઃ કો નિષેધઃ" (શુકાષ્ટકે) ઇતિ । તથા ચ શ્રદ્ધાલવઃ શિષ્ટાસ્તમેવં નિન્દન્તિ -

"સર્વે બ્રહ્મ વદિષ્યન્તિ સમ્પ્રાપ્તે તુ કલૌ યુગે ।
નાનુતિષ્ઠન્તિ મૈત્રેય શિશ્નોદરપરાયણાઃ" ॥ - ઇતિ ।

યોગિનિ તુ પરમહંસે યથોક્તં દોષદ્વયં નાસ્તિ । અન્યોઽપ્યસ્યાતિશયઃ પ્રશ્નોત્તરાભ્યાં દર્શિતઃ-

શ્રીરામઃ-

"એવં સ્થિતેઽપિ ભગવઞ્જીવન્મુક્તસ્ય સન્મતેઃ ।
અપૂર્વોઽતિશયઃ કોઽસૌ ભવત્યાત્મવિદાં વર" ॥ ૧॥ - (લઘુયોગવાસિષ્ઠે ૪૨.૧) ॥

વસિષ્ઠઃ -

"જ્ઞસ્ય કસ્મિંશ્ચિદપ્યેષા ભવત્યતિશયે ન ધીઃ ।
નિત્યતૃપ્તઃ પ્રશાન્તાત્મા સ આત્મન્યેવ તિષ્ઠતિ ॥ ૨॥

મન્ત્રસિદ્ધૈસ્તપઃસિદ્ધૈર્યોગસિદ્ધૈશ્ચ ભૂરિશઃ ।
કૃતમાકાશયાનાદિ તત્ર કા સ્યાદપૂર્વતા ॥ ૩॥

એક એવ વિશેષોઽસ્ય ન સમો મૂઢબુદ્ધિભિઃ ।
સર્વત્રાઽઽસ્થાપરિત્યાગાન્નીરાગમમલં મનઃ ॥ ૫॥

એતાવદેવ ખલુ લિઙ્ગમલિઙ્ગમૂર્તેઃ
સંશાન્તસંસૃતિચિરભ્રમનિર્વૃતસ્ય ।
તજ્જ્ઞસ્ય યન્મદનકોપવિષાદમોહ-
લોભાપદામનુદિનં નિપુણં તનુત્વમ્" ॥ ૬॥ - (લઘુયોગવાસિષ્ઠે ૪૨.૨ -૬) ઇતિ ॥

એતેનાતિશયેનોપેતાનાં દોષદ્વયરહિતાનાં માર્ગસ્થિતી પૃચ્છ્યેતે । વેષભાષાદિરૂપો હિ વ્યવહારો માર્ગઃ । ચિત્તોપરમરૂપ આન્તરો ધર્મઃ સ્થિતિઃ । ભગવાંશ્ચતુર્મુખો બ્રહ્મા । યથોક્તં પ્રશ્નોત્તરમવતારયતિ -

“તં ભગવાનાહ” ઇતિ ।

વક્ષ્યમાણમાર્ગે શ્રદ્ધાતિશયમુત્પાદયિતું તં માર્ગં પ્રશંસતિ-

“સોઽયં પરમહંસાનાં માર્ગો લોકે દુર્લભતરો ન તુ બાહુલ્યઃ” (પરમ૦ ઉપ૦ ૧) ઇતિ ।

યઃ પૃષ્ટઃ સોઽયમિતિ યોજના । અયમિત્યુત્તરગ્રન્થે વક્ષ્યમાણ આચ્છાદનાદિઃ સ્વશરીરોપભોગેન લોકોપકારેણ ચ નિરપેક્ષો મુખ્યો માર્ગઃ પરામૃશ્યતે । તાદૃશસ્ય પરમકાષ્ઠાં પ્રાપ્તસ્ય વૈરાગ્યસ્યાદૃષ્ટ-ચરત્વાત્તસ્ય માર્ગસ્ય દુર્લભતરત્વમ્ । ન ચૈતાવતાત્યન્તાભાવઃ શઙ્કનીય ઇત્યભિપ્રેત્ય બાહુલ્યમેવ પ્રતિષેધતિ - ન ત્વિતિ । બાહુલ્યમિતિ વક્તવ્યે લિઙ્ગવ્યત્યયશ્છાન્દસઃ ।

નન્વયં માર્ગો દુર્લભતરશ્ચેત્તર્હિ તદર્થં પ્રયાસો ન કર્તવ્યઃ, તેન પ્રયોજનાભાવાદિત્યાશઙ્ક્યાહ -

“યદ્યેકોઽપિ ભવતિ સ એવ નિત્યપૂતસ્થઃ સ એવ વેદપુરુષ ઇતિ વિદુષો મન્યન્તે” (પરમહંસોપનિષદિ ૧) ઇતિ ।

“મનુષ્યાણાં સહસ્રેષુ કશ્ચિદ્યતતિ સિદ્ધયે ।

યતતામપિ સિદ્ધાનાં કશ્ચિન્માં વેત્તિ તત્ત્વતઃ” । - (ભગવદ્ગીતાયાં ૭.૩) ॥

ઇતિ ન્યાયેન યત્ર ક્વાપિ યદા કદાચિદ્યોગીપરમહંસો યદિ કશ્ચિલ્લભ્યતે તર્હિ સ એવ નિત્યપૂતસ્થો ભવતિ । નિત્યપૂતઃ પરમાત્મા, “ય આત્માપહતપાપ્મા” (છા૦ ઉપ૦ .૮.૧) ઇતિ શ્રુતેઃ । એવકારેણ કેવલયોગી કેવલ પરમહંસશ્ચ વ્યાવર્ત્યતે । કેવલયોગી નિત્યપૂતં ન જાનાતિ । કેવલ પરમહંસો જાનન્નપિ ચિત્તવિશ્રાન્ત્યભાવાદ્બહિર્મુખો બ્રહ્મણિ ન તિષ્ઠતિ । વેદપ્રતિપાદ્યઃ પુરુષો વેદપુરુષઃ । વિદુષો વિદ્વાંસો બ્રહ્માનુભવચિત્તવિશ્રાન્તિપ્રતિપાદકશાસ્ત્રપારઙ્ગતા યોગિનઃ । પરમહંસસ્ય બ્રહ્મનિષ્ઠત્વં સર્વે જના મન્યન્તે । યથોક્તા વિદ્વાંસસ્તુ તદપ્યસહમાના બ્રહ્મત્વમેવ મન્યન્તે । તથા ચ સ્મર્યતે-

“દર્શનાદર્શને હિત્વા સ્વયં કેવલરૂપતઃ ।

યસ્તિષ્ઠતિ સ તુ બ્રહ્મન્બ્રહ્મ ન બ્રહ્મવિત્સ્વયમ્” ॥ ઇતિ ।

અતો ન પ્રયોજનાભાવઃ શઙ્કિતુમપિ શક્યતે ।

નિત્યપૂતસ્થત્વં વેદપુરુષત્વં ચ મુખતો વિશદયન્નર્થાત્ “કા સ્થિતિઃ ?” ઇતિ પ્રશ્નસ્યોત્તરં સૂત્રયતિ -

“મહાપુરુષો યચ્ચિત્તં તત્સર્વદા મય્યેવાવસ્થાપયતિ, (મય્યેવાવતિષ્ઠતે ઇતિ વા) તસ્માદહં ચ તસ્મિન્નેવાવસ્થિતઃ (તસ્મિન્નેવાવસ્થીયતે ઇતિ વા) ” ઇતિ । (પરમહંસોપનિષદિ ૧) ॥

વૈદિકજ્ઞાનકર્માધિકારિષુ પુરુષેષુ મધ્યે યોગિનઃ પરમહંસસ્યાત્યન્તમુત્તમત્વાન્મહાપુરુષત્વમ્ । સ ચ મહાપુરુષો યચ્ચિત્તં સ્વકીયં તત્સર્વદામય્યેવાવસ્થાપયતિ, સંસારગોચરાણાં તદીયચિત્તવૃત્તીનામભ્યાસવૈરાગ્યાભ્યાં નિરુદ્ધત્વાત્ । અત એવ ભગવાન્ પ્રજાપતિઃ શાસ્ત્રસિદ્ધં પરમાત્માનં સ્વાનુભવેન પરામૃશન્મયીતિ વ્યપદિશતિ । યસ્માદ્યોગી મય્યેવ ચિત્તં સ્થાપયતિ તસ્માદહમપિ પરમાત્મસ્વરૂપત્વેન તસ્મિન્નેવ યોગિન્યાવિર્ભૂતોઽવસ્થિતોઽસ્મિ નેતરેષ્વજ્ઞાનિષુ, તેષામવિદ્યાવૃતત્વાત્ । તત્ત્વવિત્સ્વપ્યયોગિષુ બાહ્યચિત્તવૃત્તિભિરાવૃતત્વાન્નાસ્ત્યાવિર્ભાવઃ ।

ઇદાનીં કોઽયં માર્ગ ઇતિ પૃષ્ટે માર્ગમુપદિશતિ -

“અસૌ સ્વપુત્રમિત્રકલત્રબન્ધ્વાદીઞ્છિખાયજ્ઞોપવીતે સ્વાધ્યાયં ચ સર્વકર્માણિ સંન્યસ્યાયં બ્રહ્માણ્ડં ચ હિત્વા કૌપીનં દણ્ડમાચ્છાદનં ચ સ્વશરીરોપભોગાર્થાય લોકસ્યોપકારાર્થાય ચ પરિગ્રહેત્” (પરમ૦ ઉપ૦ ૧) ઇતિ ।

યો ગૃહસ્થઃ પૂર્વજન્મસઞ્ચિતપુણ્યપુઞ્જે પરિપક્વે સતિ માતૃપિત્રાજ્ઞાદિના નિમિત્તેન વિવિદિષાસંન્યાસરૂપં પરમહંસાશ્રમમસ્વીકૃત્યૈવ શ્રવણાદિસાધનાન્યનુષ્ઠાય તત્ત્વં સમ્યગવગચ્છતિ, તતો ગૃહસ્થસ્ય પ્રાપ્તૈર્લૌકિકવૈદિકવ્યવહારસહસ્રૈશ્ચિ વિક્ષિપ્તે સતિ વિશ્રાન્તિસિદ્ધયે વિદ્વત્સન્ન્યાસં ચિકીર્ષતિ, તં પ્રતિ સ્વપુત્રમિત્રેત્યાદ્યુપદેશઃ, પૂર્વમેવ વિવિદિષાસન્ન્યાસં કૃત્વા તત્ત્વં વિદિતવતો વિદ્વત્સન્ન્યાસં ચિકીર્ષોઃ પુત્રકલત્રાદિપ્રસઙ્ગાભાવાત્ ।

નન્વયં વિદ્વત્સંન્યાસઃ કિમિતરસન્ન્યાસવત્પ્રૈષોચ્ચારણાદિવિધ્યુક્તપ્રકારેણ સમ્પાદનીયઃ, કિં વા જીર્ણવસ્ત્રસોપદ્રવગ્રામાદિત્યાગવ ? નાદ્યઃ, તત્ત્વવિદઃ કર્તૃત્ત્વરાહિત્યેન વિધિ-નિષેધાનધિકારાત્ । અત એવ સ્મર્યતે -

“જ્ઞાનામૃતેન તૃપ્તસ્ય કૃતકૃત્યસ્ય યોગિનઃ ।
નૈવાસ્તિ કિઞ્ચિત્કર્તવ્યમસ્તિ ચેન્ન સ તત્ત્વવિત્ ॥ ઇતિ । - (જાબાલદર્શનોપનિષદિ ૧.૨૩) ઇતિ ॥

ન દ્વિતીયઃ । કૌપીનદણ્ડાદ્યાશ્રમલિઙ્ગવિધાનશ્રવણાત્ ।

નૈષ દોષઃ, પ્રતિપત્તિકર્મવદુભયરૂપત્વોપપત્તેઃ । તથા હિ - જ્યોતિષ્ટોમે દીક્ષિતસ્ય દીક્ષાઙ્ગનિયમાનુષ્ઠાનકાલે કણ્ડૂયિતું હસ્તં પ્રતિષિધ્ય કૃષ્ણવિષાણા વિહિતા “યદ્ધસ્તેન કણ્ડૂયેત પામાનમ્ભાવુકાઃ પ્રજાઃ સ્યુર્યત્સ્મયેત નગ્નમ્ભાવુકાઃ” (તૈત્તિરીયસંહિતાયાં ઇતિ, “કૃષ્ણવિષાણયા કણ્ડૂયતે” (તત્રૈવ ૬.૧.૩) ઇતિ ચ । તસ્યાશ્ચ કૃષ્ણવિષાણાયાઃ સમાપ્તે નિયમે પ્રયોજનાભાવાદ્ વોઢુમશક્યત્વાચ્ચ ત્યાગઃ સ્વત એવ પ્રાપ્તઃ । તં ચ ત્યાગં સપ્રકારં વેદો વિદધાતિ - “નીતાસુ દક્ષિણાસુ ચાત્વાલે કૃષ્ણવિષાણાં પ્રાસ્યતિ” (તત્રૈવ ૬.૧.૩) ઇતિ । તદિદં પ્રતિપત્તિકર્મ લૌકિકં વૈદિકં ચેત્યુભયરૂપમ્ । એવં વિદ્વત્સંન્યાસોઽપ્યુભયરૂપઃ । ન ચ તત્ત્વવિદિ શઙ્કનીયઃ, ચિદાત્મન્યારોપિતસ્ય કર્તૃત્વસ્ય વિદ્યયાઽપોહિતત્વેઽપિ ચિચ્છાયોપેતેઽન્તઃકરણોપાધૌ વિક્રિયાસહસ્રયુક્તે સ્વતઃસિદ્ધસ્ય કર્તૃત્વસ્યાત્યન્તાભાવઃ યાવદ્દ્રવ્યભાવિતયાઽનપોહિતત્વાત્ । ન ચ “જ્ઞાનામૃતેન” (જાબાલદર્શનોપનિષદિ ૧.૨૩) ઇત્યાદિસ્મૃતિવિરોધઃ, સત્યપિ જ્ઞાને વિશ્રાન્તિરહિતસ્ય તૃપ્ત્યભાવેન વિશ્રાન્તિસમ્પાદનલક્ષણકર્તવ્યશેષસદ્ભાવેન કૃતકૃત્યત્વાભાવાત્ ।

નનુ તત્ત્વવિદોઽપિ વિધ્યઙ્ગીકારે સતિ તેનાપૂર્વેણ દેહાન્તરમારભ્યેત ।

મૈવમ્ । તસ્યાપૂર્વસ્ય ચિત્તવિશ્રાન્તિપ્રતિબન્ધનિવારણલક્ષણસ્ય દૃષ્ટફલસ્ય સમ્ભવે સત્યદૃષ્ટફલકલ્પનાયા અન્યાય્યત્વાત્; અન્યથા શ્રવણાદિવિધિષ્વપિ બ્રહ્મજ્ઞાનોત્પત્તિપ્રતિબન્ધનિવારણરૂપં દૃષ્ટફલમુપેક્ષ્ય જન્માન્તરહેતુત્વં કલ્પ્યેત ।

તસ્માદ્વિધ્યઙ્ગીકારે દોષાભાવાદ્વિવિદિષુરિવ વિદ્વાનપિ ગૃહસ્થો નાન્દીમુખશ્રાદ્ધોપવાસ-જાગરણાદિવિધિમનુસૃત્યૈવ સંન્યસ્યેત્ । યદ્યપ્યત્ર શ્રાદ્ધાદિકં નોપદિષ્ટં તથાપ્યસ્ય વિદ્વત્સન્ન્યાસસ્ય વિવિદિષાસન્ન્યાસવિકૃતિત્વાત્ “પ્રકૃતિવદ્વિકૃતિઃ કર્તવ્યા” ઇતિ ન્યાયેન તદીયા ધર્માઃ સર્વેઽપ્યત્ર પ્રાપ્નુવન્તિ, યથાગ્નિષ્ટોમસ્ય વિકૃતિષ્વતિરાત્રાદિષુ તદીયધર્મપ્રાપ્તિસ્તદ્વત્ । તસ્માદિતરસન્ન્યાસવદત્રાપિ પ્રૈષમન્ત્રેણ પુત્રમિત્રાદિત્યાગં સઙ્કલ્પયેત્ । બન્ધ્વાદીનિત્યાદિશબ્દેન ભૃત્યપશુગૃહક્ષેત્રા-દિલૌકિકપરિગ્રહાદિવિશેષાઃ સઙ્ગૃહ્યન્તે । સ્વાધ્યાયં ચેતિ ચકારેણ તદર્થનિર્ણયોપયુક્તાનિ પદવાક્યપ્રમાણશાસ્ત્રાણિ વેદોપબૃંહકાણીતિહાસપુરાણાદીનિ ચ સમુચ્ચિનોતિ । ઔત્સુક્યનિવૃત્તિ-માત્રપ્રયોજનાનાં કાવ્યનાટકાદીનાં ત્યાગઃ કૈમુતિકન્યાયસિદ્ધઃ । સર્વકર્માણીતિ સર્વશબ્દેન લૌકિકવૈદિકનિત્યનૈમિત્તિકનિષિદ્ધકામ્યાનિ સઙ્ગૃહ્યન્તે । પુત્રાદિત્યાગેનૈહિકભોગઃ પરિહૃતઃ ।

સર્વકર્મત્યાગેન ચામુષ્મિકભોગાશા ચિત્તવિક્ષેપકારિણી પરિહૃતા । અયમિતિ છાન્દસવિભક્તિલિઙ્ગવ્યત્યયેનેદં બ્રહ્માણ્ડમિતિ યોજનીયમ્ । બ્રહ્માણ્ડત્યાગો નામ તત્પ્રાપ્તિહેતોર્વિરાડુપાસનસ્યત્યાગઃ । બ્રહ્માણ્ડં ચેતિ ચકારેણ સૂત્રાત્મપ્રાપ્તિહેતોર્હિરણ્યગર્ભોપાસનસ્ય તત્ત્વજ્ઞાનહેતૂનાં શ્રવણાદીનાં ચ સમુચ્ચયઃ । સ્વપુત્રાદિહિરણ્યગર્ભોપાસનાન્તમૈહિકમામુષ્મિકં ચ સુખસાધનં સર્વં પ્રૈષમન્ત્રોચ્ચારણેન પરિત્યજ્ય કૌપીનાદિકં પરિગૃહ્ણીયાત્ । આચ્છાદનં ચેતિ ચકારેણ પાદુકાદીનિ સમુચ્ચિનોતિ । તથા ચ સ્મૃતિઃ-

“કૌપીનયુગલં વાસઃ કન્થાં શીતનિવારિણીમ્ ।
પાદુકે ચાપિ ગૃહ્ણીયાત્કુર્યાન્નાન્યસ્ય સઙ્ગ્રહમ્” ॥ - (હારીતસંહિતાયાં ૬.૭૨૮; લઘુવિષ્ણુસ્મૃતૌ ૪.૭) ઇતિ ॥

સ્વશરીરોપભોગો નામ કૌપીનેન લજ્જાવ્યાવૃત્તિઃ । દણ્ડેન ગોસર્પાદ્યુપદ્રવપરિહારઃ । આચ્છાદનેન શીતાદિપરિહારઃ । ચકારાત્પાદુકાભ્યામુચ્છિષ્ટદેશસ્પર્શાદિપરિહારં સમુચ્ચિનોતિ । લોકસ્યોપકારો નામ દણ્ડાદિલિઙ્ગેનૈતદીયમુત્તમાશ્રમં પરિજ્ઞાય તદુચિતાભિવન્દનભિક્ષાપ્રદાનાદિપ્રવૃત્ત્યા સુકૃતસિદ્ધિઃ । ચકારેણાશ્રમમર્યાદાયાઃ શિષ્ટાચારપ્રાપ્તાયાઃ પાલનં સમુચ્ચિનોતિ ।

કૌપીનાદિપરિગ્રહસ્યાનુકૂલત્વમભિપ્રેત્ય મુખ્યત્વં પ્રતિષેધતિ -

“તચ્ચ ન મુખ્યોઽસ્તિ” ઇતિ (પરમ૦ ઉપ૦ .૧) ॥

યત્કૌપીનાદિપરિગ્રહણમસ્તિ તદપ્યસ્ય યોગિનઃ પરમહંસસ્ય મુખ્યઃ કલ્પો ન ભવતિ, કિં ત્વનુકલ્પ એવ । વિવિદિષાસંન્યાસિનસ્તુ દણ્ડગ્રહણં મુખ્યમિતિ કૃત્વા દણ્ડવિયોગસ્ય નિષેધઃ સ્મર્યતે-

“દણ્ડાત્મનોસ્તુ સંયોગઃ સર્વદૈવ વિધીયતે ।
ન દણ્ડેન વિના ગચ્છેદિષુક્ષેપત્રયં બુધઃ” ॥ - (સન્યાસોપનિષદિ ૨.૧૧) ઇતિ ॥

પ્રાયશ્ચિત્તમપિ દણ્ડનાશે પ્રાણાયામશતં સ્મર્યતે - “દણ્ડત્યાગે શતં ચરેત્” ઇતિ ।

યોગિનઃ પરમહંસસ્ય મુખ્યં કલ્પં પ્રશ્નોત્તરાભ્યાં દર્શયતિ -

“કોઽયં મુખ્ય ઇતિ ચેદયં મુખ્યઃ, ન દણ્ડં ન શિખં ન યજ્ઞોપવીતં નાચ્છાદનં ચરતિ પરમહંસઃ “(પરમ૦ ઉપ૦ .૧-૨) ઇતિ ।

ન શિખમિતિ છાન્દસો લિઙ્ગવ્યત્યયોઽનુસન્ધેયઃ । યથા વિવિદિષુઃ પરમહંસઃ શિખાયજ્ઞોપવીતાભ્યાં રહિતો મુખ્યસ્તથા યોગી દણ્ડાચ્છાદનાભ્યાં રહિતઃ સન્મુખ્યો ભવતિ, દણ્ડસ્ય વૈણવત્ત્વાદિલક્ષણમાચ્છાદનસ્ય કન્થાત્વાદિલક્ષણં ચ પરીક્ષિતું દણ્ડાદિકં સમ્પાદયિતું રક્ષિતું ચ ચિત્તે વ્યાપૃતે સતિ ચિત્તવૃત્તિનિરોધલક્ષણો યોગો ન સિધ્યેદિતિ । તચ્ચ ન યુક્તમ્, “ન હિ વરવિઘાતાય કન્યોદ્વાહઃ” ઇતિ ન્યાયાત્ । આચ્છાદનાદ્યભાવે શીતાદિબાધાયાઃ કઃ પ્રતીકાર ઇત્યાશઙ્ક્યાહ -

“ન શીતં ન ચોષ્ણં ન સુખં ન દુઃખં ન માનાવમાનૌ ચ ષડૂર્મિવર્જમ્” (પરમ૦ ઉપ૦ .૨) ઇતિ ।

નિરુદ્ધાશેષચિત્તવૃત્તેર્યોગિનઃ શીતં નાસ્તિ, તત્પ્રતીત્યભાવાત્ । યથા લીલાયામાસક્તસ્ય બાલસ્યાચ્છાદનાદિરહિતસ્યાપિ હેમન્તશિશિરયોઃ પ્રાતઃકાલેઽપિ શીતં નાસ્તિ, તથા પરમાત્મન્યાસક્તસ્ય યોગિનઃ શીતાભાવઃ । ઘર્મકાલ ઉષ્ણાભાવશ્ચ તથૈવાવગન્તવ્યઃ । વર્ષાસુ તદભાવસમુચ્ચયાર્થશ્ચકારઃ । શીતોષ્ણયોરપ્રતીતૌ તજ્જન્યયોઃ સુખદુઃખયોરભાવ ઉપપન્નઃ । નિદાઘે શીતં સુખજનકં હેમન્તે દુઃખજનકમ્ । ઉક્તવિપર્યય ઉષ્ણે દ્રષ્ટવ્યઃ । માનઃ

પુરુષાન્તરેણ સમ્પાદિતઃ સત્કારઃ । અવમાનસ્તિરસ્કારઃ । યદા યોગિનઃ સ્વાત્મવ્યતિરિક્તં પુરુષાન્તરમેવ ન પ્રતીયતે તદા માનાવમાનૌ દૂરાદપેતૌ । ચકારઃ શત્રુમિત્રરાગદ્વેષાદિદ્વન્દ્વાભાવં સમુચ્ચિનોતિ । ષડૂર્મયઃ - ક્ષુત્પિપાસે શોકમોહૌ જરામરણે ચ । તેષાં ત્રયાણાં દ્વન્દ્વાનાં ક્રમેણ પ્રાણમનોદેહધર્મત્વાદાત્મતત્ત્વાભિમુખસ્ય યોગિનસ્તદ્વર્જનં યુજ્યતે ।

નન્વસ્ત્વેવં સમાધિદશાયાં શીતાદ્યભાવ; વ્યુત્થાનદશાયાં તુ નિન્દાદિક્લેશઃ સંસારિણમિવૈનં બાધેતૈવેત્યાશઙ્ક્યાહ - "નિન્દાગર્વમત્સરદમ્ભદર્પેચ્છાદ્વેષસુખદુઃખકામક્રોધલોભમોહહર્ષાસૂયાહઙ્કારા-દીંશ્ચ હિત્વા" (પરમ૦ ઉપ૦ .૨) ઇતિ ।

વિવિધૈઃ પુરુષૈઃ સ્વસ્મિન્નાપાદિતા દોષોક્તિર્નિન્દા । અન્યેભ્યોઽધિકોઽહમિતિ ચિત્તવૃત્તિર્ગર્વઃ । વિદ્યાધનાદિભિરન્યસદૃશો ભવામીતિ બુદ્ધિર્મત્સરઃ । પરેષામગ્રે જપધ્યાનાદિપ્રકટનં દમ્ભઃ । ભર્ત્સનાદિષુ દૃઢબુદ્ધિર્દર્પઃ । ધનાદ્યભિલાષ ઇચ્છા । શત્રુવધાદિષુ બુદ્ધિર્દ્વેષઃ । અનુકૂલદ્રવ્યાદિલાભેન બુદ્ધિસ્વાસ્થ્યં સુખમ્ । તદ્વિપર્યયો દુઃખમ્ । યોષિદાદ્યભિલાષઃ કામઃ । કામિતાર્થવિઘાતજન્યો બુદ્ધિક્ષોભઃ ક્રોધઃ । લબ્ધસ્ય ધનસ્ય ત્યાગાસહિષ્ણુત્વં લોભઃ । હિતેષ્વહિતબુદ્ધિરહિતેષુ ચ હિતબુદ્ધિર્મોહઃ । ચિત્તગતસુખાભિવ્યઞ્જિકા મુખવિકાસાદિહેતુર્ધીવૃત્તિર્હર્ષઃ । પરકીયગુણેષુ દોષત્વારોપણમસૂયા । દેહેન્દ્રિયાદિસઙ્ઘાતેષ્વાત્મભ્રમોઽહઙ્કારઃ । આદિશબ્દેન ભોગ્યવસ્તુષુ મમકારસમીચીનત્વાદિબુદ્ધયો ગૃહ્યન્તે । ચકારો યથોક્તનિન્દાદિવિપરીતં સ્તુત્યાદિકં સમુચ્ચિનોતિ । એતાન્ સર્વાન્ નિન્દાદીન્ હિત્વા પૂર્વોક્તવાસનાક્ષયાભ્યાસેન પરિત્યજ્યાવતિષ્ઠેતેતિ શેષઃ ।

નનુ વિદ્યમાને સ્વદેહે તત્પરિત્યાગો ન સમ્ભવતીત્યાશઙ્ક્યાહ -"સ્વવપુઃ કુણપમિવ દૃશ્યતે યતસ્તદ્વપુરપધ્વસ્તમ્" (પરમ૦ ઉપ૦ .૨) ઇતિ ।

પૂર્વં યત્સ્વકીયં વપુસ્તદિદાનીં યોગિના સ્વાત્મચૈતન્યાત્પૃથગ્ભૂતત્વેન કુણપમિવાવલોક્યતે । યથા શ્રદ્ધાલુઃ સ્પર્શનભીત્યા શવદેહં દૂરે સ્થિતોઽવલોકયતિ, તથાઽયં યોગી તાદાત્મ્યભ્રાન્ત્યુદયભીત્યા સાવધાનો દેહં ચિદાત્મનઃ સકાશાન્નિરન્તરં વિવિનક્તિ । યતઃ કારણાત્ તદ્વપુરાચાર્યોપદેશાગમાનુભવૈરપધ્વસ્તં ચિદાત્મનઃ
સકાશાન્નિરાકૃતમ્ । તતશ્ચૈતન્યવિયુક્તસ્ય દેહસ્ય શવતુલ્યતયા દૃશ્યમાનત્વાત્ સત્યપિ દેહે નિન્દાદિત્યાગો ઘટત ઇત્યભિપ્રાયઃ ।

નનૂત્પન્નો દિગ્ભ્રમઃ સૂર્યોદયદર્શનેન વિનષ્ટોઽપિ યથા કદાચિદનુવર્તતે, તથા કદાચિદાત્મનિ દેહાત્મસંશયાદ્યનુવૃત્તૌ નિન્દાદિક્લેશઃ પુનઃ પુનઃ પ્રસજ્યેતે - ત્યાશઙ્ક્યાહ-

"સંશયવિપરીતમિથ્યાજ્ઞાનાનાં યો હેતુસ્તેન નિત્યનિવૃત્તઃ" (પ૦ ઉપ૦ ૨) ઇતિ ।

આત્મા કર્તૃત્વાદિધર્મોપેતસ્તદ્રહિતો વેત્યાદિકં સંશયજ્ઞાનમ્ । દેહાદિરૂપ એવાત્મેતિ વિપરીતજ્ઞાનમ્ । એતદુભયં ભોક્તૃવિષયમ્ । મિથ્યાજ્ઞાનં તુ ભોગ્યવિષયમત્ર વિવક્ષિતમ્ । તચ્ચાનેકવિધમ્- "સઙ્કલ્પપ્રભવાન્કામાન્" (ભગવદ્ગીતાયાં ૬.૨૪) ઇત્યત્ર સ્પષ્ટીકૃતમ્ । તદ્ધેતુશ્ચતુર્વિધઃ, "અનિત્યાશુચિદુઃખાનાત્મસુ નિત્યશુચિસુખાત્મખ્યાતિરવિદ્યા" (યોગસૂત્રેષુ ૨.૫) ઇતિ સૂત્રણાત્ । અનિત્યે ગિરિનદીસમુદ્રાદૌ નિત્યત્વભ્રાન્તિરેકા । અશુચૌ પુત્રભાર્યાદિશરીરે શુચિત્વભ્રાન્તિર્દ્વિતીયા । દુઃખે કૃષિવાણિજ્યાદૌ સુખત્વભ્રાન્તિસ્તૃતીયા । ગૌણમિથ્યાત્મનિ પુત્રભાર્યાદાવન્નમયાદિકે ચાનાત્મનિ મુખ્યાત્મત્વભ્રાન્તિશ્ચતુર્થી । એતેષાં સંશયાદીનાં હેતુરદ્વિતીયબ્રહ્માત્મતત્ત્વાવરકમજ્ઞાનં તદ્વાસના ચ । તચ્ચાજ્ઞાનં યોગિનઃ પરમહંસસ્ય

મહાવાક્યાર્થબોધેન નિવૃત્તમ્; વાસના તુ યોગાભ્યાસેન નિવૃત્તા । ઉદાહૃતાયાં દિગ્ભ્રાન્તાવજ્ઞાને નિવૃત્તેઽપિ વાસનાયાઃ સદ્ભાવાદ્યથાપૂર્વં ભ્રાન્તિવ્યવહારઃ । યોગિનસ્તુ ભ્રાન્તિહેતુદ્વયરાહિત્યાત્કુતઃ સંશયાદીન્યનુવર્તેરન્ ? તમેનમનુવૃત્ત્યભાવમભિપ્રેત્ય તેન હેતુદ્વયેન યોગી નિત્યનિવૃત્ત ઇત્યુક્તમ્ । સત્યામપ્યજ્ઞાનતદ્વાસનાનિવૃત્તૌ તસ્યા નિવૃત્તેર્વિનાશાભાવાન્નિત્યત્વં દ્રષ્ટવ્યમ્ । તન્નિત્યત્વે હેતુમાહ -

"તન્નિત્યબોધઃ" (પરમ૦ ઉપ૦ ૨) ।

સર્વનામત્વાત્પ્રસિદ્ધાર્થવાચી તચ્છબ્દોઽત્ર સર્વવેદાન્તપ્રસિદ્ધં પરમાત્માનમાચષ્ટે । તસ્મિન્પરમાત્મનિ નિત્યો બોધો યસ્ય યોગિનઃ સોઽયં તન્નિત્યબોધઃ । યોગી હિ "તમેવ ધીરો વિજ્ઞાય પ્રજ્ઞાં કુર્વીત બ્રાહ્મણઃ" (બૃહદારણ્યકોપનિષદિ ૪.૪.૨૧) ઇતિ શ્રુતિમનુસૃત્ય ચિત્તવિક્ષેપાન્યોગેન પરિહૃત્ય નૈરન્તર્યેણ પરમાત્મવિષયામેવ પ્રજ્ઞાં કરોતિ । અતો બોધસ્ય નિત્યત્વાદ્બોધવિનાશ્યયોરજ્ઞાનતદ્વાસનયોર્નિવૃત્તિ-ર્નિત્યેત્યર્થઃ ।

બુધ્યમાનસ્ય પરમાત્મનસ્તાર્કિકેશ્વરવત્તટસ્થત્વશઙ્કાં વારયતિ -

"તત્સ્વયમેવાવસ્થિતિઃ" (પરમ૦ ઉપ૦ .૨) ઇતિ ।

યદ્વેદાન્તવેદ્યં પરં બ્રહ્માસ્તિ તત્સ્વયમેવ ન તુ સ્વસ્માદન્યદિત્યેવં નિશ્ચિત્ય યોગિનોઽવસ્થિતિર્ભવતિ ।

તસ્ય યોગિનો બ્રહ્માનુભવપ્રકારં દર્શયતિ -

"તં શાન્તમચલમદ્વયાનન્દવિજ્ઞાનઘન એવાસ્મિ તદેવ મમ પરમં ધામ" (પરમ૦ ઉપ૦ .૨) ઇતિ ।

તમિત્યાદિપદત્રયે દ્વિતીયા પ્રથમાર્થે દ્રષ્ટવ્યા । યઃ પરમાત્મા શાન્તઃ ક્રોધાદિવિક્ષેપરહિતઃ, અચલો ગમનાદિક્રિયારહિતઃ, સ્વગતસજાતીયવિજાતીયભેદશૂન્યઃ સચ્ચિદાનન્દૈકરસોઽસ્તિ સ એવાહમસ્મિ । તદેવ બ્રહ્મતત્ત્વં મમ યોગિનઃ પરમં ધામ વાસ્તવં સ્વરૂપમ્; ન ત્વેતત્કર્તૃત્વભોક્તૃત્વાદિયુક્તમ્, એતસ્ય માયાકલ્પિતત્વાત્ । નન્વાત્મનઃ પરબ્રહ્મત્વ આનન્દાવાપ્તિરિદાનીં કુતો નેત્યત્રાનન્દાવાપ્તિઃ સદૃષ્ટાન્તમુક્તાભિયુક્તૈઃ -

"ગવાં સર્પિઃ શરીરસ્થં ન કરોત્યઙ્ગપોષણમ્ ।
તદેવ કર્મરચિતં પુનસ્તસ્યૈવ ભેષજમ્ ॥

એવં સર્વશરીરસ્થઃ સર્પિવત્પરમેશ્વરઃ ।
વિના ચોપાસનાં દેવો ન કરોતિ હિતં નૃષુ । " - (બૃહદ્યોગીયાજ્ઞવલ્ક્યસ્મૃતૌ ૯.૩૦-૩૧) ઇતિ ॥

(**યથા સર્પિઃ શરીરસ્થં ગવાં ન કુરુતે બલમ્ ।
નિર્ગતં કર્મસંયુક્ત દત્તં તાસાં મહાબલમ્ ॥

તથા વિષ્ણુઃ શરીરસ્થો ન કરોતિ હિતં નૃણામ્ ।
વિનારાધનયા દેવઃ સર્વગઃ પરમેશ્વરઃ ॥ - (ગરુડપુરાણે ૨૨૭.૨,૩) ॥

યદિ યોગિનઃ પૂર્વાશ્રમપ્રસિદ્ધા આચાર્યપિતૃભ્રાત્રાદયઃ કર્મિણઃ શ્રદ્ધાજડાઃ શિખાયજ્ઞોપવીતસન્ધ્યા-વન્દનાદિરાહિત્યેન પાષણ્ડિત્વમારોપ્ય વ્યામોહયેયુસ્તદા વ્યામોહાનુત્પત્તયે યોગિનો વર્તમાનં નિશ્ચયં દર્શયતિ-

"તદેવ ચ શિખા તદેવોપવીતં ચ પરમાત્માત્મનોરેકત્વજ્ઞાનેન તયોર્ભેદ એવ વિભગ્નઃ સા સન્ધ્યા" (પરમ૦ ઉપ૦ .૨) ઇતિ ।

યદ્વેદાન્તવેદ્યસ્ય પરબ્રહ્મણો જ્ઞાનં તદેવ કર્માઙ્ગભૂતબાહ્યશિખાયજ્ઞોપવીતસ્થાનીયમ્ । અન્યે ચ મન્ત્રદ્રવ્યલક્ષણે કર્માઙ્ગભૂતે ચકારાભ્યાં સમુચ્ચીયેતે । શિખાદ્યઙ્ગસાધ્યૈઃ કર્મભિરુત્પન્નં યત્સ્વર્ગાદિસુખં તત્સર્વં બ્રહ્મજ્ઞાનેનૈવ લભ્યતે, વિષયાનન્દસ્ય સર્વસ્ય બ્રહ્માનન્દલેશત્વાત્ । "એતસ્યૈવાનન્દસ્યાન્યાનિ ભૂતાનિ માત્રામુપજીવન્તિ" (બૃ। ઉપ૦ .૪.૩.૩૨) ઇતિ શ્રુતિઃ । એતદેવાભિપ્રેત્યાથર્વણિકા બ્રહ્મોપનિષદ્યામનન્તિ-
"સશિખં વપનં કૃત્વા બહિઃસૂત્રં ત્યજેદ્બુધઃ ।
યદક્ષરં પરં બ્રહ્મ તત્સૂત્રમિતિ ધારયેત્ ॥ (બ્રહ્મોપનિષદિ ૬) ॥

"સૂચનાત્સૂત્રમિત્યાહુઃ સૂત્રં નામ પરં પદમ્ ।
તત્સૂત્રં વિદિતં યેન સ વિપ્રો વેદપારગઃ ॥ (તત્રૈવ ૭) ॥

"યેન સર્વમિદં પ્રોતં સૂત્રે મણિગણા ઇવ ।
તત્સૂત્રં ધારયેદ્યોગી યોગવિત્તત્ત્વદર્શિવાન્ ॥ (તત્રૈવ ૮) ॥

"બહિઃસૂત્રં ત્યજેદ્વિદ્વાન્ યોગમુત્તમમાસ્થિતઃ ।
બ્રહ્મભાવમિદં સૂત્રં ધારયેદ્યઃ સ ચેતનઃ ।
ધારણાત્તસ્ય સૂત્રસ્ય નોચ્છિષ્ટો નાશુચિર્ભવેત્ ॥ (તત્રૈવ ૯) ॥

"સૂત્રમન્તર્ગતં યેષાં જ્ઞાનયજ્ઞોપવીતિનામ્ ।
તે વૈ સૂત્રવિદો લોકે તે ચ યજ્ઞોપવીતિનઃ ॥ (તત્રૈવ ૧૦) ॥

"જ્ઞાનશિખા જ્ઞાનનિષ્ઠા જ્ઞાનયજ્ઞોપવીતિનઃ ।
જ્ઞાનમેવ પરં તેષાં પવિત્રં જ્ઞાનમુચ્યતે ॥ (તત્રૈવ ૧૧) ॥

"અગ્નેરિવ શિખા નાન્યા યસ્ય જ્ઞાનમયી શિખા ।
સ શિખીત્યુચ્યતે વિદ્વાન્ નેતરે કેશધારિણઃ ॥ (તત્રૈવ ૧૨) ॥

"કર્મણ્યધિકૃતા યે તુ વૈદિકે બ્રાહ્મણાદયઃ ।
તૈર્વિધાર્યમિદં સૂત્રં કર્માઙ્ગં તદ્ધિ વૈ સ્મૃતમ્ ॥ (તત્રૈવ ૧૩) ॥

"શિખા જ્ઞાનમયી યસ્યોપવીતં ચાપિ તન્મયમ્ ।
બ્રાહ્મણ્યં સકલં તસ્ય ઇતિ બ્રહ્મવિદો વિદુઃ ॥ (તત્રૈવ ૧૪) ॥

"ઇદં યજ્ઞોપવીતં ચ પરમં યત્પરાયણમ્ ।
વિદ્વાન્યજ્ઞોપવીતી સ્યાત્તજ્જ્ઞાસ્તં યજ્વિનં વિદુઃ" ॥ (તત્રૈવ ૧૫) ઇતિ ॥

તસ્માદ્યોગિનઃ શિખાયજ્ઞોપવીતે યથા વિદ્યેતે તથૈવ સન્ધ્યાપિ વિદ્યતે । યઃ શાસ્ત્રગમ્યઃ પરમાત્મા યશ્ચાહમ્પ્રત્યયગમ્યો જીવાત્મા, તયોરેકત્વજ્ઞાનેન મહાવાક્યજન્યેન ભ્રાન્તિપ્રતીતો ભેદો વિશેષેણ ભગ્ન એવ । પુનર્ભ્રાન્ત્યનુદયો ભઙ્ગસ્ય વિશેષઃ । યેયમેકત્વબુદ્ધિઃ સેયમુભયોરાત્મનોઃ સન્ધૌ જાયમાનત્વાત્ સન્ધ્યેત્યુચ્યતે । અહોરાત્રયોઃ સન્ધાવનુષ્ઠેયા ક્રિયા યથા સન્ધ્યા તદ્વત્ । એવં ચ સતિ યોગી શ્રદ્ધાજડૈર્ન વ્યામોહયિતું શક્યઃ ।

“કોઽયં માર્ગઃ ? “ઇતિ પ્રશ્નસ્ય “અસૌ સ્વપુત્ર” (પરમ૦ ઉપ૦। ૧) ઇત્યાદિનોત્તરમુક્તમ્ । “કા સ્થિતિઃ” ? ઇત્યેતસ્ય “મહાપુરુષ -” ઇત્યાદિના સઙ્ક્ષિપ્યોત્તરમુક્ત્વા “સંશયવિપરીત -” ઇત્યાદિના તદેવ પ્રપઞ્ચ્યેદાની-મુપસંહરતિ - “સર્વાન્કામાન્પરિત્યજ્ય અદ્વૈતે પરમા સ્થિતિઃ” । (પરમ. ઉપ૦ .૩) ઇતિ ॥

ક્રોધલોભાદીનાં કામપૂર્વકત્વાત્ કામપરિત્યાગેન ચિત્તદોષાઃ સર્વેઽપિ પરિત્યજ્યન્તે । એતદેવાભિપ્રેત્ય વાજસનેયિભિરામ્નાતં - “અથો ખલ્વાહુઃ કામમય એવાયં પુરુષઃ” (બૃહદારણ્યકોપનિષદિ ૪.૪.૫) ઇતિ । અતો નિષ્કામસ્ય યોગિચિત્તસ્યાદ્વૈતે નિર્વિઘ્ના સ્થિતિરુપપદ્યતે ।
નનુ દણ્ડગ્રહણવિધિવાસનયોપેતા વિવિદિષાસંન્યાસિનો યોગિનં દણ્ડરહિતં પરમહંસં નાભ્યુપગચ્છન્તીત્યાશઙ્ક્યાહ-

“જ્ઞાનદણ્ડો ધૃતો યેન એકદણ્ડી સ ઉચ્યતે ।
કાષ્ઠદણ્ડો ધૃતો યેન સર્વાશી જ્ઞાનવર્જિતઃ ।
સ યાતિ નરકાન્ઘોરાન્મહારૌરવસંજ્ઞકાન્ ॥

તિતિક્ષાજ્ઞાનવૈરાગ્યશમાદિગુણવર્જિતઃ ।
ભિક્ષામાત્રેણ યો જીવેત્સ પાપી યતિવૃત્તિહા ॥

ઇદમન્તરં જ્ઞાત્વા સ પરમહંસઃ” (પરમ૦ ઉપ૦ .૩.૩) ઇતિ ।
પરમહંસસ્ય યોઽયમેકદણ્ડઃ સ દ્વિવિધઃ - જ્ઞાનદણ્ડઃ કાષ્ઠદણ્ડશ્ચેતિ । યથા ત્રિદણ્ડિનો વાગ્દણ્ડો મનોદણ્ડઃ કર્મદણ્ડશ્ચેતિ (“કાયદણ્ડશ્ચેતિ” ઇતિ વા પાઠઃ) ત્રૈવિધ્યં તદ્વત્ । વાગ્દણ્ડાદયો મનુના સ્મર્યન્તે-
“વાગ્દણ્ડોઽથ મનોદણ્ડઃ કર્મદણ્ડસ્તથૈવ ચ ।
યસ્યૈતે નિયતા બુદ્ધૌ સ ત્રિદણ્ડીતિ ચોચ્યતે ॥

ત્રિદણ્ડમેતન્નિક્ષિપ્ય સર્વભૂતેષુ માનવઃ ।
કામક્રોધૌ તુ સંયમ્ય તતઃ સિદ્ધિં નિગચ્છતિ” ॥ - (મનુ .૧૨.૧૦, ૧૧) ઇતિ ॥

તેષાં સ્વરૂપં દક્ષઃ સ્મરતિ -
“વાગ્દણ્ડોઽથ મનોદણ્ડઃ કર્મદણ્ડસ્તથૈવ ચ ।
યસ્યૈ નિયતા દણ્ડાસ્ત્રિદણ્ડીતિ સ ઉચ્યતે ।
વાગ્દણ્ડે મૌનમાતિષ્ઠેત્ કર્મદણ્ડે ત્વનીહતામ્ ।
માનસસ્ય તુ દણ્ડસ્ય પ્રાણાયામો વિધીયતે” ॥ ઇતિ ।
“કર્મદણ્ડોઽલ્પભોજનમ્” ઇતિ સ્મૃત્યન્તરપાઠઃ । ઈદૃશં ત્રિદણ્ડિત્વં પરમહંસસ્યાપ્યસ્તિ ।
તદેતદભિપ્રેત્ય પિતામહઃ સ્મરતિ -
“યતિઃ પરમહંસસ્તુ તુર્યાખ્યઃ શ્રુતિચોદિતઃ ।
મૈચ નિયમૈર્યુક્ત વિષ્ણુરૂપી ત્રિદણ્ડભૃત્” ॥ ઇતિ ।

એવં સતિ મૌનાદીનાં વાગાદિદમનહેતુત્વાદ્યથા દણ્ડત્વં તથૈવાજ્ઞાનતત્કાર્યદમનહેતોર્જ્ઞાનસ્ય દણ્ડત્વમ્ । અયં જ્ઞાનદણ્ડો યેન પરમહંસેન ધૃતઃ સ એવ મુખ્ય એકદણ્ડીત્યુચ્યતે । માનસસ્ય જ્ઞાનદણ્ડસ્ય કદાચિચ્ચિત્તવિક્ષેપેણ વિસ્મૃતિઃ પ્રસજ્યેતેતિ તન્નિવારણાર્થં સ્મારકઃ કાષ્ઠદણ્ડો ધ્રિયતે । તદેતચ્છાસ્ત્રાર્થર-
હસ્યમબુદ્ધ્વા વેષમાત્રેણ પુરુષાર્થસિદ્ધિમભિપ્રેત્ય કાષ્ઠદણ્ડો યેન પરમહંસેન ધૃતઃ સ પુરુષો બહુવિધયાતનોપેતત્વાદ્ઘોરાન્મહારૌરવસંજ્ઞકાન્નરકાનાપ્નોતિ । તત્ર હેતુરચ્યતે?? - પરમહંસવેષં દૃષ્ટ્વા જ્ઞાનિત્વભ્રાન્ત્યા સર્વે જનાઃ સ્વસ્વગૃહે તં ભોજયન્તિ । અયં ચ જિહ્વાલમ્પટો વર્જ્યાવર્જ્યવિવેકમકૃત્વા સર્વમન્નમશ્નાતિ । તેન પ્રત્યવાયં પ્રાપ્નોતિ । યાનિ તુ “નાન્નદોષેણ મસ્કરી” (સંન્યાસોપનિષદિ ૭૨) , “ચાતુર્વર્ણ્યં ચરેદ્ભૈક્ષમ્” ઇત્યાદિસ્મૃતિવચનાનિ તાનિ જ્ઞાનિવિષયાણિ । અયં ચ જ્ઞાનવર્જિત ઇતિ યુક્તોઽસ્ય નરકઃ । અત એવ જ્ઞાનહીનસ્ય યતેર્ભિક્ષાનિયમમાહ મનુઃ-

“ન ચોત્પાતનિમિત્તાભ્યાં ન નક્ષત્રાઙ્ગવિદ્યયા ।
નાનુશાસનવાદાભ્યાં ભિક્ષાં લિપ્સેત કર્હિચિત્ ॥ ૫૦॥

એકકાલં ચરેદ્ભૈક્ષં ન પ્રસજ્યેત વિસ્તરે ॥

ભૈક્ષે પ્રસક્તો હિ યતિર્વિષયેષ્વપિ સજ્જતિ” ॥ ૫૫॥ - (મનુ૦ ૬.૫૦, ૫૫) ॥

જ્ઞાનાભ્યાસિનં પ્રતિ ત્વેવં સ્મર્યતે-
“એકવારં દ્વિવારં વા ભુઞ્જીત પરહંસકઃ ।
યેન કેન પ્રકારેણ જ્ઞાનાભ્યાસી ભવેત્સદા” ॥ ઇતિ ।
એવં ચ સતિ જ્ઞાનદણ્ડકાષ્ઠદણ્ડયોર્યદન્તરમુત્તમત્વાધમત્વરૂપં તદિદમવગત્યોત્તમં જ્ઞાનદણ્ડં યો ધારયતિ સ એવ મુખ્યઃ પરમહંસ ઇત્યભ્યુપગન્તવ્યમ્ ।
નન્વસ્ત્વભિજ્ઞસ્ય પરમહંસસ્ય જ્ઞાનદણ્ડો માભૂત્વકાષ્ઠદણ્ડનિર્બન્ધઃ, ઇતરા તુ ચર્યા સર્વા કીદૃશીત્યાશઙ્ક્યાહ -
“આશામ્બરો ન નમસ્કારો ન સ્વધાકારો ન નિન્દા ન સ્તુતિર્યાદૃચ્છિકો ભવેદ્ ભિક્ષુર્નાવાહનં ન વિસર્જનં ન મન્ત્રં ન ધ્યાનં નોપાસનં ન લક્ષ્યં નાલક્ષ્યં ન પૃથઙ્નાપૃથઙ્ ન ચાહં ન ત્વં ન ચ સર્વં ન ચાનિકેતસ્થિતિરેવ સ ભિક્ષુઃ સૌવર્ણાદીન્નૈવ પરિગ્રહેન્ન લોકં નાવલોકં ચ” (પરમ૦ ઉપ૦ .૪) ઇતિ ।
આશા દિશઃ, તા એવામ્બરં વસ્ત્રમાચ્છાદનં યસ્યાસાવાશામ્બરઃ । યત્તુ સ્મૃતિવચનમ્-
“જાન્વોરૂર્ધ્વમધો નાભેઃ પરિધાયૈકમમ્બરમ્ ।
દ્વિતીયમુત્તરં વાસઃ પરિધાય ગૃહાનટેત્” ॥

ઇતિ, તદિદમયોગિવિષયમ્ । અત એવ પૂર્વં “તચ્ચ ન મુખ્યોઽસ્તિ” ઇત્યુક્તમ્ ।
યદ્યપિ સ્મૃત્યન્તરં -
“યો ભવેત્પૂર્વસંન્યાસી તુલ્યો વૈ ધર્મતો યદિ ।
તસ્મૈ પ્રણામઃ કર્તવ્યો નેતરાય કદાચન” ॥

ઇતિ, તથાપિ તસ્યાયોગિવિષયત્વાન્નાસ્ય નમસ્કારઃ કર્તવ્યોઽસ્તિ । અત એવ બ્રાહ્મણલક્ષણે "નિર્નમસ્કારમસ્તુતિમ્" (મહાભારતે શાન્તિપર્વણિ મોક્ષધર્મે ૨૩૭.૨૪) ઇત્યુદાહૃતમ્ ।
ગયાપ્રયાગાદિતીર્થેષુ શ્રદ્ધાજાડ્યાત્પ્રાપ્તઃ સ્વધાકારો નિષિધ્યતે । પૂર્વત્ર "નિન્દાગર્વ -" (પરમ૦ ઉપ૦ .૨) ઇત્યાદિવાક્યેનપરકૃતયા સ્વનિન્દયા ક્લેશો નિવારિતઃ, અત્ર તુ સ્વકર્તૃકે અન્યવિષયે નિન્દાસ્તુતી નિષિધ્યેતે । યાદૃચ્છિકત્વં નિર્બન્ધરાહિત્યમ્ । ન ક્વચિદપિ વ્યવહારે નિર્બન્ધં કુર્યાત્ । યસ્તુ દેવપૂજાયાં નિર્બન્ધઃ સ્મર્યતે-
"ભિક્ષાટનં જપઃ શૌચં સ્નાનં ધ્યાનં સુરાર્ચનમ્ ।
કર્તવ્યાનિ ષડેતાનિ સર્વથા નૃપદણ્ડવત્" ॥

ઇતિ, તસ્યાપ્યયોગિવિષયત્વમભિપ્રેત્ય નાવાહનમિત્યાદ્યામ્નાતમ્ ।
સકૃત્સ્મરણં ધ્યાનમ્, નૈરન્તર્યેણાનુસ્મરણમુપાસનમિતિ તયોર્ભેદઃ । યથા યોગિનઃ સ્તુતિનિન્દાદિ-લૌકિકવ્યવહારાભાવઃ, યથા વા દેવપૂજાદિધર્મશાસ્ત્રવ્યવહારાભાવઃ, તથા લક્ષ્યત્વાલક્ષ્યત્વાદિ-જ્ઞાનશાસ્ત્રવ્યવહારોઽપિ નાસ્તિ । "યત્સાક્ષિચૈતન્યમસ્તિ તદિદં તત્ત્વમસીતિ વાક્યે ત્વમ્પદેન લક્ષ્યમ્; દેહાદિવિશિષ્ટં ચૈતન્યં લક્ષ્યં ન ભવતિ, કિં તુ વાચ્યમ્; તચ્ચ વાચ્યં તત્પદાર્થાત્પૃથક્, લક્ષ્યં ત્વપૃથક્; સ્વદેહનિષ્ઠો વાચ્યોઽર્થોઽહમિતિ વ્યવહારાર્હઃ, પરદેહનિષ્ઠસ્ત્વમિતિ વ્યવહારાર્હઃ । લક્ષ્યં વાચ્યમિત્યુભયવિધં ચૈતન્યોપેતમ્, અન્યજ્જડં જગત્સર્વમિતિ વ્યવહારાર્હમ્" ઇત્યેતાદૃશો વિકલ્પો ન કોઽપિ યોગિનોઽસ્તિ, તદીયચિત્તસ્ય બ્રહ્મણિ વિશ્રાન્તત્વાત્ । અત એવ સ ભિક્ષુરનિકેતસ્થિતિરેવ । યદિ નિયતનિવાસાર્થં કશ્ચિન્મઠં સમ્પાદયેત્, તદાનીં તસ્મિન્મમત્વે સતિ તદીયહાનિવૃદ્ધ્યોશ્ચિત્તં વિક્ષિપ્યેત । એતત્સર્વમભિપ્રેત્ય ગૌડપાદાચાર્યા આહુઃ-
"નિઃસ્તુતિર્નિર્નમસ્કારો નિઃસ્વધાકાર એવ ચ
ચલાચલનિકેતશ્ચ યતિર્યાદૃચ્છિકો ભવેત્" ॥ - (માણ્ડૂક્યકારિકાયાં ૨.૩૭) ઇતિ ॥

યથા મઠો ન પરિગ્રહીતવ્યસ્તથા સૌવર્ણરાજતાદીનાં ભિક્ષાચમનાદિપાત્રાણામેકમપિ ન ગૃહ્ણીયાત્ । તદાહ યમઃ-
"હિરણ્મયાનિ પાત્રાણિ કાર્ષ્ણાયસમયાનિ ચ ।
યતીનાં તાન્યપાત્રાણિ વર્જયેત્તાનિ ભિક્ષુકઃ" ॥ ઇતિ
મનુરપિ-
"અતૈજસાનિ પાત્રાણિ તસ્ય સ્યુર્નિર્વ્રણાનિ ચ ।
તેષામદ્ભિઃ સ્મૃતં શૌચં ચમસાનામિવાધ્વરે ॥

અલાબુદારુપાત્રં વા મૃન્મયં વૈણવં તથા ।
એતાનિ યતિપાત્રાણિ મનુઃ સ્વાયમ્ભુવોઽબ્રવીત્" ॥ - (મનુ ૬.૫૩, ૫૪) ઇતિ ॥

બોધયનોપિ -
"સ્વયમાહૃતપર્ણેષુ સ્વયં શીર્ણેષુ વા પુનઃ ।
ભુઞ્જીત ન વટાશ્વત્થકરઞ્જાનાં ચ પર્ણકે ॥

આપદ્યપિ ન કાંસ્યેષુ મલાશી કાંસ્યભોજનઃ ।

સૌવર્ણે રાજતે તામ્રે મૃન્મયે ત્રપુસીસયોઃ" ॥ ઇતિ ।
તથા લોકં જનં શિષ્યવર્ગં ન ગૃહ્ણીયાત્ । તદાહ મનુઃ -
"એક એવ ચરેન્નિત્યં સિદ્ધ્યર્થમસહાયકઃ ।
સિદ્ધિમેકસ્ય પશ્યન્હિ તજ્જહાતિ ન હીયતે" ॥ - (મનુ ૬.૪૨) ઇતિ ॥

મેધાતિથિરપિ-
"આસનં પાત્રલોપશ્ચ સઞ્ચયઃ શિષ્યસઙ્ગ્રહઃ ।
દિવાસ્વાપો વૃથાલાપો યતેર્બન્ધકરાણિ ષટ્ ॥

"એકાહાત્પરતો ગ્રામે પઞ્ચાહાત્પરતઃ પુરે ।
વર્ષાભ્યોન્યત્ર યત્સ્થાનમાસનં તદુદાહૃતમ્ ॥

"ઉક્તાલાબ્વાદિપાત્રાણામેકસ્યાપિ ન સઙ્ગ્રહઃ ।
ભિક્ષોર્ભૈક્ષભુજશ્ચાપિ પાત્રલોપઃ સ ઉચ્યતે ॥

"ગૃહીતસ્ય તુ દણ્ડાદેર્દ્વિતીયસ્ય પરિગ્રહઃ ।
કાલાન્તરોપભોગાર્થં સઞ્ચયઃ પરિકીર્તિતઃ ॥

"શુશ્રૂષાલાભપૂજાર્થં યશોઽર્થં વા પરિગ્રહઃ ।
શિષ્યાણાં ન તુ કારુણ્યાત્સ જ્ઞેયઃ શિષ્યસઙ્ગ્રહઃ ।
"વિદ્યા દિનં પ્રકાશત્વાદવિદ્યા રાત્રિરુચ્યતે ।
વિદ્યાભ્યાસે પ્રમાદો યઃ સ દિવાસ્વાપ ઉચ્યતે ॥

"આધ્યાત્મિકીં કથાં મુક્ત્વા ભૈક્ષચર્યાં સુરસ્તુતિમ્ ।
અનુગ્રહઃ પથિપ્રશ્નો વૃથાલાપઃ સ ઉચ્યતે" ॥

લોકં શિષ્યજનરૂપં ન ગૃહ્ણીયાદિત્યેતાવદેવ ન ભવતિ, કિં તુ તસ્ય લોકસ્યાવલોકં દર્શનમપિ ન કુર્યાત્, તસ્ય બન્ધહેતુત્વાત્ । ન ચેત્યનેનાન્યદપિ સ્મૃતિનિષિદ્ધં ન કુર્યાદિત્યભિપ્રેતમ્ । તચ્ચ નિષિદ્ધં મેધાતિથિર્દર્શયતિ-
"સ્થાવરં જઙ્ગમં બીજં તૈજસં વિષમાયુધમ્ ।
ષડેતાનિ ન ગૃહ્ણીયાદ્યતિર્મૂત્રપુરીષવત્ ॥

રસાયનં ક્રિયાવાદં જ્યોતિષં ક્રયવિક્રયમ્ ।
વિવિધાનિ ચ શિલ્પાનિ વર્જયેત્પરદારવત્" ॥ ઇતિ ।
યોગિનો લૌકિકવૈદિકવ્યવહારગતાનિ યાનિ બાધકાનિ સન્તિ તેષાં વર્જનમભિહિતમ્ । અથ પ્રશ્નોત્તરાભ્યામત્યન્તબાધકં પ્રદર્શ્ય તદ્વર્જનમાહ-

“આબાધકઃ ક ઇતિ ચેદાબાધકોસ્ત્યેવ । યસ્માદ્ભિક્ષુર્હિરણ્યં રસેન દૃષ્ટં ચેત્સ બ્રહ્મહા ભવેત્ । યસ્માદ્ભિક્ષુર્હિરણ્યં રસેન સ્પૃષ્ટં ચેત્સ પૌલ્કસો ભવેત્ । યસ્માદ્ભિક્ષુર્હિરણ્યં રસેન ગ્રાહ્યં ચેત્સ આત્મહા ભવેત્ । તસ્માદ્ભિક્ષુર્હિરણ્યં રસેન ન દૃષ્ટં ચ ન સ્પૃષ્ટં ચ ન ગ્રાહ્યં ચ” (પરમ૦ ઉપ૦ .૪) ઇતિ ।

આકારોઽભિવ્યાપ્ત્યર્થઃ, “આઙીષદર્થેભિવ્યાપ્તૌ” ઇત્યભિહિતત્વાત્ । અભિવ્યાપ્તૌ બાધકોઽત્યન્તબાધકસ્તસ્ય સદ્ભાવં પ્રતિજ્ઞાય હિરણ્યસ્ય તથાવિધબાધકત્વમુચ્યતે । રસેનાભિલાષયુક્તેનાદરેણ હિરણ્યં યદિ દૃષ્ટં સ્યાત્તદાનીં સ દ્રષ્ટા ભિક્ષુર્બ્રહ્મહા ભવેત્ । હિરણ્યાસક્ત્યા તત્સમ્પાદનરક્ષણયોઃ સર્વદા પ્રયતમાનસ્તદ્વૈયર્થ્યપરિહારાય પ્રપઞ્ચમિથ્યાત્વપ્રતિપાદકાન્ વેદાન્તાન્દૂષયિત્વા તત્સત્યત્વમવલમ્બતે । તતઃ શાસ્ત્રસિદ્ધમદ્વિતીયં બ્રહ્મ તેન ભિક્ષુણા હતમેવ ભવતિ । તસ્માદસૌ બ્રહ્મહા ભવેત્ ।

તથા ચ સ્મર્યતે-

“બ્રહ્મ નાસ્તીતિ યો બ્રૂયાદ્દ્વેષ્ટિ બ્રહ્મવિદં ચ યઃ ।

અભૂતબ્રહ્મવાદી ચ ત્રયસ્તે બ્રહ્મઘાતકાઃ । ” ઇતિ ।

“બ્રહ્મહા સ તુ વિજ્ઞેયઃ સર્વધર્મબહિષ્કૃતઃ । ” ઇતિ ચ ।

અભિલાષપૂર્વકં હિરણ્યં સ્પૃષ્ટં ચેત્તદા તત્સ્પૃષ્ટા ભિક્ષુઃ પતિતત્વાત્ પૌલ્કસો મ્લેચ્છસદૃશો ભવેત્ । પાતિત્યં ચ સ્મર્યતે-

“પતત્યસૌ ધ્રુવં ભિક્ષુર્યસ્ય ભિક્ષોર્દ્વયં ભવેત્ ।

ધીપૂર્વં રેત ઉત્સર્ગો દ્રવ્યસઙ્ગ્રહ એવ ચ” ॥ ઇતિ ।

અભિલાષપુરઃસરં હિરણ્યં ન ગ્રાહ્યમ્ । ગૃહીતં ચેત્તદા સ ભિક્ષુર્દેહેન્દ્રિયાદિસાક્ષિણમસઙ્ગં ચિદાત્માનં હતવાન્ભવેત્, અસઙ્ગત્વમપોહ્ય સ્વાત્મનો હિરણ્યાદિદ્રવ્યં પ્રતિ ભોક્તૃત્વેન પ્રતિપન્નત્વાત્ । તસ્યાશ્ચાન્યથાપ્રતિપત્તેઃ સર્વપાપરૂપત્વં સ્મર્યતે-

“યોઽન્યથા સન્તમાત્માનમન્યથા પ્રતિપદ્યતે ।

કિં તેન ન કૃતં પાપં ચોરેણાત્માપહારિણા” ॥ - (મહાભારતે ૧.૬૮.૨૬) ઇતિ ॥

કિં ચાત્મઘાતિનઃ સુખલેશેનાપિ રહિતા બહુવિધદુઃખેનાવૃત્તા લોકાઃ શ્રૂયન્તે-

“અસુર્યા નામ તે લોકા અન્ધેન તમસાવૃતાઃ ।

તાંસ્તે પ્રેત્યાભિગચ્છન્તિ યે કે ચાત્મહનો જનાઃ । ” - (ઈશોપનિષદિ ૩) ઇતિ ॥

દૃષ્ટં ચેત્યનેન ચકારેણ શ્રુતં ચ સમુચ્ચીયતે । સ્પૃષ્ટં ચેત્યનેન કથિતસ્ય સમુચ્ચયઃ । ગ્રાહ્યં ચેત્યનેન વ્યવહૃતં ચેતિ સમુચ્ચીયતે । દર્શનસ્પર્શનગ્રહણવદભિલાષપૂર્વકા હિરણ્યવૃત્તાન્તશ્રવણતદ્ગુણકથન-તદીયક્રયાદિવ્યવહારા અપિ પ્રત્યવાયહેતવ યસ્માત્સાભિલાષહિરણ્યદર્શનાદયો દોષકારિણસ્તસ્માદ્ભિક્ષુણા

હિરણ્યદર્શનાદયો વર્જનીયા ઇત્યર્થઃ । હિરણ્યવર્જનસ્ય ફલમાહ-

“સર્વે કામા મનોગતા વ્યાવર્તન્તે દુઃખે નોદ્વિગ્નઃ સુખે નિઃસ્પૃહસ્ત્યાગો રાગે સર્વત્ર શુભાશુભયોરનભિસ્નેહો ન દ્વેષ્ટિ ન મોદતે ચ સર્વેષામિન્દ્રિયાણાં ગતિરુપરમતિ ય આત્મન્યેવાવતિષ્ઠતે” (પરમ૦ ઉપ૦ .૪) ઇતિ ।

પુત્રભાર્યાગૃહક્ષેત્રાદિકામાનાં સર્વેષાં હિરણ્યમૂલત્વાદ્ધિરણ્યે પરિત્યક્તે સતિ તે કામા મનોગતા મનસ્યવસ્થાનાદ્વ્યાવર્તન્તે વ્યાવૃત્તા ભવન્તિ । કામનિવૃત્તૌ સત્યાં કર્મપ્રાપ્તયોર્દુઃખસુખયોરુદ્વેગસ્પૃહે ન ભવતઃ । એતચ્ચ સ્થિતપ્રજ્ઞપ્રસ્તાવે પ્રપઞ્ચિતમ્ । ઐહિકયોઃ સુખદુઃખયોર્વિક્ષેપકત્વેનામુષ્મિકવિષયરાગેપિ ત્યાગો ભવતિ । ઐહિક સુખસ્પૃહાયુક્તો હિ તદ્દૃષ્ટાન્તેનાનુમિત આમુષ્મિકે સુખે રાગવાન્ભવતિ । તસ્માદૈહિકે નિષ્પૃહસ્યામુષ્મિકે રાગાભાવો યુજ્યતે । એવં સતિ સર્વત્ર લોકદ્વયેપિ યૌ શુભાશુભાવનુકૂલપ્રતિકૂલવિષયૌ તયોરનભિસ્નેહઃ । એતચ્ચ દ્વેષરાહિત્યસ્યાપ્યુપલક્ષણમ્ । તાદૃશો વિદ્વાનશુભકારિણં કઞ્ચિદપિ પુરુષં ન દ્વેષ્ટિ । શુભકારિણં દૃષ્ટ્વા ન ચ મોદં પ્રાપ્નોતિ । દ્વેષમોદરહિતો યઃ પુમાનાત્મન્યેવ સર્વદાવતિષ્ઠતે તસ્ય સર્વેષામિન્દ્રિયાણાં ગતિઃ પ્રવૃત્તિરુપરમતિ । ઇન્દ્રિયોપરતૌ ન કદાચિદપિ નિર્વિકલ્પસમાધેર્વિઘ્નો ભવતિ । “તેષાં કા સ્થિતિઃ ?” ઇતિ પ્રશ્નસ્ય સઙ્ક્ષેપવિસ્તરાભ્યામુત્તરં પૂર્વમુક્તમ્; તદેવાત્ર પુનરપિ હિરણ્યનિષેધપ્રસઙ્ગેન સ્પષ્ટીકૃતમ્ ।
અથ વિદ્વત્સંન્યાસમુપસંહરતિ -
“યત્પૂર્ણાનન્દૈકબોધસ્તદ્બ્રહ્માહમસ્મીતિ કૃતકૃત્યો ભવતિ કૃતકૃત્યો ભવતિ” (પરમ૦ ઉપ૦ .૪) ઇતિ ।
યદ્બ્રહ્મ વેદાન્તેષુ પૂર્ણાનન્દૈકબોધઃ પરમાત્મેતિ નિરૂપિતં તદ્બ્રહ્માહમસ્મીત્યેવં સર્વદાનુભવન્નયં યોગી પરમહંસઃ કૃતકૃત્યો ભવતીતિ । યથા ચ સ્મર્યતે —
“જ્ઞાનામૃતેન તૃપ્તસ્ય કૃતકૃત્યસ્ય યોગિનઃ ।
નૈવાસ્તિ કિઞ્ચિત્કર્તવ્યમસ્તિ ચેન્ન સ તત્ત્વવિત્” ॥ ઇતિ ॥

જીવન્મુક્તિવિવેકેન તમો હાર્દં નિવારયન્ ।
પુમર્થમખિલં દેયાદ્વિદ્યાતીર્થમહેશ્વરઃ ॥ ૧॥

ઇતિ શ્રીમદ્વિદ્યારણ્યપ્રણીતે જીવન્મુક્તિવિવેકે વિદ્વત્સંન્યાસનિરૂપણં નામ પઞ્ચમં પ્રકરણમ્ ॥ ૫॥

સમ્પૂર્ણોઽયં શ્રીમદ્વિદ્યારણ્યપ્રણીતો જીવન્મુક્તિવિવેકઃ ।

Proofread by Manish Gavkar

*Jivanmuktivivekah*
pdf was typeset on August 19, 2025

Please send corrections to *sanskrit@cheerful.com*